36 $^{a}$) $V_{1.3}$ $D_{2.9.12}$ $T_3$ $G_2$ $M_7$ पराङ्मुखी कृते ( $D_9$ °तो ); $D_5$ पराङ्मुखपरे; Ct as in text ( for पराङ्मुखे कृते ). $D_9$ देवो ( for देवे ). —$^{b}$) $V_1$ गरुडेपि. Ś $V_{1.3}$ $D_{2.8.9.12}$ $T_3$ च ( for वै ). $\tilde{N}$ $V_2$ B $D_{1.3-5}$ $M_6$ गरुडेन पतत्रिणा. —$^{c}$) $D_{6.7.10.11}$ $M_{10}$ महाञ्शब्दो; $M_4$ महान्नादो. —$^{d}$) $D_6$ अभिनंदतां; $M_3$ अभिगर्जतां. —For $36^{cd}$, Ś $V_1$ $D_{2.8.9.12}$ $T_3$ subst. :

123* शुशुभे राक्षसरवं सिंहानामिव गर्जितम् ।

[ $T_3$ शुश्रुवे. $V_1$ -वचः ; $T_3$ -रवः ( for -रवं ). $T_3$ गर्जतां. ]; while $\tilde{N}$ $V_{2.3}$ B $D_{1.3-5}$ $M_6$ subst. for $36^{cd}$ :

124* बभूव रक्षसां नादः सिंहानामिव गर्जताम् ।

[ $D_5$ शुशुभे ( for बभूव ). $D_5$ मेघानाम्. $V_3$ गर्जितं; $D_{1.3.4}$ नर्दतां ( for गर्जताम् ). ]

37 $^{a}$) Ś $\tilde{N}_2$ $B_2$ $D_{2.8.12}$ गर्जतां; $D_{1.3.4.6.7.9-11}$ $T_{1.2}$ $G_{1.3}$ $M_{1.2.4-8}$ रवतां; $D_5$ अथ तं; $G_2$ रुदतां; $M_3$ नर्दतां; $M_9$ रुवतां ( for नदतां ). $D_{1.4}$ रावान् ; $D_{3.6.7.10.11}$ $T_{1.2}$ G $M_{1.2.4.5.7-10}$ रावं ( for नादं ). $V_3$ $B_1$ राक्षसानां तु तं ( $B_1$ तदा ) नादं; L ( ed. ) गर्जतां रक्षसां नादं. —$^{b}$) $D_{1.4}$ इंद्रानुजः. ❀ Cg.t : हरिहयानुजः इन्द्रानुजः। ; so also Ck. ❀ —After $37^{ab}$, $D_{6.7.10.11}$ $G_2$ $M_{5.10}$ ins. :

125* तिर्यगास्थाय संक्रुद्धः पक्षीशे भगवान्हरिः ।

[ $D_6$ अस्त्रैः सु-; $M_{10}$ आस्ते सु- ( for आस्थाय ). ]

—$^{c}$) $B_4$ हि; $D_{1.3.4}$ [ ऽ ]भि-; $D_5$ वि- ( for ऽपि ). Ś $V_{1.3}$ $D_{2.5.8.9.12}$ $T_3$ चिक्षेप ( for [ उ ]त्ससर्ज ). —$^{d}$) $D_{6.7.10.11}$ $T_{1.2}$ G $M_{2-5.9.10}$ मालेश्चक्रं; $M_{1.8}$ चक्रं मालेर्. $T_1$ damaged for जिघां.

38 $^{a}$) $Ś_{1.2}$ $D_{2.8.12}$ यत्सूर्य-; $G_2$ तद्भानु- ( for तत्सूर्य- ). Ś $V_{1.3}$ $D_{2.5.8.9.12}$ $T_3$ -मंडलाकारं; $V_2$ °लं शेषं ( for -मडण्लाभासं ). —$^{b}$) $\tilde{N}$ $V_2$ B प्रभया; $D_{1.4}$ भासया ( for स्वभासा ). Ś $V_{1.3}$ $D_{2.3.5.8.9.12}$ $T_3$ युगां( $V_3$ प्रशां )ताग्निसमप्रभं; $M_6$ भासयत्सर्वतो नभः. —$^{c}$) $M_1$ ज्वालाचक्र- ( for काल° ). —$V_1$ illeg. for $38^{d}$. —$^{d}$) $\tilde{N}_1$ B मालिशीर्षम् ; $D_{1.4}$ लंकातस्यम्( sic ). $T_{1.2}$ $G_3$ $M_3$ न्यपातयत् ; $M_{2.8.9}$ व्यपा°; G ( ed. ) अपाहरत् ( for अपातयत् ). Ś $V_3$ $D_{2.5.8.9.12}$ $T_3$ व्यहर( $D_9$ °न )त्तस्य तच्छिरः.

39 $^{a}$) $B_4$ तच्छित्वा. —$^{b}$) $\tilde{N}_1$ $V_2$ $B_{2-4}$ $M_6$ चक्रकृत्तं; $B_1$ चक्रह( m. also °प्र )तं; $D_7$ चक्रोत्कृंतं; $G_1$ °क्षिप्तं ( for चक्रोत्कृत्तं ). Ś $V_{1.3}$ $D_{2.5.8.9.12}$ $T_3$ चक्रोत्कृत्तं ( $T_3$ °त्कृंतं ) तु( $Ś_{2.3}$ $V_1$ $D_{12}$ $T_3$ च ) राघव. —$^{d}$) Ś $V_1$ $D_{2.5.8.9.12}$ $T_3$ वृत्र-; $M_3$ * हु- ( for राहु- ). —After 39, $B_4$ reads 43–47.

40 $^{a}$) Ś $V_{1.3}$ $D_{2.5.8.9.12}$ $T_3$ सुरगणैर् ; $B_{3.4}$ $D_{10.11}$ $T_1$ $M_{10}$ सुरैः संप्र-; $D_{6.7}$ सुरैः सुप्र- ( for सुरैः सुसं- ). —$^{b}$) $V_2$ सर्वपापैः ( sic ); $D_7$ संप्रणादः ( for सर्वप्राण- ). Ś $V_{1.3}$ $D_{2.5.8.12}$ $T_3$ $M_{3.9}$ -समीरिताः( $V_3$ °तैः ). —$^{c}$) $Ś_1$ $V_{1.3}$ $D_{2.5.8.9}$ $T_3$ -रवा मुक्ताः; $\tilde{N}$ B ततो( $\tilde{N}_1$ °था ) मुक्तः; $D_{1.4.6.7}$ $G_3$ $M_{1.2.8.9}$ -रवोन्मुक्तः; $T_1$ * * न्मुक्तः. $Ś_{2.3}$ $D_{12}$ सिंहनादास्ततो( $D_{12}$ °दा ) मुक्ताः. —$^{d}$) Ś $D_8$ -वादन-; $V_3$ $G_2$ साध्विति; $D_{2.9}$ -वादेन; $D_{12}$ -वादानु- ( for देवेति ). $B_2$ $T_3$ $M_7$ वादिनः.

41 $B_3$ om. 41. —$^{ab}$) $T_2$ $M_9$ सुमालिर्. $D_{1.4}$ पिता ( for अपि ). Ś $V_{1.3}$ $D_{2.5.8.9}$ $T_3$ सुमाली( $Ś_1$ $D_{5.8}$ $T_3$ °लिर् ) मालिनं दृष्ट्वा निहतं माल्यवांस्तथा( $Ś_{2.3}$ °दा; $V_1$ [ illeg. ]; $V_3$ $T_3$ °नथ; $D_5$ °नपि ); $D_{12}$ सुमालिनं हतं दृष्ट्वा माल्यवान्मालिनं तथा ( corrupt ). —$^{c}$) Ś $V_{1.3}$ $D_{2.5.8.12}$ बभूव; $D_{1.4}$ बभौ च ( sic ); $D_3$ तावुभौ; $D_9$ संभूय; $M_5$ चपलौ; L(ed.) बभूवतुः( hypm. ) ( for सबलौ ). Ś $V_{1.3}$ $D_{2.5.8.9.12}$ -संतप्तो. $T_3$ बभूवतुः शोकतप्तौ. —$^{d}$) $D_{6.7.10.11}$ $G_1$ $M_{2.9.10}$ लंकामेव; $T_1$ बलं प्रति; $M_1$ परसैन्ये ( for लङ्कां प्रति ). $V_2$

G. 7·7·47 B. 7·7·40 L. 7·6·45 गरुडस्तु समाश्वस्तः संनिवृत्य महामनाः ।
राक्षसान्द्रावयामास पक्षवातेन कोपितः ॥ ४२
नारायणोऽपीषुवराशनीभि-
र्विदारयामास धनुःप्रमुक्तैः ।
नक्तंचरान्मुक्तविधूतकेशा-
न्यथाशनीभिः सतडिन्महेन्द्रः ॥ ४३
भिन्नातपत्रं पतमानशस्त्रं
शरैरपध्वस्तविशीर्णदेहम् ।
विनिःसृतान्त्रं भयलोलनेत्रं
बलं तदुन्मत्तनिभं बभूव ॥ ४४
सिंहार्दितानामिव कुञ्जराणां
निशाचराणां सहकुञ्जराणाम् ।
रवाश्च वेगाश्च समं बभूवुः
पुराणसिंहेन विमर्दितानाम् ॥ ४५

B2 D1.3.4.6.7.10.11 G1 M1.2.6.9.10 प्रधावितौ; T1.2 G3 M3.5 समीयतुः. Ś V1.3 D2.8.9.12 लंकां चैवाभ्य(V1.3 प्रत्यभि)धाव(Ś2.3 °पद्य)त; Ñ1 D5 लंकां स प्रति धावति; T3 लंकामभ्यभिधावतां.

42 V1 च; B4 [ऽ]पि (for तु). V1.3 D5 समाश्वस्य. —$^{b}$) T2 M1.7 संनिवर्त्य. Ñ V2 B4 यथामनः; B2.3 यथानिलः; D6.7.10.11 M3.6 यथा पुरा; M2.8 महात्मना; M10 पुरा यथा (for महामनाः). Ś V1.3 D2.5.8.9.12 T3 चिरेण (Ś1 V1.3 D5.8 °णा) चिरकालकृत् (D5 T3 °वत्); B1 संनिवर्त्य यथामरः; D1.3.4 निवृत्य च यथामनः; T1 G3 संनिकृ(G3 °वृ)त्तमनोरथः. —$^{c}$) Ñ B1–3 पातयामास; V2 घातया°; B4 पीडया°; M6 रावया° (for द्रावयामास). —$^{d}$) B2 D2 M4.6–8.10 पक्षपातेन. D3 कोपनः (for कोपितः). D1 पूर्वं तेन प्रकोपितः. —After 42, V2 B3 D6.7.10.11 T1 G1 M6 read 48–49.

43 M6 om. 43–47. B3 reads 43–45$^{b}$ (including 127*) after 7.6.54. B4 reads 43–47 after 39. —$^{a}$) V1 बाणवर-; B3.4 बाणशर-; D1.3.4 [अ]स्त्रवर-; G1 [ऽ]सीषुवर-; M7 [ऽ]पीषुशर- (for ऽपीषुवर-). Ś Ñ1 V1.3 D2.5.6.8.9.12 T3 [इ]षुवरैर्विचित्रैर्; Ñ2 B2 वरे (B2 [आ]शु वरे)षुभिः प्रभुर्; B1 [इ]षुवरैः सुवक्त्रैर् (for °राशनीभिर्). ❀ Cv : अशनीभिरिति । अशनीभिरितिस्त्रीनिर्देशः तस्य पूर्वस्त्रीत्वात् । अशनिभरण्यरणय इति पाणिनीयलिङ्गानुशासनम् ।; Cg : अशनीभिरित्यार्षो दीर्घः ।; so also Ck.t. ❀ —D4 om. (hapl.) from $^{b}$ up to शनीभिः in $^{d}$. —$^{b}$) Ñ1 B D7.10.11 M2 -विमुक्तैः; V3 D5.9.12 -प्रयुक्तैः (for -प्रमुक्तैः). —M1 om. 43$^{c}$–45. —$^{c}$) V3 रक्त-; B2 बाण-; D3 धूत-; D5 ध्वस्त- (for मुक्त-). D3 -विमुक्तकेशान्; D6 -शिरोरुहांस्तु; T1.2 G3 M5 -विकीर्ण°; Ct as in text (for -विधूतकेशान्). D1 विध्वस्तचापासिविकृत्तबाणान्. —$^{d}$) B2.4 तु नगान्; B3 दनुजान्; D1.3.4 सहसा (for सतडिन्). D7.10.11 T1.2 G1.3 M2–4 महाभ्रः (for महेन्द्रः). Ś Ñ V B1 D2.5.6.8.9.12 विध्वस्तचापासिनिकृत्त(D2 °विकृंत; D8 °निकृंत)बाणान् (D6 °सि हरिः प्रकोपात्); T3 विध्वस्तकेशान्विनिकृत्तबाहून्. ❀ Cv : अभ्रशब्दस्य पुंस्त्वं ऋषिनिपातनात्. ❀

44 M1.6 om. 44 (cf. v.l. 43). For sequence in B3.4, cf. v.l. 43. —$^{a}$) Ñ V1.3 B3 D1.3.4 छिन्न- (for भिन्न-). Ñ1 अथ विद्ध-; V1 T3 स्वपविद्ध-; V2 ह्यपरिक्त-; V3 प्रतिहस्त-; B1 D5 प्रतिविद्ध-; B2 पवमान-; D1.4 हत°; D3 हत°; G1 प्लव° (for पतमान-). B2–4 -वस्त्रं (for -शस्त्रं). Ś D2.8.9.12 प्रविद्धपत्रं प्रतिविद्धशस्त्रं. —$^{b}$) D6 वरैर्ध्वस्त-; M5 अपि ध्वस्त-. D6.7.10.11 T1.2 G1.3 M3–5.7–9 -विनीतवेषं; M2 -विकीर्णदेहं (for -विशीर्णदेहम्). Ś Ñ V1.2 B1 D1.2.5.8.9.12 T3 शरैः (D5 °स्त्रैः) समंतादति(Ñ1 V1 D1 T3 °पि; Ñ2 B1 °भि)भिन्न(V2 °परिक्त)देहं; V3 शरैः सुसंनादविभिन्नदेहं; B2–4 D3.4 शरैः समारो(B3 °वे)पि(D3 °सार्दि; D4 °सादि)तभीमपत्रं (B2 °मंद्रं). —$^{c}$) Ś Ñ1 V2 B1 D1.2.4–6.8.9.12 T3 M2 विनिःसृ(B1 °सृ; T3 °निःसृ)तासृग्; V1 G2 M10 °तं तद्; B3 G1 M7.8 °तास्त्रं; B4 °तार्थं (sic); D3 °तास्त्रं; T1 °सुतांत्रं; M5 °तांगं; G (ed.) °गतांत्रं (for निनिःसृतान्त्रं). T3 गत- (for भय-). —$^{d}$) M2.8.9 बलं तदा. D10.11 M5 उन्मत्ततरं (for °निभं).

45 M1.6 om. 45 (cf. v.l. 43). For sequence in B3.4, cf. v.l. 43. —$^{b}$) B3 रक्षोगणानां (for निशाचराणां). B2 इव; G2 M10 हय- (for सह-). D1.3.4 रणमूर्ध्नि तूर्णं (for सहकुञ्जराणाम्). Ś V3 D2.8.9.12 चक्रार्दितानां हि निशाचराणां. —B2 om. 45$^{cd}$. —$^{c}$) B4 D1.3–5 रा(B4 र)वश्च वेगश्च समं बभूव. —$^{d}$) D6.7 G1 M4.7 पुरा नृसिंहेन; Cg as in text (for पुराणसिंहेन). B4 भयार्दितानां; D1.3–5 शरा°; D6 विन°; M2.4.7–9 सम° (for विमर्दितानाम्). ❀ Ck : पुराणसिंहो नरसिंहः ।; so also Ct. ❀ —For 45$^{cd}$, Ś Ñ V B1 D2.8.9.12 T3 subst.:

126* दुःखेन लब्धं विजयं हि देवै-
र्युद्धे स्थितानां हि वरान्वितानाम् ।

[(l. 1) Ñ1 दुःखं हि. Ñ2 V2 लब्धो विजयो.—(l. 2) Ñ2 illeg.; V1 हि वराश्रितानां; V3 च शरार्दि°; T3 परार्दि° (for हि वरान्वितानाम्).];

while B3 subst. for 45$^{cd}$:

127* पुरा नृसिंहेन भयार्दितानां
रक्षोगणानां बलमावभाषे ।

संछाद्यमाना हरिबाणजालैः
स्वबाणजालानि समुत्सृजन्तः ।
धावन्ति नक्तंचरकालमेघा
वायुप्रणुन्ना इव कालमेघाः ॥ ४६
चक्रप्रहारैर्विनिकृत्तशीर्षाः
संचूर्णिताङ्गाश्च गदाप्रहारैः ।
असिप्रहारैर्बहुधा विभक्ताः
पतन्ति शैला इव राक्षसेन्द्राः ॥ ४७

चक्रकृत्तास्यकमला गदासंचूर्णितोरसः ।
लाङ्गलग्लपितग्रीवा मुसलैर्भिन्नमस्तकाः ॥ ४८
केचिच्चैवासिना छिन्नास्तथान्ये शरताडिताः ।
निपेतुरम्बरात्तूर्णं राक्षसाः सागराम्भसि ॥ ४९
तदाम्बरं विगलितहारकुण्डलै-
र्निशाचरैर्नीलबलाहकोपमैः ।
निपात्यमानैर्ददृशे निरन्तरं
निपात्यमानैरिव नीलपर्वतैः ॥ ५० G. 7. 7. 55 B. 7. 7. 54 L. 7. 6. 53

इति श्रीरामायणे उत्तरकाण्डे सप्तमः सर्गः ॥ ७ ॥

---

46 M6 om. 46 ( cf. v.l. 43 ). B3 om. 46–47. For sequence in B4, cf. v.l. 43.—$^{a}$) Ś Ñ1 D2.8 संसाद्यमानाः V1 प्रशम्य°; V2 T G1.3 M1.2.4.5.7–9 संबाध्य°; B4 संमर्दिता वै; D6.7.10.11 G2 M10 ते वार्यमाणा (for संछाद्यमाना). V1 इव (for हरि-).—$^{b}$) V2 B2.4 D3 ते; M7 स- (for स्व-). V2 T3 समुत्सृजंति; Cg.k.t as in text (for °जन्तः).—$^{c}$) V3 रक्तांबर- (for नक्तंचर-).—V3 T2 G1.3 om. (hapl.) $46^{d}$.—$^{d}$) B2 वातैः; B4 वात- (for वायु-). Ñ1 B1 (m.) -प्रभिन्ना; T3 -प्रसन्ना (for -प्रणुन्ना).

47 B3 M6 om. 47 (cf. v.l. 46 and 43 respy.). For sequence in B4, cf. v.l. 43. T1 M3 read $47^{a}$ twice.—$^{a}$) V3 शत्रु-; T1 M3 (both first time) शर- (for चक्र-). V2 * विशीर्ण-; B2.4 च निकृत्त-; D7 विनिकृंत- (for विनिकृत्त-). Ś Ñ1 V B1 D2.5.8.9.12 T3 -देहाः; T1 M3 (both first time) -गात्राश् (for -शीर्षाः).—$^{b}$) Ś2 संचू**** (moth-eaten); D1.3.4 संचूर्णिताश्चापि; M1 संघूर्णि° (for संचूर्णिताङ्गाश्च).—$^{c}$) Ś Ñ1 V1 B1.2 D1–4.8.9.12 T3 च द्विधा; V2 D10.11 G1 M2.5.8.9 द्विविधा; V3 च गदा-; B4 विविधैर्; M1.7 विविधा; M3 बहुभिर्; M4 विविधं; Cg.k.t as in text (for बहुधा). V2 D6.7.10.11 Cg.t विभिन्नाः; B2.4 विमुक्ताः; Ck as in text (for विभक्ताः).—$^{d}$) D1 शिला (unmetrical) (for शैला). M3 वज्रभिन्नाः (for राक्षसेन्द्राः).—After 47, M3 ins.:

128* वायुप्रभग्ना इव वृक्षषण्डाः
संछिन्नगात्रा युधि राक्षसेन्द्राः ।

—Then M3 cont.; T1.2 G1.3 ins. after 47:

129* निरन्तरं देवगणैश्च दृष्टाः.

—After 47, D6.7.10.11 T1 G1 (T1 G1 preceded by 129*) M6 read 50.

48 V2 B3 D6.7.10.11 T1 G1 M6 read 48–49 after 42.—$^{a}$) Ñ2 B D1.3.4 चक्रोत्कृत्त-; D6.7.10 चक्रकृंत-. Ś Ñ1 V D2.5.8.9.12 T3 चक्रविच्छि( V3 °प्रभि; T3 °विभि )न्नशिरसो.—$^{b}$) D3 -संघूर्णित- (for -संचू°).—D5 om. $48^{c}$–$49^{b}$. D7 om. $48^{cd}$.—$^{c}$) B2.3 M5 लांगूल-. Ñ2 B1.3 -[ आ ]कर्षित-; B2.4 -[ आ ]कलित-; D1.3.4 -[ अ ]प्रहत-; G2 -ग्लापित-; M2 -[ उ ]न्मथित-; M6 -ग्लावित-; Ck as in text (for -ग्लपित-). Ś Ñ1 V D2.8.9.12 T3 लांग( D2 °गू )लैर्दारि- ( V2 °लैः कर्षि )तग्रीवाः; G1 लांगलाभिहताश्चान्ये. ❀ Ck: तदा क्षितिरित्यादिक एक श्लोकः क्वचिदस्ति तदव्याख्येयम्। असंगतस्वरूपत्वात्. ❀

49 Ñ1 D5 om. $49^{ab}$ (for D5, cf. v.l. 48). D9 om. $49$–$50^{b}$. For sequence in V2 B3 D6.7.10.11 T1 G1 M6, cf. v.l. 48.—$^{a}$) G1 भिन्नास् (for छिन्नास्).—$^{b}$) B1.2.4 D1.3.4 T1 M3.6 -पीडिताः; T2 -**ताः (for -ताडिताः).—For $49^{ab}$, Ś V1.3 D2.8.12 T3 subst.:

130* असिभिर्बहुभिश्छिन्नाः शरसंभिन्नवक्षसः ।

[ T3 बहुधा (for °भिश्). V3 -मस्तकाः (for -वक्षसः). ]

—$^{c}$) Ś Ñ1 D2.5.8.12 V3 निपतंति. V2 B असुरास् (for अम्बरात्). V1.3 निपतंति च ते( V3 °त्यपरे ) तूर्णं.

50 D9 om. $50^{ab}$ (cf. v.l. 49). D6.7.10.11 T1 G1 M6 read 50 after 47.—$^{a}$) Ś1 V3 D1.2.4.5.8.12 T3 G1.2 M1.2.4.5.9.10 तदंबरं; Ñ B3.4 D3 M7 ततोंबरं ( Ñ1 B4 °राद् ); V2 ततोसुराः; B1 ततः सुराः; T1.2 G3 तदा( T2 °था ) क्षितिर्; M6 ततोंबरे; M3 **बरं (for तदाम्बरं). Ñ2 V2 B1.3.4 M6 प्रच्युत- (for विगलित-). B2 ततो लसच्चारु सु-; D6.7.10.11 विलंबमानैर्मणि- (for तदाम्बरं विगलित-).—$^{b}$) Ś2.3 अमित-; B2 मीन- (for नील-).—$^{c}$) V1 D6.7.9 निपात्यमानं. Ś D2.8.9.12 ददृशुर् (for ददृशे). M3 निशांतरं (sic) (for निरन्तरं).—$^{d}$) Ñ2 V2.3 विशीर्यमाणैर् (for निपात्यमानैर्).

Colophon.—*Sarga name*: Ś D1–5.8.9.12 राक्षसभंगः; Ñ1 मालिवधो राक्षसभंगः; Ñ2 V2 B D7 मालिवधः; V1 राक्षसवधः; V3 राक्षसोत्सादनं.—*Sarga no.* (figures words or both): Ś Ñ1 V2.3 B1.2 D2.4.12 om.; V1 5; D8.9 6.—After colophon, G M1.5.8 conclude with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

# ८

G. 7 8. 1 B. 7 8. 1 L. 7 7. 1

हन्यमाने बले तस्मिन्पद्मनाभेन पृष्ठतः ।
माल्यवान्संनिवृत्तोऽथ वेलातिग इवार्णवः ॥ १
संरक्तनयनः कोपाच्चलन्मौलिर्निशाचरः ।
पद्मनाभमिदं प्राह वचनं परुषं तदा ॥ २
नारायण न जानीषे क्षत्रधर्मं सनातनम् ।
अयुद्धमनसो भग्नान्योऽस्मान्हंसि यथेतरः ॥ ३
पराङ्मुखवधं पापं यः करोति सुरेश्वर ।
स हन्ता न गतः स्वर्गं लभते पुण्यकर्मणाम् ॥ ४
युद्धश्रद्धाथ वा तेऽस्ति शङ्खचक्रगदाधर ।
अहं स्थितोऽस्मि पश्यामि बलं दर्शय यत्तव ॥ ५
उवाच राक्षसेन्द्रं तं देवराजानुजो बली ।
युष्मत्तो भयभीतानां देवानां वै मयाभयम् ।
राक्षसोत्सादनं दत्तं तदेतदनुपाल्यते ॥ ६

## 8

☞ T4 missing for Sarga 8 (cf. v.l. 7.1). D12 begins with ॐ.

1 a) Ñ1 हन्यमान-. B2 चैत्र; M4.7 तूर्णं (for तस्मिन्). —b) B1 युध्यता (for पृष्ठतः). —c) Ś2.3 B3 D3.5.6 M6 स (for सं-). V1 D2 -प्रवृत्तो (for -निवृत्तो). Ś D2.8.9.12 [ऽ]भूद् (for ऽथ). B2.4 अपि संवृत्तो; G (ed.) संनिवृत्याथ. —d) V3 D7.10.11 T1.2 G3 M5 Ck.t (all except T1 with hiatus) वेलामेत्य; B2 °भिग; D6 °गतिर्; G2 M10 °तीत (for वेलातिग). T1 यथा (for इव). G1 वेलामिव महार्णवः. ❁ Ck : एत्य इवेति । असंधिश्छान्दसः ।; so also Ct. ❁

2 T3 om. 2ab. —a) M1 स (for सं-). D3 -नयनं. Ś2 D5–7.10.11 M5 क्रोधाच् (for कोपाच्). —b) D1.4 चलन्मूर्तिर्; D5.7 T1.2 G2 M2.5–9 चलमौलिर्. B2 निशाचरैः. —d) D5 तथा (for तदा). D1.3.4.6.7.10.11 T1.2 G M पुरुषोत्तमं; T3 परुषाक्षरं (for परुषं तदा).

3 b) Ñ2 क्षात्रं; V1.3 B1 D10.11 G1 क्षात्र-; B2 D5 क्षेत्र-. D6.7.10.11 पुरातनं (for सनातनम्). —cd) M8 अयत्न- (for अयुद्ध-). Ck.t योस्मान् (as in text). Ś1 B1 D8 यस्माद्भग्नान्; Ś2.3 D12 [ऽ]प्यस्मान्भग्नान्; Ñ1 V1.3 D2.5.9 T3 M9 योस्मान्भग्नान् (by transp.); Ñ2 V2 B2–4 D1.3.4 M6 यत्नो( D1.3.4 यस्त्वं ) भग्नान्; D6.7.10.11 T1.2 G1.3 M3.5 भग्ना( D6.7.10.11 भीता )नस्मान्; G2 M10 भग्नान्हंसि. V1.3 D1.2.4.9 M6 हिंसि (sic); G2 M10 त्वं हि; Ck.t as in text (for हंसि). Ś2.3 B3 M6.7 यथेतराः( B3 °रे; M6 °रान् ); D1 यथा नरः; M1 सुरेतरान्; M2 यथेरतः (meta.); M9 यथागतः; Cg.t as in text (for यथेतरः). G3 हिंसयसेतरां.

4 ab) Ś V1.3 D1.2.4.5.8.9.12 T3 नाम; D7 प्रायो (for पापं). Ñ2 B1.2 स हीतरः; T1.2 G1.2 M1–4.6–10 Ck [अ] सुरेतरः( M2.6 °र ) (for सुरेश्वर). D3 पराङ्मुखान्वधस्यैतान्प्रचरोथ सुरेतर (sic). —V2 repeats 4cd consecutively in marg. —c) Ś Ñ V3 B D1–5.8.9.12 T3 G3 M4.6 न; V2 (second time) अ-; Ck.t as in text (for स). M8 om. न (subm.). Ś V1.3 D1.2.4 5.8.9.12 T3 M6 लभते; Ñ V2 (second time) B D3 T1 G2 M3.5 न( B1 ना- ) हतः; G1 न गतिं; G3 निहतः (for न गतः). —D3 om. from स्वर्गं up to माल्यवन्तं in 131*. V1 पापं; G1 स्वर्ग्यां (for स्वर्गं). V2 (first time) न हंता स्वर्गं लभते. —d) Ñ V2 (second time) B2–4 ते( B3 ये )न कर्मणा (for पुण्यकर्मणाम्). Ś V1.2( first time ).3 D1.2.4.5.8.9.12 T3 कृतपुण्योपि नः श्रुतं; M6 पुनः पुण्येन कर्मणा. ❁ Cv : स हन्ता न गतः स्वर्गं लभते पुण्यकर्मणामिति पाठः । गतः मृतः ।; Ck : स हन्ता पराङ्मुखहन्ता कालान्तरे......हतः ।; Ct : स हन्ता इतो देहाद्गतः सन्स्वर्गं न लभते । 'स हन्ता न हतः' इति पाठे हतः । दैवहत इत्यर्थः. ❁

5 D3 om. up to माल्यवन्तं in 131* (cf. v.l. 4). —a) B3 युद्ध एव; D6 T3 युद्धे श्रद्धा. B3 (also) हि (for ते). V1 D7 M1 यथा( D7 °दा ) ते; D5 [अ]थ ते वा (by transp.) (for [अ]थ वा ते). Ñ1 युद्धाय ते यदि श्रद्धा. —b) Ñ V2 M6 चक्रशार्ङ्ग-; B1–3 चक्रशंख- (by transp.). —c) M1 स्थिरो (for स्थितो). B1 [ऽ]यं (for ऽस्मि). Ś Ñ V B3.4 D1.2.4.5.8.9.12 T3 M6 अयं( B3 स्वयं; D5 अत्र ) स्थितोहं. Ś D2.8.9.12 देवेश; D1.4 पश्य त्वं; M6 पश्याद्य (for पश्यामि). —d) Ś1 नः पुरः; Ś2.3 D12 सत्तम; Ñ1 D2.9 यत्नतः; V1 तत्त्वतः; D5 G3 मे( G3 तु ) तव; D8 नः पुनः; G1 तत्तव (for यत्तव). V3 बलं संदर्शयात्मनः; B1 बलं यत्तव दर्शय. —After 5, Ś1 Ñ V B D1.4.6.7.10.11 T1–3 G M ins.; D3 ins. before 6:

131* माल्यवन्तं स्थितं दृष्ट्वा माल्यवन्तमिवाचलम् ।

[ D3 om. माल्यवंतं. D6 श्रीमान् (for दृष्ट्वा). ]

6 Before 6, D3 ins. 131*. —b) Ś V1.2 B D1–5.8.9.12 दै( V2 B1 D1–5 दे )वतेंद्र- ; Ñ1 देवेंद्रस्य (for देवराज-). Ñ2 देवेंद्रावरजो बली. —c) Ś Ñ1 V1.3 D2.5.8.9.12 T3 भवद्भ्यो (for युष्मत्तो). —The portion of the text from 6d up to गान in 7.9. 6b is lost in T2 on a missing folio. —d) V1 तु; T1 G3 च (for वै). Ś Ñ1 V3 D2.5.8.9.12 T3 देवतानां; Ck.t as in text (for देवानां वै). Ś3 V1.3

प्राणैरपि प्रियं कार्यं देवानां हि सदा मया ।
सोऽहं वो निहनिष्यामि रसातलगतानपि ॥ ७
देवमेवं ब्रुवाणं तु रक्ताम्बुरुहलोचनम् ।
शक्त्या बिभेद संक्रुद्धो राक्षसेन्द्रो ररास च ॥ ८
माल्यवद्भुजनिर्मुक्ता शक्तिर्घण्टाकृतस्वना ।
हरेरुरसि बभ्राज मेघस्थेव शतह्रदा ॥ ९
ततस्तामेव चोत्कृष्य शक्तिं शक्तिधरप्रियः ।
माल्यवन्तं समुद्दिश्य चिक्षेपाम्बुरुहेक्षणः ॥ १०
स्कन्दोत्सृष्टेव सा शक्तिर्गोविन्दकरनिःसृता ।
काङ्क्षन्ती राक्षसं प्रायान्महोल्केवाञ्जनाचलम् ॥ ११
सा तस्योरसि विस्तीर्णे हारभासावभासिते ।
अपतद्राक्षसेन्द्रस्य गिरिकूट इवाशनिः ॥ १२
तया भिन्नतनुत्राणः प्राविशद्विपुलं तमः ।
माल्यवान्पुनराश्वस्तस्तस्थौ गिरिरिवाचलः ॥ १३
ततः कार्ष्णायसं शूलं कण्टकैर्बहुभिश्चितम् ।
प्रगृह्याभ्यहनद्देवं स्तनयोरन्तरे दृढम् ॥ १४ G. 7. 8. 15 B. 7. 8. 15 L. 7. 7. 14

D1.3.4 M2 महा- ; Ck.t as in text (for मया). Ñ2 V2 B ऽभयं मया (for वै मयाभयम्).—e) Ś1 D8 L (ed.) -[ उ ]च्छेदनाद् ( L [ed.] °नं ); Ś2.3 V2 B1.4 D12 -[ उ ]च्छादनाद् ( V2 °नं ); Ñ1 B2.3 D2.3 -[ उ ]त्सादनाद् ; D1.4.5 9 T3 M9 -[ उ ]त्सादने (for -[ उ ]त्सादनं). Ś1.2 Ñ1 भूतं; D3 वृत्तं; M7 दत्तं (for दत्तं). G3 राक्षसेभ्यो वरं दत्तं. ❀ Cv : देवानां वै......भयमिति पाठः। भयविशेषणं राक्षसोत्सादनमित्येतत्. ❀ —f) D10 तदेव तद् (hypm.); T1 G1.3 M1.3 तथा तद्; Ct as in text (for तदेतद्). B2 न च (for अनु-) G2 M8 -बध्यते; Ck.t as in text (for -पाल्यते).

7 T2 missing for 7 (cf. v.l. 6).—a) B2 बाणैर् (for प्राणैर्) and हितं (for प्रियं).—b) Ś1.3 Ñ V B D1–5.8.9.12 T3 देवतानां. Ś1.3 Ñ1 V1.3 D1–4.8.9.12 T3 G1.3 मया सदा (by transp.); D5 T1 मया सह; M7 सदा मम (for सदा मया). M6 देवानां हितकाम्यया.—c) M7 यो (for सो). Ś2.3 [ ऽ ]यं (for ऽहं). Ś D8.12 चाद्य; D2 वोद्य; D6 वोभि- ; D9 त्वाद्य (for वो नि-).

8 T2 missing for 8 (cf. v.l. 6).—a) Ś2.3 V1.3 D2.9.12 T3 एवं विष्णुं; Ñ1 B1 T1 एवमेवं; Ñ2 V2 B2.3 D6.10.11 देवदेवं; G (ed.) विष्णुमेवं (for देवमेवं). V2 B D6.7.10 11 T3 M9 तं (for तु). Ś1 D5.8 एवं ब्रुवाणं विष्णुं तु.—b) D1.3.4 सित- (for रक्त-). Ñ2 V2 B स तदा (B2 रुषा हि) पुरुषोत्तमं.—c) T1 G1.3 शक्तिं मुमोच; M1.3 शक्त्या जघान.—d) Ś D2.5.9.12 T1 ह (for च). Ñ V2 B1.3.4 ननाद च; B2 नरोत्तमं; D6.7.10.11 M3 भुजांतरे; D8 रराम ह (for ररास च). M7 ररास च स माल्यवान्.

9 T2 missing for 9 (cf. v.l. 6). T3 om. (hapl.) 9–10b.—a) D2 माल्यवान् (sic) (for माल्यवद्-).—b) D5 -समन्विता; D8 -कृतस्वरा.—c) Ś Ñ1 V1.3 D2.5.8.9.12 संलग्ना (for बभ्राज).—d) Ś Ñ1 V3 मेघस्येव.

10 T2 missing for 10 (cf. v.l. 6). T3 om. 10ab (cf. v.l. 9).—a) B1.4 अभि- (for एव). Ś1 Ñ2 V3 D9 M6 निष्कृष्य; Ś2.3 B D8 निष्क्रम्य; V1 D1–5 निःकृष्य; D12 निःक्रम्य (for चोत्कृष्य). Ñ1 एवमाकृष्य.—b) V1 D1.3.4 6.7 शक्तिधरः प्रभुः (D1.3.4. °रं प्रति).—c) V2 B3.4 स निर्दिश्य (for समुद्दिश्य).

11 T2 missing for 11 (cf. v.l. 6).—a) Ś D2.8.9 स्कंद (Ś2.3 घात्; D2 स्कंदात्) सृष्टा; D1.3.4 स्कंदमुक्ता; D12 दारुसृष्टा; G2 M3.7 स्कंदोत्कृष्टा.—b) Ś Ñ1 D2.5.8.9.12 T3 -नो (Ñ1 T3 -चो) दिता; V1 -विच्युता; T1 G2.3 M1.5 -निसृ (T1 °स्नु) ता.—c) Ś Ñ1 V1.3 D2.5.8.9.12 T3 याति (for प्रायान्). D6.7 M6.7 राक्षसप्राणान्.—d) T1 G1.3 M3 माहेंद्रीव (for महोल्केव).

12 T2 missing for 12 (cf. v.l. 6).—a) M7 तत्र (for तस्य).—b) Ś Ñ1 V1.3 D1.2.4.8–12 M5 Ck.t हारभार- ; D3 T3 महा (T3 तार) हार- ; Cg as in text (for हारभासा). Ś Ñ1 V1 D2.3.5.6.8.12 T3 -समन्विते; D1.4 -प्रभाविते; D9 -समर्पिते; M4 विभासिते (for [ अ ]वभासिते). Ñ2 V2 B M6 हारभाभिः (M6 मुक्ताहार-) प्रभासि (B2 °काशि) ते.—c) Ś Ñ2 V B2 D5.10 G1 M1.2 आपतद्.—d) Ś V1.3 D2.5.8.9.12 T3 गिरेः ; Ct as in text (for गिरि-). Ś V1.3 D5.8.12 क्रुद्ध; D2 कुड्य; D9 कुंज (for -कूट). Ñ V2 B -कूटे यथा.

13 T2 missing for 13 (cf. v.l. 6).—b) Ś2.3 प्रविष्टो; D5.9 प्रविश्य (for प्राविशद्). Ś1 D2.8.12 प्रविष्टोवि (D2 °श्यावि) रलं.—For 13ab, D1.3.4 subst.:

132* हतस्तु स तदा शक्त्या विह्वलोऽथावनिं गतः ।

[ D8 तया (for तदा). ]

—c) Ś D2.5.8.9.12 T3 मुहुर् (for पुनर्).—d) Ś V1.3 D2.5 8.9.12 यथा राम जलोक्षि (D2.9 °षि) तः.

14 T2 missing for 14 (cf. v.l. 6).—a) Ñ1 कार्षायनं (sic); D6.7.10.11 G2 कालायसं; M4 कृष्णायसं.—b) M5 घंटाकैर् (for कण्टकैर्). V2 B2 T1 G1 M3.4 वृतं; D4 श्रितं; M5 युतं (for चितम्). Ś Ñ1 V3 D2.5.8 9.12 T3 किंकिणीशतभूषितं (V3 °कृतभूषणं).—c) Ś1 D2.9 [ अ ]भ्याहनद्; Ñ1 [ अ ]भ्यद्रवद् ; V2 B न्यवधीद्; T3 [ अ ]भ्यर्दयद्.—d) Ś2 Ñ1 D5.9 अंतरं (for ऽन्तरे). V1 D5 T1 M3.6 भृशं.

G.7.8.16
B.7.8.16
L.7.7.15

तथैव रणरक्तस्तु मुष्टिना वासवानुजम् ।
ताडयित्वा धनुर्मात्रमपक्रान्तो निशाचरः ॥ १५
ततोऽम्बरे महाञ्शब्दः साधु साध्विति चोत्थितः ।
आहत्य राक्षसो विष्णुं गरुडं चाप्यताडयत् ॥ १६
वैनतेयस्ततः क्रुद्धः पक्षवातेन राक्षसम् ।
व्यपोहद्बलवान्वायुः शुष्कपर्णचयं यथा ॥ १७
द्विजेन्द्रपक्षवातेन द्रावितं दृश्य पूर्वजम् ।
सुमाली स्वबलैः सार्धं लङ्कामभिमुखो ययौ ॥ १८
पक्षवातबलोद्धूतो माल्यवानपि राक्षसः ।
स्वबलेन समागम्य ययौ लङ्कां ह्रिया वृतः ॥ १९
एवं ते राक्षसा राम हरिणा कमलेक्षण ।
बहुशः संयुगे भग्ना हतप्रवरनायकाः ॥ २०
अशक्नुवन्तस्ते विष्णुं प्रतियोद्धुं भयार्दिताः ।
त्यक्त्वा लङ्कां गता वस्तुं पातालं सहपत्नयः ॥ २१

**15** T2 missing for 15 (cf. v.l. 6). —$^{a}$) V2 B1.4 -शक्तस्; D3 -सक्तस्; D6 -युक्तस्; G3 M1.4 -रक्तं; M8 -मुक्तश्; Cg.k.t as in text (for -रक्तस्). T1 G2.3 M1–5.7–9 Cg.k च (for तु). Ś V3 D1.2.4.5.8.9.12 T3 तु रणे स (D2.5 T3 श)क्तो; V1 बाणं शक्तिं च; G1 तेन युक्तिश्च (for रणरक्तस्तु). —$^{b}$) Ś Ñ V B D1–5.8.9.12 सोरुणानुजं. —$^{c}$) Ś D2.8.12 विचिक्षिप्य (sic); V1 D9 विनि(V1 °निः)क्षिप्य (for ताडयित्वा). —$^{d}$) D3.4 व्य(D4 ह्य)पक्रांतो; D5 M6 अपाक्रांतो.

**16** T2 missing for 16 (cf. v.l. 6). —$^{a}$) B3 D1.3.4.6 M5 महाशब्दः(D1.4 °ब्दं); D6 महानादः. —$^{b}$) Ñ B2.4 D3 M6 [अ]थोत्थितः; B3 D9 T1 चोदितः (for चोत्थितः). D1.4 चकार रणदुर्मदः. —$^{c}$) Ś1 D8 स हत्वा; Ś2.3 D2.9.12 हत्वा च; V1 D3 आहत्वा; B4 आगत्य (for आहत्य). —$^{d}$) Ś Ñ V D1–5.8.9.12 T3 M6 यद्(T3 M6 सम)ताडयत्; T1 * *ताडयत् (damaged); G2 M5.10 चाभ्यताडयत्; M8 चाप्यपातयत्.

**17** T2 missing for 17 (cf. v.l. 6). —$^{a}$) D5.12 वैनतेयं(sic). Ñ B2–4 तदा; D5 अतः (for ततः). M6 क्रुद्धं. —M4 mostly damaged for $^{b}$. —$^{b}$) M6–8 -पातेन; Cg.k.t as in text (for -वातेन). —After 17$^{ab}$, T3 ins.:

133* निर्वाविमानमकरोत्तदा विष्णुश्च संयुगे ।
अभ्यधावत वेगेन ततो विष्णुर्निशाचरम् ।

—$^{c}$) Ś Ñ V1.3 B1.4 D1.2.4.5.8.9.12 उवाह; V2 B2 D3 व्युवाह; B3 स चिक्षेप(hypm.) (for व्यपोहद्). Ñ1 राक्षसान् (for बलवान्). Ś V1 D2.8.12 T3 वीरः; D9 घोरः (for वायुः). G2 M1 व्यपोथयद्ब(M1 °हत ब)लाद्वायुः; Ck.t as in text (for $^{c}$). —$^{d}$) B2 D1.4 G2 M4.7.9.10 शुष्कं (for शुष्क-). B4 तथा (for यथा). ❀ Cg.t : वायुः शुष्कपर्णं (Ct °र्णचयं) यथा व्यपोहति तथा पक्षवातेन राक्षसं व्यपौहत्(Ct °पोहयत्). ❀

**18** T2 missing for 18 (cf. v.l. 6). —$^{a}$) Ś D2.8.9.12 द्विजस्य; Ñ V1 B D1.3–5 द्विजेश- (for द्विजेन्द्र-). M1 -घातेन; M4.6.7 -पातेन (for -वातेन). —$^{b}$) G1 त्रासितं; M9 द्राविणं. G1 पश्य; M10 वीक्ष्य; Cg.k.t as in text (for दृश्य). M5 राक्षसं; M6 भ्रातरं (for पूर्वजम्). Ś V1.3 D2.5.8.9.12 T3 यदा(T3 यथा) क्षिप्तो निशाचरः; Ñ V2 B वीक्ष्य द्रावि(Ñ1 त्रासि; Ñ2 ताडि)तमग्रजं; D1.3.4 निर्धूतं वीक्ष्य(D3 दृश्य) भ्रातरं. —V3 om. 18$^{c}$–19$^{b}$. —$^{c}$) T1 G M1–5.8.9 प्रययौ (for सुमाली). —$^{d}$) B1 प्रतिमुखं; D4 स्वभिमुखो; D7 M6 अभिमुखं. T1 G M1–5.8.9 द्रुतं (for ययौ). Ñ1 लंकामेव विवेश ह. —For 18$^{cd}$, Ś V1 D2.5.8.9.12 T3 subst.:

134* प्रययौ स तदा लङ्कां स्वबलेन समावृतः ।

[D5 च (for स). Ś2.3 समाहतः.]

**19** T2 missing for 19 (cf. v.l. 6). V1.3 om. 19$^{ab}$ (for V3, cf. v.l. 18). —$^{a}$) B2 M4.6.7 पक्षपात-. Ś Ñ1 D2.8.9.12 T3 -भया(T3 -चया)द्धीतो; Ñ2 V2 B1.3.4 D3.6 M6 -समु(D3.6 -चलो; M6 -मुखो)द्धूतो; D5 -भयाद्धीरो (for -बलोद्धूतो). —$^{b}$) Ś D2.5.8.9.12 T3 स निशाचरः (for अपि राक्षसः). —$^{c}$) V2 B2 सुबलेन; B3 स्वबलेन च (hypm.); D1 स्वबलानि. Ś2.3 Ñ1 V1 D2.5.8.9.12 T3 समाविष्टो; V3 तथा युक्तो; B1 समागत्य; T1 स*** (damaged) (for समागम्य). —$^{d}$) Ś2.3 D2.8.9.12 M7 श्रिया वृतः; V3 तदा वृतः; D5 समन्वितः; T3 M8 ह्रियान्वितः; G1 समावृतः; L (ed.) श्रियावृतः (for ह्रिया वृतः).

**20** T2 missing for 20 (cf. v.l. 6). —$^{a}$) Ñ1 V1 तदा; V3 एते (for एवं). T1 G3 M3 तेन (for राम). —$^{b}$) Ś Ñ V B D1–5.8.9.12 T3 हरिणेक्षण (D8 °या [sic]); M5 कलुषेक्षणाः (for कमलेक्षण). —$^{c}$) Ñ V2 B1.3.4 G1.2 समरे. Ś2.3 D12 लग्ना (for भग्ना). —$^{d}$) D9 G1 बहु- (for हत-). Ñ1 B4 -प्रबल- (for -प्रवर-).

**21** T2 missing for 21 (cf. v.l. 6). —$^{a}$) Ñ2 B1.2 तं; D5 om. (subm.) (for ते). Ś D2.8.12 योद्धुं (for विष्णुं). —$^{b}$) Ñ1 बलान्वितं; V1.3 D6.7.9–11 T3 बलार्दिताः; D5 महाबल; G1.2 M4.5 भयान्विताः; M6.7 निशाचराः (for भयार्दिताः). Ś D2.8.12 विष्णुं प्रति बलान्विताः. —$^{c}$) D3 त्यक्तुं; M6 त्यज्य (for त्यक्त्वा). D6.7 M10 भयाद् (for गता). Ñ2 सर्वे (for वस्तुं). —$^{d}$) Ś V(V2 marg. also as in Ñ) D2.5.8.9.12 T3 तु(V1.2 T3 च; D5 ते) सयोषितः;

सुमालिनं समासाद्य राक्षसं रघुनन्दन ।
स्थिताः प्रख्यातवीर्यास्ते वंशे सालकटङ्कटे ॥ २२
ये त्वया निहतास्ते वै पौलस्त्या नाम राक्षसाः ।
सुमाली माल्यवान्माली ये च तेषां पुरःसराः ।
सर्वं एते महाभाग रावणाद्बलवत्तराः ॥ २३
न चान्यो रक्षसां हन्ता सुरेष्वपि पुरंजय ।
ऋते नारायणं देवं शङ्खचक्रगदाधरम् ॥ २४
भवान्नारायणो देवश्चतुर्बाहुः सनातनः ।
राक्षसान्हन्तुमुत्पन्नो अजेयः प्रभुरव्ययः ॥ २५

G. 7. 8. 27
B. 7. 8. 26
L. 7. 7. 26

इति श्रीरामायणे उत्तरकाण्डे अष्टमः सर्गः ॥ ८ ॥

Ñ B पन्नगालयं; D1.3.4 सह पत्निभिः ; M3 वै सदारकाः ; M6 ते सपत्नयः ; Cg.k.t as in text ( for सहपत्नयः ).

22 T2 missing for 22 ( cf. v.l. 6 ). —$^a$ ) M6 सुमालिं तु. M3 समागम्य ( for °साद्य ). Ś V3 D2.5.8.9.12 T3 सुमाली ( D5.12 T3 °लि )कुलमासाद्य. —$^b$ ) Ś V3 D2.5.8.9 T3 राक्षसो; B2 D12 G3 M6-9 राक्षसा. Ś2.3 नंदनास्थितः ; Ñ2 D1.4.6.7.10.11 T1 G1.3 M1-3.6.8-10 रघुसत्तम; D12 नंदनाः स्थिताः ( for रघुनन्दन ). —$^c$ ) Ñ V B D2.5.9 T3 स्थितः ( for स्थिताः ). Ś1 D8 -वीर्या ये; Ñ1 V2 D1-5.9 -वीर्याख्या ( Ñ1 V2 D5 °ख्यो; D2.9 °ख्यो ); Ñ2 V1.3 B T3 -वीर्योयं ( T3 °सौ ) ; G ( ed.) -वीर्यो वै ( for -वीर्यास्ते ). Ś2.3 D12 प्रख्यातवीर्या ये वंशे. —$^d$ ) Ś2.3 D12 स्थिताः ( for वंशे ). Ś2.3 D4 G2 M4.8.9 -कटंकटाः . Ñ V2.3 B वंशः शा( Ñ1 B2 सा )लकटंकटः( V2.3 °टैः ). ❀ Cg : सालकटङ्कटे सालकटङ्कटा माल्यवदादीनां पितामही विद्युत्केशपत्नी तस्याः सम्बन्धी सालकटङ्कटः तस्मिन्वंशे प्रख्यातवीर्याः । वृद्धाच्छाभाव आर्षः । ; so also Ck.t. ❀ —After 22, Ś Ñ V1.3 D1-3.5.8.9.12 T3 ins. :

135* ये वै ते राक्षसा राम एते शालकटङ्कटाः ।

[ Note hiatus between the two halves. Ñ1 एते ते; Ñ2 कथिता; V1.3 यत्र ते; D1.3.5 T3 य एते; D2 ये चैते ( for ये वै ते ). D5 ते वै; T3 सर्वे ( for एते ). V1.3 -कटंकटे. ].

23 T2 missing for 23 ( cf. v.l. 6 ). —$^a$ ) D6.7 [ अ ]भिहतास्. Ñ1 D5 राम; V D7.10.11 ते तु; D6 तेपि; M6 ये वै ( for ते वै ). —$^b$ ) B1.3.4 राम राक्षसाः ; D5 राक्षसेश्वराः . —$^d$ ) B3 ते; D1.4 त्वं ( sic ) ( for ये ). T1 एषां चैव ( with hiatus ) ; G1.3 M3 ये चैषां च ( for ये च तेषां ). —D1.4 om. ( hapl. ? ) 23$^{ef}$. —$^e$ ) Ś Ñ V B D2.3.5.8.9.12 T3 ह्येते; K ( ed. ) तेभ्यो ( for एते ). Ś Ñ V B2 D2.5-12 M1.4.6.7 महाभागा; T1 G3 M3.8 °वीर्या; M5 °बाहो ( for °भाग ). —$^f$ ) V2 बलिनां ( for रावणाद् ).

24 T2 missing for 24 ( cf. v.l. 6 ). —$^a$ ) T1 G3 M3 नान्योस्ति; Cg.k.t as in text ( for न चान्यो ). Ñ1 V3 D6.7.10.11 T3 G M1.2.4.5.8-10 Cg.k.t राक्षसान् ( for रक्षसां ). M3 हंतुं. —V3 illeg. for $^b$. —$^b$ ) V2 B2-4 [ अ ]स्ति; D1.3.4 M6 [ अ ]रि- ( for [ अ ]पि ). B1 शूरोप्यस्ति. Ñ1 D8.9.12 पुरंजयः ; Ñ2 V2 B रिपुंजय( V2 B2.3 °यः ) ; V1 D1.4 T3 पुरंदरः( D1 °र ) ( for पुरंजय ). D6.7.10.11 T1 G M1.2.4.5.8-10 सुरारीन्देवकंटकान् ; M3 सुरारिबलसूदनं. —$^c$ ) Ś Ñ V B D1-5.8.9.12 T3 M6.7 ऋते नारायणाद्देवाच् ; Ck.t as in text ( for $^c$ ). ❀ Ck : ऋते योगेऽपि पञ्चम्यभाव आर्षः . ❀ —$^d$ ) Ñ V2.3 B1.3 D1.3.4 M6 चक्रशार्ङ्ग- ( for शङ्खचक्र- ). Ś Ñ V B D1-5.8.9.12 T3 M6.7 -गदाधरात् ; Ck.t as in text ( for -गदाधरम् ).

25 T2 missing for 25 ( cf. v.l. 6 ). —$^a$ ) Ś3 भगवान् ( hypm. ) ; D1 त्वं तु; D4 तुभ्यं( sic ) ( for भवान् ). Ś V3 D3.8.9.12 नाम; D1.2.4.5 T3 राम; G2 देव ( for देवश् ). —$^b$ ) Ñ2 V2.3 B -मूर्तिः D1.3.4 -व्यूहः ; D5 -वक्त्रः ; M6 -भागः ( for -बाहुः ). D4 सनातन. Ś D2.8.9.12 शंखचक्रगदाधरः . —Note hiatus between $^c$ and $^d$. —$^c$ ) D5 रक्षसां ( for राक्षसान् ). —$^d$ ) Ś1 Ñ V2.3 B D1.2.4-6.8.9 T1.3 G2.3 M1-4.6-10 ह्यजेयः ( to avoid hiatus ) ; Ś2.3 D12 त्वजेयश् ( to avoid hiatus ) ; D7.10.11 G1 M5 ह्यजयः ( to avoid hiatus ). Ś Ñ1 V3 D2.5.8.9.12 T3 च वरप्रदः ( for प्रभुरव्ययः ). V1 ( to avoid hiatus ) ह्यजोमरवरप्रदः . —After 25, D1.4 ins. :

136* अनादिनिधनो राम सर्वात्मा प्रभुरव्ययः ।

—Thereafter D1.4 cont. ; Ś Ñ V B1-3 D2.3.5-8.10-12 T3 ins. after 25 ; D9 cont. after 138* :

137* नष्टधर्मव्यवस्थाता काले काले प्रजाकरः ।
नित्योद्यतो दस्युवधे शरणागतवत्सलः ।

[ ( l. 1 ) B1 न हि ( for नष्ट- ). D8 नष्टे धर्मे. Ñ1 D7.10.11 -व्यवस्थानां; D1.4 -व्यवस्थे च ( for -व्यवस्थाता ). Ś1 नष्टधर्मेष्यवस्थाता; Ś2.3 D12 नष्टे धर्मे प्रजास्थाता; D2 नष्टधर्मस्य च स्थाता ( for the prior half ). T3 प्रजां गतः ( for प्रजाकरः ). — ( l. 2 ) Ś Ñ2 D1-4.8.9.12 नित्योदितो; V1 नियोज्यते; B3 नित्योद्युक्तो; D7.10.11 उत्पद्यते; T3 सतोद्यतो( sic ). V3 शत्रुजये ( for दस्युवधे ). ]

—Then D1.4 further cont.; while Ñ V2 B1-3 D6.7.10.11 cont. after 137* ; whereas B4 D9 ins. after 25 :

# ९

G. 7. 9. 1
B. 7. 9. 1
L. 7. 8. 1

कस्यचित्त्वथ कालस्य सुमाली नाम राक्षसः ।
रसातलान्मर्त्यलोकं सर्वं वै विचचार ह ॥ १
नीलजीमूतसंकाशस्तप्तकाञ्चनकुण्डलः ।
कन्यां दुहितरं गृह्य विना पद्ममिव श्रियम् ।
अथापश्यत्स गच्छन्तं पुष्पकेण धनेश्वरम् ॥ २
तं दृष्ट्वामरसंकाशं गच्छन्तं पावकोपमम् ।
अथाब्रवीत्सुतां रक्षः कैकसीं नाम नामतः ॥ ३

---

138* एषा मया तव नराधिप राक्षसाना-
मुत्पत्तिरद्य कथिता सकला यथावत् ।
भूयो निबोध रघुसत्तम रावणस्य
जन्मप्रभावमतुलं ससुतस्य सर्वम् ।
चिरात्सुमाली व्यचरद्रसातले
स राक्षसो विष्णुभयार्दितस्तदा ।
पुत्रैश्च पौत्रैश्च समन्वितो बली
ततस्तु लङ्कामवसद्धनेश्वरः ।

[ (l. 1) $B_1$ [अ]भवत् * * (for मया तव). $D_{1.4}$ एषामपातक (for एषा मया तव).—(l. 2) $D_1$ एव (for अद्य). $D_{6.7}$ सकला कथिता (by transp.). $D_{1.4}$ मया ते (for यथावत्).—(l. 3) $\tilde{N}_1$ च रघूत्तम; $B_{1.3.4}$ रघुनंदन (for रघुसत्तम).—(l. 4) $D_{1.4.9}$ ननु($D_9$ खलु) तस्य (for ससुतस्य). $\tilde{N}_1$ सार्धं (for सर्वम्).—(l. 5) $\tilde{N}_2$ $D_{6.7.10.11}$ रसातलं.—(l. 6) $B_2$ तथा (for तदा).—(l. 7) $B_1$ योधैश् (for पौत्रैश्). $V_2$ B $D_9$ [ऽ]भवत्; $D_{1.4}$ [ऽ]वसत् (for बली).—(l. 8) $V_2$ B $D_9$ अविशद् (for अवसद्). $D_{1.4}$ स तत्र लंकामपविध्य शूरः. ]

Colophon: $T_2$ missing (cf. v.l. 6).—*Kāṇḍa name*: $Ś_1$ $D_{2.9}$ om.—*Sarga name*: Ś $V_{1.3}$ $D_{1-4.8.9.12}$ राक्षसप्रवासः; Ñ $V_2$ B G (ed.) प्रहे(G [ed.] °हु)त्याख्यानं; $D_5$ राक्षसवधः.—*Sarga no.* (figures, words or both): Ś $\tilde{N}_1$ $V_{2.3}$ $B_{1.2}$ $D_{2.12}$ om.; $V_1$ 6; $D_{8.9}$ 7.—After colophon, $D_2$ concludes with राम; G $M_{1.5.8}$ with श्रीरामाय नमः; $M_{10}$ with श्रीरामचन्द्राय नमः.

## 9

☞ $T_4$ missing up to st. 15 (cf. v.l. 7. 1). $T_2$ missing up to मान in $6^b$ (cf. v.l. 7. 8. 6). $D_{12}$ begins with ॐ.

1 $^a$) $D_6$ $T_1$ G $M_{1-5.7.9.10}$ Ck केनचित्त्वथ कालेन; Cg as in text (for $^a$).—$^b$) $D_{12}$ माल्यवान्; $G_1$ स माली (for सुमाली). $\tilde{N}_1$ B स तु (for नाम). $D_{1.3.4}$ स निशाचरः (for नाम राक्षसः).—$^c$) $D_5$ मृत्यु- (for मर्त्य-).—$^d$) $D_{1.3.4}$ सर्वशो (for सर्वं वै). $T_1$ $G_{1.3}$ $M_{2-4.7-9}$ सं-; $M_6$ प्र- (for वि-). Ś $V_1$ $D_{2.5.8.9.12}$ $T_3$ चचार पिशिताशनः.—After 1, $D_{1.3.4}$ read $2^e$–$3^b$ (including star passages).

2 $T_2$ missing for 2 (cf. v.l. 1). $Ś_1$ om. $2^{ab}$. $D_{6.7.10.11}$ repeat $2^{ab}$ (followed by 139* [r.]) before $3^{cd}$.—$^b$) $\tilde{N}_2$ $B_3$ $D_5$ -भूषणः (for -कुण्डलः).—$^c$) Ś $V_{1.3}$ $D_{2.5.8.9.12}$ $T_3$ कन्यां गृहीत्वा तनयां; Ñ $V_2$ B सुतामादाय कल्याणीं($\tilde{N}_1$ $B_{3.4}$ °न्यां तु); $D_{1.3.4}$ अपश्यत्तनयां तत्र.—$^d$) Ś $V_{1.3}$ $D_{2.5.8.9.12}$ $M_3$ पद्म($D_5$ पुष्प)हीनाम्; Cg.k.t as in text (for विना पद्मम्).—After $2^{cd}$, Ñ $V_{2.3}$ B $D_{6.7.10.11}$ $T_1$ G $M_{1-5.7-10}$ ins., $D_{6.7.10.11}$ repeating it after $2^{ab}$ (r.); $D_{1.3.4}$ ins. after $2^{ab}$; $M_6$ ins. after 2:

139* राक्षसेन्द्रः स तु तदा विचरन्वै महीतलम् ।

[ $M_6$ ददर्शाथ (for स तु तदा). $T_1$ $G_3$ विचरंतं; $G_1$ व्यचरत्तं. Ñ $V_{2.3}$ B $D_{7.10.11}$ $M_1$ ($D_{7.10.11}$ first time) महीतले; $M_9$ महावने (for महीतलम्). $D_{1.3.4.6.7.10.11}$ ($D_{6.7.10.11}$ second time) चिंतयन्सुमहाम($D_6$ °ग)तिः; $M_6$ विचरंतं महाबलं (for the post. half). ]

—After $2^{cd}$, $D_3$ ins. l. 2 only of 143*.—$D_{1.3.4}$ read $2^e$–$3^b$ (including star passages) after 1. $V_3$ repeats $2^{ef}$ (followed by l. 2 of 143*) before $3^{cd}$.—$^e$) $D_{6.7.10.11}$ तदा (for अथ). $M_3$ हि (for स). $M_1$ [अ]पश्यत. Ś $V_{1.3}$ (second time) $D_{2.5.8.9.12}$ $T_3$ सोपश्यद्वित्तदं($V_3$ ° * * *; $D_9$ °द्धनदं; $T_3$ °द्वित्तपं) देवं; Ñ $V_{2.3}$ (first time) B गच्छंतं गगनेपश्यत्; $M_6$ कस्यचित्त्वथ कालस्य (=$1^a$).—$^f$) Ś $V_1$ $D_{2.5.8.9.12}$ $T_3$ महौजसं; $V_3$ (second time) महायशाः (for धनेश्वरम्). $B_2$ पुष्पके धनदेश्वरं.—After 2, $\tilde{N}_2$ $V_2$ $B_{1.3.4}$ ins.; while $B_2$ ins. after $3^{ab}$:

140* पितरं द्रष्टुमाकाशे मातरं च निशाचरः ।

[ $B_1$ द्रष्टुकामः स (for द्रष्टुमाकाशे) and रघूद्वह (for निशाचरः).]

—Thereafter $B_2$ cont. 142* and 143*.

—After 2, $D_{3.5.7.10.11}$ ins. 141*.

3 $T_2$ missing for 3 (cf. v.l. 1). $D_{1.3.4}$ read $2^e$–$3^b$ (including star passages) after 1.—$^a$) $\tilde{N}_2$ $B_2$ [अ]नल-; $V_3$ सर्व- (sic); $B_1$ $D_{5-7}$ सुर- (for [अ]मर-). $M_6$ तं दृष्ट्वाचिंतयद्राम.—$^b$) Ñ $V_{2.3}$ B विमाने; $M_3$ स्वच्छं तं; Ck स्वच्छंदं (for गच्छन्तं). K (ed.) तपनोपमं. $D_{1.3.4}$ पावकोपमतेजसं.—For $3^{ab}$, Ś $V_1$ $D_{2.8.9.12}$ $T_3$ subst.; while $D_{3.5.7.10.11}$ ins. after 2; whereas $M_3$ ins. after $3^{ab}$:

141* गच्छन्तं पितरं द्रष्टुं पुलस्त्यतनयं द्विजम् ।

[ $Ś_{2.3}$ दृष्ट्वा. $D_{12}$ $M_3$ पौलस्त्य-. $D_{7.10.11}$ विभुं (for द्विजम्). ]

—Thereafter $D_9$ $T_3$ $M_3$ cont.; while Ñ $V_{2.3}$ $B_{1.3.4}$

पुत्रि प्रदानकालोऽयं यौवनं तेऽतिवर्तते ।
त्वत्कृते च वयं सर्वे यन्त्रिता धर्मबुद्धयः ॥ ४
त्वं हि सर्वगुणोपेता श्रीः सपद्मेव पुत्रिके ।
प्रत्याख्यानाच्च भीतैस्त्वं न वरैः प्रतिगृह्यसे ॥ ५

कन्यापितृत्वं दुःखं हि सर्वेषां मानकाङ्क्षिणाम् ।
न ज्ञायते च कः कन्यां वरयेदिति पुत्रिके ॥ ६
मातुः कुलं पितृकुलं यत्र चैव प्रदीयते ।
कुलत्रयं सदा कन्या संशये स्थाप्य तिष्ठति ॥ ७

G. 7.9.11
B. 7.9.11
L. 7.8.8

D1.3–7.10.11 T1 G M1.2.4–10 ins. after $3^{ab}$; B2 ins. 140* after $3^{ab}$ and then cont:

142* रसातलं प्रविष्टः स मर्त्यलोकात्सविस्मयः ।
हितार्थं चिन्तयामास राक्षसानां महामतिः ।
किं कृतं श्रेय इत्येवं वर्धेमहि कथं वयम् ।

[Ñ V2.3 B D9 om. l. 1. —(l. 1) D6 -तल-. D1.3–7.10.11 M6 सन्; T1 G1.3 [ऽ]सौ; T3 वै; M1.3 [ऽ]थ (for स). T3 मर्त्यलोकं. D3 M6 सविस्मयं. ❀ Ct: तं दृष्ट्वा पुना रसातलं प्रविष्ट इत्यर्थः। 'रसातलात्प्रविष्टः सन्मर्त्यलोकम्' इति पाठे उक्तानुवाद एवायम्. ❀ —(l. 2) D10.11 Ct इत्येवं; M9 पिता तच् (for हितार्थं). Ñ V2.3 B D9 निशाचरः; M1 महाद्युतिः (for महामतिः). —(l. 3) D5–7.10.11 G3 M2.9.10 कृत्वा; T1 M1.3.8 कृत्यं (for कृतं). D1.3–5.7 M6 इत्येव. Ñ V2.3 B D9 किं नु (D9 तु) कृत्वा भवेच्छ्रेयो (for the prior half). D1.3.4.7 वर्धामश्च; G1 वर्तेमहि. M5 यथा (for कथं).]

—Thereafter Ñ V2 B D5.9 T3 cont.; while Ś2.3 V1 D2.8.12 cont. l. 5 only after 141*; V3 cont. l. 1 after 142* and ins. l. 2 after $2^{ef}$ (r.); D3 ins l. 2 only after $2^{cd}$:

143* सुतां विश्रवसे दद्यां राक्षसीं वरवर्णिनीम् ।
सोऽथ राक्षसशार्दूलः शार्दूलसमविक्रमः ।

[D5 T3 om. l. 1. —(l. 1) G (ed.) वैश्रवणे. —Ñ B2–4 om. l. 2. —(l. 2) V1 T3 [ऽ]थ; V2 B1 च; G (ed.) तु (for ऽथ). D3 शार्दूलसंकाशः (for राक्षसशार्दूलः). Ś2.3 D2.8.12 पाकशासन- (for शार्दूलसम-).]

—Before $3^{cd}$, V3 repeats $2^{ef}$ (followed by l. 2 of 143*; while D6.7.10.11 repeat $2^{ab}$ (followed by 139* [r.]) before $3^{cd}$. —$^{c}$) D1.3.4 ताम् (for अथ). Ñ1 तां तु; Ñ2 V2 B1.3.4 तत्र; B2 भद्रां (for रक्षः). Ś1 (with hiatus) सोथ उवाच तनयां; Ś2.3 V1.3 D2.5.8.9.12 T3 उवाच तनयां तत्र. —$^{d}$) Ś1 V3 D6.8 केकसीं (D6 °शीं); Ñ B3.4 नैकसीं (B3.4 °शीं); V1.2 D1.4.5 कैकशीं; B2 निकसां (also m. मालिनीं) (for कैकसीं).

4 T2 missing for 4 (cf. v.l. 1). —$^{a}$) D10 G1 पुत्री- (for पुत्रि). Ñ V B D1.3–5 T3 ते (for [ऽ]यं). Ś D2.8.9.12 पुत्रिके दानकालोयं. —$^{b}$) Ś Ñ2 V1.2 B D2.3.8.9.12 T3 चाति-; Ñ1 V3 D6.7.10.11 व्यति-; D5 चाभि-; G2 ते नि-; M6 तेभि- (for तेऽति-). —After $4^{ab}$, Ś V1 D2.5.8.9.12 T3 read 5 ($^{ab}$ and $^{cd}$ transp.); while B3 D6.7.10.11 read $5^{cd}$. —B1 transp. $4^{cd}$ (followed by 144*) and 5. —$^{c}$) Ñ V B1 D9 G3 M10 तत्; D1.4 यत्; Cg.t as in text (for त्वत्-). B3 हि (for च). —$^{d}$) B4 मंत्रिता. D7 मंत्र- (for धर्म-). ❀ Cv: त्वत्कृते च वयं सर्वे यन्त्रिता धर्मबुद्धय इति। त्वत्कृते तव विशिष्टवरपरिग्रहार्थं यन्त्रिता नि*** धार्मिकाश्च वयं वर्तामहे. ❀ —After 4, Ñ V2 B ins.:

144* त्वयि पुत्रि समासक्तः कामः संपत्स्यतेऽचिरात् ।

[V2 B1 प्रति- (for पुत्रि). Ñ1 B2 समास(Ñ1 °यु)क्तं. Ñ1 B2 कर्म; B3 कामं (for कामः). V2 B2 संपद्यते.]

5 T2 missing for 5 (cf. v.l. 1). Ś V1 D2.5.8.9.12 T3 read 5 ($^{ab}$ and $^{cd}$ transp.) after $4^{ab}$. B1 transp. $4^{cd}$ (followed by 144*) and 5. —$^{a}$) Ś D2.8.9.12 च (for हि). —$^{b}$) Ñ2 V1.2 त्वं (V2 सा) पद्मेव; V3 D6.7.10.11 साक्षादिव; B4 सतामेव (for सपद्मेव). Ñ2 V2 B1.3.4 नः कुले (for पुत्रिके). B2 सपद्मेव च नः कुले. —Ñ1 om. $5^{cd}$. B3 D6.7.10.11 read $5^{cd}$ after $4^{ab}$. —$^{c}$) Ś D2.5.8.9.12 M6 प्रत्याख्यातैश्च (D5.12 M6 °ता च); Cg.k.t as in text (for प्रत्याख्यानाच्च). Ś D2.5.8.12 भीरु त्वं; V3 भीतैश्च; D9 नीचैश्च (for भीतैस्त्वं). —$^{d}$) Ñ2 V2 B1.2 [अ]सुरैर्; B3.4 [अ]मरैः; D6.7 [अ]परैः; M4.6 परैः (for वरैः). Ś2.3 प्रतिगृह्यते; D6.10.11 परिगृह्यसे (D6 °ते); Ñ2 V2 B G (ed.) त्रि(V2 B3 श्रि; G [ed.] हि)यसे शुभे. ❀ Ct: प्रत्याख्यानाद्भीतैः प्रत्याख्यानशङ्कया भीतैर्न वरैः प्रतिगृह्यसे याच्यसे, यद्वा प्रत्याख्यानभीतैरस्माभिस्त्वं वरैर्न परि(N.S.P. [ed.] °रैर्न प्रति)गृह्यसे प्रतिग्रहं न कार्यसे. ❀

6 T2 missing up to मान in $6^{b}$ (cf. v.l. 1). Ñ2 B2 transp. $6^{ab}$ and $6^{cd}$. —$^{a}$) M9 दुःखानि (for दुःखं हि). D1.3.4 अस्माकं त्वत्कृते दुःखं. —$^{b}$) V1 एव मानिनां; T1 वरकांक्षिणां. —V3 om. $6^{cd}$. —$^{c}$) B2 दीयते. Ś D2.8 M7 वरं पुत्रि(M7 कन्यां) (sic); Ñ V1.2 B D5.9.12 T3 वरः पुत्रि; D1.4 तु कं कन्या; D7 G1.2 M6.10 च यः(G2 M10 वरः) कन्यां (for च कः कन्यां). —Ś1 om. (hapl.) $6^{d}$–$8^{c}$. —$^{d}$) D6.7.10.11 M1 कन्यके (for पुत्रिके). Ś2.3 Ñ V1.2 B D2.5.8.9.12 कन्यार्थे(Ñ1 °थां; Ñ2 V1.2 B D5 °र्थं) चारुदर्शने (Ñ2 B1 D12 °नः; B3.4 °नं); T3 कः कन्यां वरयेदिति.

7 Ś1 om. 7 (cf. v.l. 6). —$^{a}$) B4 मातृकुलं. Ñ2 पितुश्चैव; T2 om. (hapl.) (for पितृकुलं). D5 पितुः कुलं कुलं मातुर्. —$^{b}$) B3 कन्या; D4 चैकं (for चैव). Ñ2 V B2 D6.10.11 T1 M6 च (for प्र-). G1 स्वपत्युः कुलमेव च. —$^{c}$) D2.11 G2 यदा; T1.2 G1.3 हि सा; M1 च सा (for सदा). Ñ V D1.3.11 कन्यां; B3 पुण्या (for कन्या). —$^{d}$)

G. 7. 9. 12 B. 7. 9. 12 L. 7. 8. 9

सा त्वं मुनिवरश्रेष्ठं प्रजापतिकुलोद्भवम् ।
गच्छ विश्रवसं पुत्रि पौलस्त्यं वरय स्वयम् ॥ ८
ईदृशास्ते भविष्यन्ति पुत्राः पुत्रि न संशयः ।
तेजसा भास्करसमा यादृशोऽयं धनेश्वरः ॥ ९
एतस्मिन्नन्तरे राम पुलस्त्यतनयो द्विजः ।
अग्निहोत्रमुपातिष्ठच्चतुर्थ इव पावकः ॥ १०
सा तु तां दारुणां वेलामचिन्त्य पितृगौरवात् ।
उपसृत्याग्रतस्तस्य चरणाधोमुखी स्थिता ॥ ११
स तु तां वीक्ष्य सुश्रोणीं पूर्णचन्द्रनिभाननाम् ।
अब्रवीत्परमोदारो दीप्यमान इवौजसा ॥ १२
भद्रे कस्यासि दुहिता कुतो वा त्वमिहागता ।
किं कार्यं कस्य वा हेतोस्तत्त्वतो ब्रूहि शोभने ॥ १३
एवमुक्ता तु सा कन्या कृताञ्जलिरथाब्रवीत् ।
आत्मप्रभावेन मुने ज्ञातुमर्हसि मे मतम् ॥ १४

---

D1.3.4 गच्छति ( for तिष्ठति ). Ś2.3 Ñ1 V1.3 D2.5.8.9.12 T3 कृत्वा तिष्ठति संशये; Ñ2 V2 B संशयस्थं करोति हि.

8 Ś1 om. 8[abc] (cf. v.l. 6). —[a]) Ś2.3 Ñ V B2–4 D2.5–9.12 T3 M1.3 मुनिवरं. Ś2.3 Ñ1 V1 D2.5.8.9.12 T3 पुत्रि; B3 ज्येष्ठं ( for -श्रेष्ठं ). —[b]) Ś2.3 D2.5.8.12 -कुलोद्वहं. —[c]) Ñ1 D6.7.10.11 Ct भज ( for गच्छ ). Ñ1 V1 T3 शीघ्रं ( for पुत्रि ). —[d]) V2 सुतं ( for स्वयम् ).

9 [a]) D6.7 तादृशास्. —[b]) D5 पुत्र- ( for पुत्राः ). M5 संशयं. Ś Ñ V1.3 D2.5.8.9.12 T3 पौत्रा महौजसः ( Ñ1 भविष्यति [ sic ] ) ( for पुत्रि न संशयः ). —[c]) Ñ V2 B D1.3.4 M6 -[ उ ]दग्राः; D6.7.10.11 T1.2 G2.3 M1.2.4.5.7.9.10 -समो; G ( ed. ) -[ उ ]दर्या ( for -समा ). Ś V1.3 D2.5.8.9.12 T3 श्रिया परमया जुष्टा ( Ś2.3 D12 T3 °ष्टो ). —[d]) Ś D1–4.8.9.12 [ ऽ ]सौ ( for ऽयं ). —After 9, Ñ V2.3 B D1.3.4.6.7.10.11 T1 G M ins.; Ś V1 D2.5.8.9.12 T3 ins. l. 2 only after 9; T2 ins. l. 1 after 11[ab] and l. 2 after 9:

145* सा तु तद्वचनं श्रुत्वा कन्यका पितृगौरवात् ।
तत्रोपगम्य सा तस्थौ विश्रवा यत्र तप्यते ।

[ D3 transp. l. 1 and 2 and repeats l. 2 after l. 1 ( transp. ). —( l. 1 ) M8 [ अ ]पि ( for तु ). D1.3.4 पितुरीरितं ( for पितृगौरवात् ). —B1 reads l. 2 in marg. D4 repeats consecutively from l. 2 up to 10[b]. —( l. 2 ) Ś Ñ V B D1–5.8.9.12 M6 ( D3.4 both times ) गत्वाश्रमपदं; D6.7.10.11 तत्र गत्वा च सा; T2 गत्वा विश्रवसं; T3 गत्वोत्तमपदं; M1.5 K ( ed. ) तत्रोपा( M1 °त्राभि; M5 °तोप )गम्य सा ( for तत्रोपगम्य सा ). Ś V1 D2.3( second time ).8.9.12 T2.3 तिष्ठ; D5 तत्र ( for तस्थौ ). T2.3 ते पतिः ( for तप्यते ). Ñ V2 B य( Ñ2 त )त्रातप्यत विश्रवाः; D1.3( first time ).4 ( both times ) मुनिर्यत्र स विश्रवाः; G ( ed. ) यत्रास्ते स तु विश्रवाः ( for the post. half ). ]

10 D4 repeats 10[ab] (cf. v.l. 145*). —[b]) T2 महान् ( for द्विजः ). —[c]) D5 उपाविष्टश् ( for उपातिष्ठच् ). ❀ Ck: उपातिष्ठत् उपातिष्ठतेति यावत. ❀

11 [a]) G1 तदा ( for तु तां ). Ś V1.3 D2.5–8.10–12 T2.3 Cg अविचिंत्य तु सा कालं ( D6 तं कालं; D7 कालं सा; D10.11 तां वेलां ); Ñ V2 B सा तु ( B3 °पि ) तं दारुणं कालम्; D9 अबुद्ध्वा तु सा तत्कालं. —[b]) Ś V1.3 D2.5–9.12 T2.3 दारुणं; Ñ V2 B अबुद्ध्वा; D10.11 दारुणां; T1 M5 विचिंत्य; G2 अचिरं ( for अचिन्त्य ). ❀ Ck: दारुणां तां वेलामिति। प्रदोषकालमित्यर्थः; so also Ct. ❀ —After 11[ab], T2 ins. l. 1 of 145*. —[c]) V1 उपस्थिता; M5 उपसृता; Ck.t as in text ( for उपसृत्य ). Ś1 D8 [ आ ]गता ( for [ अ ]ग्रतस् ). —[d]) Ś D1–5.8.9.12 कन्यका; Ñ2 B चरणे; D6.7 M6 स्थिता सा; Cg as in text ( for चरण- ). D5 -[ अ ]भिमुखी. B2 D6.7 M6 तदा; Ct as in text ( for स्थिता ). ❀ Cg: चरणाधोमुखी चरणसमीपाधोमुखी।; Ct: अङ्गुष्ठाग्रेण मुहुर्भूमिं विलिखन्त्यधोमुखी स्थितेति संबन्धः. ❀ —After 11, D1.3.4.6.7.10.11 S ins.:

146* विलिखन्ती मुहुर्भूमिमङ्गुष्ठाग्रेण भामिनी ।

[ D1.3.4 आलिखंती. T3 मुदा ( for मुहुर् ). ]

12 [a]) K ( ed. ) प्रेक्ष्य ( for वीक्ष्य ). Ñ2 V2 B धर्मात्मा ( for सुश्रोणीं ). —[c]) D5 T3 -[ उ ]दारं; G2 M4.5.7 -प्रीतो ( for -[ उ ]दारो ). —[d]) V1.2 D6.7.10.11 T3 G2 M2.4.7–10 दीप्यमानां ( for दीप्यमान ). V2 D6.7.10.11 स्वतेजसा; M1 इव श्रिया ( for इवौजसा ). —After 12, D1.3.4 ins.:

147* कस्य त्वं चारुसर्वाङ्गि संसितायतलोचने ।

[ D3 शंस च ( for संसित- ). ]

13 [a]) D1–4 कस्यापि; G1 कन्यासि ( for कस्यासि ). D5 कस्यासि दुहिता भद्रे. —[b]) T1.2 G1.3 नु ( for वा ). —[c]) D3 किंकार्यं. —[d]) Ś Ñ V1.3 B1–3 D5.8.9.12 T3 तच्छुभे; V2 ( marg. also as in Ś and also as in text ) सुव्रता; B4 पृच्छते; M6 मे शुभे ( for शोभने ). D2 त्वत्तो ब्रूहि ततः शुभे.

14 V2 om. 14[ab]. G2 damaged from कन्या in [a] up to ब्र in [b]. —[a]) Ś D2.8.9.12 च ( for तु ). —[b]) G2 M10 अभाषत ( for [ अ ]थाब्रवीत् ). —B4 om. 14[cd]. Ñ1 repeats 14[cd] and 15[cd] after 15. Ñ2 V2 B1–3 read 14[cd] after 15. —[c]) Ñ1( second time ).2 V2 B1–3 तपः- ( for आत्म- ). Ś1 Ñ2 V B D4.6.10.11 -प्रभावेण; D5 -स्व° ( for -प्रभावेन ). —[d]) D9 दातुम् ( for ज्ञातुम् ). Ñ1 मते; D9 मतिं ( for मतम् ). Ñ1( second time ).2 V2 B1–3 यदर्थमहमागता.

किं तु विद्धि हि मां ब्रह्मञ्शासनात्पितुरागताम् ।
कैकसी नाम नाम्नाहं शेषं त्वं ज्ञातुमर्हसि ॥ १५
स तु गत्वा मुनिर्ध्यानं वाक्यमेतदुवाच ह ।
विज्ञातं ते मया भद्रे कारणं यन्मनोगतम् ॥ १६
दारुणायां तु वेलायां यस्मात्त्वं मामुपस्थिता ।
शृणु तस्मात्सुतान्भद्रे यादृशाञ्जनयिष्यसि ॥ १७
दारुणान्दारुणाकारान्दारुणाभिजनप्रियान् ।
प्रसविष्यसि सुश्रोणि राक्षसान्क्रूरकर्मणः ॥ १८
सा तु तद्वचनं श्रुत्वा प्रणिपत्याब्रवीद्वचः ।
भगवन्नेदृशाः पुत्रास्त्वत्तोऽर्हा ब्रह्मयोनितः ॥ १९
अथाब्रवीन्मुनिस्तत्र पश्चिमो यस्तवात्मजः ।
मम वंशानुरूपश्च धर्मात्मा च भविष्यति ॥ २० G. 7. 9. 27 B. 7. 9. 27 L. 7. 8. 21

**15** $^{a}$) V1 च (for हि). D5 जानीहि (for विद्धि हि). Ñ V2.3 B राक्षसीं विद्धि मां ब्रह्मन्; D1.3.4.6.7.10.11 M6.7 किं तु मां विद्धि ब्रह्मर्षे. —$^{c}$) Ś2.3 V1 D2.5.8.9.12 G2 M7 कै(D8 के)कसीं(D5 °शीं); Ñ1 (first time) नैकसी; Ñ1 (second time) नैकशी; D1.4 कैकशी (for कैकसी). Ñ2 V2 B नैकसीमि(B4 °षीरि)ति (for कैकसी नाम). Ś2.3 D12 च; Ñ2 V2 B वै (for [अ]हं). Ś1 D2.8.9 नामोक्तां; Ñ1 (first time) V1 नामाहं; D1.3.4 तन्नाम्ना (for नाम्नाहं). V3 नामतः प्रोक्तां (for नाम नाम्नाहं). —$^{d}$) Ś Ñ1 (second time) V1.3 D1.2.5.8.9.12 श्रुतां (Ś2 V1 श्रुत्वा; D1 तथा) पुण्यो(D1.5.9 °ष्पो)त्कटेति च (Ś1 Ñ1 V3 हि [sic] च; D5 °ति वै); T3 श्रुता पुष्पोत्कटानुजा. —After 15, Ñ1 repeats $14^{cd}$ and $15^{cd}$; while Ñ2 V2 B1-3 read $14^{cd}$.

**16** T4 resumes from 16. —$^{a}$) Ñ2 V2 B1.3.4 ततो; B2 इतो; M5 स च (for स तु). B4 कृत्वा; D9 ज्ञात्वा (for गत्वा). M9 गत्वा तु (by transp.). T2 G3 M10 मुहुर् (for मुनिर्). —G3 damaged for $16^{c}$ (except वि). —$^{c}$) D5 G2 मे (sic) (for ते). D1.4 यथा (for मया). B1.4 सर्वं (for भद्रे). —$^{d}$) V1 रावणं (for कारणं). B2 यन्मुहुर्गतं; D1.4 जन्मनो(D1 °तो) गतं; T2 त्वन्मनोगतं. —After 16, Ñ V B D1.3.4.6.7.10.11 S ins.:

148* सुताभिलाषो मत्तस्ते मत्तमातंगगामिनि ।

[ D1.3.4 G1 M2.5-9 -[अ]भिलाषा(G1 M9 °षां; M2 °षान्; M8 °षं) (for -[अ]भिलाषो). D1.3.4.11 M5.6 त्वं (for ते). ]

**17** $^{a}$) D6 संध्यायां (for वेलायां). —$^{b}$) Ś2.3 V3 D2.5.9.12 T3.4 मां (for त्वं). Ś1 D8 त्वं यन्मां (for यस्मात्त्वं). Ś1 D1.3.4.8 समुपस्थिता; Ś2.3 D2.5.9.12 त्वमु°; V3 त्वमिहागता; T3.4 त्वमुपागता; M1 मामुपास्थिता (for मामुपस्थिता). —After $17^{ab}$, D11 ins. श्रीरामाय नमः. —T4 damaged up to सुत in $17^{c}$. —$^{c}$) B2 लभ (for शृणु). Ś Ñ1 V1.3 D2.5.8.9.12 T3 सुतो (for सुतान्). —$^{d}$) G1 दारुणान् (for यादृशान्). M4 जनयिष्यति. S Ñ1 V1.3 D2.5.8.9.12 T3.4 यादृशस्ते भविष्यति.

**18** $^{a}$) Ñ2 B1.3.4 -[आ]चारान्; D1.3.4 -[आ]हारान् (for -[आ]कारान्). —$^{b}$) D1.3.4 भद्रे त्वं जगदप्रियान्. —$^{c}$) Ñ2 V2 B जनयिष्यसि; G3 ****सि (for प्रसविष्यसि). —For 18, Ś Ñ1 V1.3 D2.5.8.9.12 T3.4 subst.:

149* दारुणो दारुणाचारो दारुणाभिजनप्रियः ।
साक्षाद्दारुणकर्मा च न चिरात्प्रसविष्यति ।

[ (l. 1) Ś1 Ñ1 V1.3 D8 दारुणोभि- (for दारुणाभि-). —(l. 2) Ś2.3 D12 सुतो; D5 T3.4 रक्षो (for साक्षाद्). Ñ1 V3 D2.5 T3.4 प्रभविष्यति; D9 प्रसविष्यसि. ]

**19** $^{a}$) Ś D2.9.12 [अ]पि (for तु). —$^{b}$) D1.3.4 इदं (for वचः). —$^{c}$) Ś Ñ1 V1.3 D2.5.8.12 T3.4 नेदृशः पुत्रः; D3.6.7.10.11 M4.7 ई(D7 ता)दृशान्पुत्रांस्; D9 सदृशः पुत्रः; T1.2 ईदृशाः पुत्रास् (for नेदृशाः पुत्रास्). —$^{d}$) Ś D2.5.8.9.12 [ऽ]र्हो; Ñ1 [ऽ]यं; V1 T3.4 [ऽ]र्हं; D6.7.10.11 G1.2 M4.7 [ऽ]हं; T1.2 वै (for ऽर्हा). Ś Ñ1 V1 D2.5.8.9.12 T3 ब्रह्मयोनिजः; D6.7.10.11 T1.2 G M1-5.7-10 Ct °वादिनः; T4 ब्रह्म *** (damaged) (for ब्रह्मयोनितः). Ñ2 त्वत्तो ब्राह्मणयोनितः. —After 19, V2.3 ins.:

150* आत्मवन्तं गुणैर्युक्तं दातुमर्हसि मे सुतम् ।

[ V2 कुलानुरूपतरं धर्म(hypm.) (for the prior half) and कर्तुम् (for दातुम्). ]

—Thereafter V2.3 cont.; Ñ B D1.3.4 T2 G1.3 M1.3.6 ins. after 19 while D6.7.10.11 cont. after 152*:

151* कन्यया चैवमुक्तस्तु विश्रवा मुनिपुंगवः ।
उवाच कैकसीं भूयः पूर्णेन्दुरिव रोहिणीम् ।

[ (l. 1) Ñ1 स रक्ष एवम् (sic); Ñ2 V2.3 B स कन्ययैवम्; D1.3.4 (all with hiatus) कन्यया एवम् (for कन्यया चैवम्). —(l. 2) Ñ1 V2 B नैकसीं(B4 °षीं); V3 D6 केकसीं; D3.4 कैकशीं; G3 कैकयीं (for कैकसीं). D1 चंद्रो वै रोहिणीं च वा (for the post. half). ]

—After 19, D6.7.10.11 ins.:

152* नेच्छामि सुदुराचारान्प्रसादं कर्तुमर्हसि ।

**20** $^{ab}$) Ś V1.3 D2.8.9.12 T3.4 ततो (for अथ). Ś V1.3 D2.5.8.9.12 T3.4 तां तु (for तत्र). M3 भद्रे बुद्धिमतां श्रेष्ठः (for $^{a}$). Ś V1.3 D2.8.9.12 M2.7.9 [ऽ]यं (for यस्). Ś V1.3 D2.8 [अ]नुजः (for [आ]त्मजः). Ñ V2 B D1.3.4.6.7.10.11 M6 पश्चिमो यस्त(Ñ1 °यं त)व सुतो(D1.3.4 यः सुतो भद्रे) भविष्यति शुभानने. —$^{c}$) Ś1 D8 [ऽ]सौ; Ś2.3 Ñ2 V3 B D1.2-5.7.10-12 स (for च). Ñ1 -रूपेण; D2 -रूपं सः (for -रूपश्च). —$^{d}$) Ś2.3 V1 G2 M6 स; D1.3.4 M5 सं- (for च). Ñ1 V2 D9 स धर्मात्मा; B1 धर्माचारो; M1 धर्मवांश्च

G. 7. 9. 28 B. 7. 9. 28 L. 7. 8. 22

एवमुक्ता तु सा कन्या राम कालेन केनचित् ।
जनयामास बीभत्सं रक्षोरूपं सुदारुणम् ॥ २१
दशशीर्षं महादंष्ट्रं नीलाञ्जनचयोपमम् ।
ताम्रोष्ठं विंशतिभुजं महास्यं दीप्तमूर्धजम् ॥ २२
जातमात्रे ततस्तस्मिन्सज्वालकवलाः शिवाः ।
क्रव्यादाश्चापसव्यानि मण्डलानि प्रचक्रिरे ॥ २३
ववर्ष रुधिरं देवो मेघाश्च खरनिस्वनाः ।
प्रबभौ न च खे सूर्यो महोल्काश्चापतन्भुवि ॥ २४
अथ नामाकरोत्तस्य पितामहसमः पिता ।
दशशीर्षः प्रसूतोऽयं दशग्रीवो भविष्यति ॥ २५
तस्य त्वनन्तरं जातः कुम्भकर्णो महाबलः ।
प्रमाणाद्यस्य विपुलं प्रमाणं नेह विद्यते ॥ २६
ततः शूर्पणखा नाम संजज्ञे विकृतानना ।
विभीषणश्च धर्मात्मा कैकस्याः पश्चिमः सुतः ॥ २७

---

(for धर्मात्मा च). Ñ2 V2 (marg. also as in text) B D6.7.10.11 न संशयः (for भविष्यति).

21 a) D5 च (for तु). —b) V2 (also) कुत्रचित् (for केनचित्). —c) D5 G3 M7.9 बीभत्सुं. —d) Ś1 D8 रजोरूपं. B2 भयावहं (for सुदारुणम्).

22 a) Ñ2 V3 B4 D6.7.10.11 G1 -ग्रीवं (B4 °व-) (for -शीर्षं). —c) Ñ1 V1 D5.9 T3.4 लंबोष्ठं; B1.4 ताम्रौष्ठं (for ताम्रोष्ठं). Ś D2.8.12 लंबोद (D2 °बाध)रं विंशभुजं. —d) B3 सहास्यं; G3 दशास्यं (for महास्यं). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 -लोचनं; G1 -तेजसं (for -मूर्धजम्).

23 a) D6.7.10.11 तस्मिञ्जाते (for जातमात्रे). Ś Ñ1 V1.3 D2.5.8.9.12 T3.4 तस्मिञ्जातेथ (T4 °ते तु) भव (Ñ1 V1 D5 T3.4 गग)ने; M7 जातमात्रेण ते तस्मिन्; K (ed.) तस्मिञ्जाते तु तत्काले. —b) Ś Ñ1 V3 D8.12 सज्वाला-; D7 प्रज्वाल- (for सज्वाल-). B2 जज्वलुः सकलाः शिवाः. —d) Ś D2.8.12 प्रव्यथानि (for मण्डलानि). Ñ V2 B D6.7.10.11 G (ed.) प्र (G [ed.] वि)चक्रमुः (for प्रचक्रिरे). V1 प्रापतंस्ते भयंकराः.

24 a) Ś D2.8.9.12 ववृषू; T1.2 G3 M3.6 ववर्षू (for ववर्ष). Ś V3 D2.5.8.9.12 तत्र; V1 देवा; T1.2 G3 M3.6 मेघा; G1 देव (for देवो). T3.4 देवो ववर्ष रुधिरं (by transp.). —b) T1.2 G3 M3 घोराश्च; G1 घनाश्च; M6 दारुणाः (for मेघाश्च). M7 घन- (for खर-). D1.3.4 दारुणं खरनिश्चयः (D3 °स्वनः). —c) Ś Ñ1 V1.3 D2.5.8.9.12 T3.4 न दीप्यते; D1.3.4 T1.2 G M न प्रभाति (for प्रबभौ न). Ñ1 V B1.3.4 D2.5.9 T3.4 M5 वै (for खे). Ñ2 D6.7.10.11 सूर्यो वै; B2 सूर्योपि; G1 M1 सूर्यश्च (for खे सूर्यो). —d) Ś Ñ1 V1.3 D2.5.8.9.12 T1.2.4 G2.3 M2.4.5.7–10 च प्रपेदिरे; D6 प्राप°; T3 च प्रचक्रिरे (for चापतन्भुवि). G1 मेघादुल्काः प्रपेदिरे. —After 24, Ś Ñ V B D T3.4 M3 ins.:

153* पृथिवी प्रचकम्पे च ववुर्वाताः सुदारुणाः ।
अक्षोभ्यः क्षुभितश्चैव समुद्रः सरितां पतिः ।

[(l. 1) Ś V3 D2.8.9.12 च; Ñ1 V1 सु-; M3 वि- (for प्र-). V3 D9 प्रकंपे. Ś2.3 [ऽ]थ; V3 तु (for च). Ñ2 V2 B D6.7.10.11 चकंपे जगती (B2 वसुधा) चैव; D1.4 पृथिवी कंपसंयुक्ता (for the prior half). V2 B च (for सु-). —(l. 2) D2 स्व- (for अ-). Ś V1 D1–5.8.9.12 T3 [अ]पि; T4 M3 [आ]सीत् (for [ए]व). Ñ2 om. समुद्रः.]

25 ab) D5 तत्र (for तस्य). M8 नामाकरोत्तस्य पिता महर्षिसहितस्तदा. —c) Ś Ñ V1.3 D2.6–12 Ct दशग्रीवः. D5 प्रभूतो; M1 प्रसिद्धो (for प्रसूतो). B2 [ऽ]पि (for ऽयं). D1.4 प्रसूतित्वाद् (for प्रसूतोऽयं). ❀ Ct: दशग्रीव इति। कामरूपत्वाच्चान्तःपुरादावेकवक्त्रत्वं द्विभुजत्वं चास्येति बोध्यम्. ❀ —d) Ś Ñ2 V1 B1–3 D2.8.9.12 भवत्विति; Ñ1 भवेत्विति; B4 भवत्विति; D1.3.4 भवत्ययं (for भविष्यति). —After 25, Ñ1 ins.:

154* केनचित्त्वथ कालेन तस्य जातस्य रक्षसः ।

9 ^a) Ñ1 D10.11 सं- ( for तं ). D4 इव ( for अभि- ).—^b) V1 -[ अ ]ग्निर्. V1 T1.2 इवोद्धतं( V1 °त्थितः ); D9 इमं तदा ( for इवोत्थितम् ). Ñ2 B2–4 D6.7.10.11 माणिभद्रो दशाननं.—^cd) Ñ1 B4 T3.4 रघुनंदन; D5 लघुविक्रमः ; G2 यक्षपुंगवैः ( for यक्षपुंगवः ). B2 राक्षसेंद्रं महाबलं ( for ^d ). D1.3.4 शक्तिं ततः प्रचिक्षेप रावणाय रणाजिरे.—After 9, D1 ins. 278* ( owing to om. )

10 D1 om. 10^abcd.—^ab) Ñ V3 B2–4 D6.7 सोपि ( for ततो ). G1.2 M1.2.4.5.8–10 -राजेन्द्रस् ( for -राजेन ). T1.2 G3 M3 ततो वै राक्षसेंद्रस्तु ( for ^a ). Ś2.3 V3 D3.4 transp. ताडितो and गदया. Ñ1 तया; D3.4 T1.2 G2.3 M तदा; G1 तथा ( for रणे ). D10.11 ताडितो माणिभद्रस्य मुकुटे प्राहरद्रणे.—^c) Ś V1 D2.5.8.9.12 T3.4 मुकुटेन नि( T4 वि )वृत्तस्य( D5 °त्तिश्च; T3.4 °त्तश्च ); D3 मुकुटे तं निवृत्तं च; D4 मुकुटे च निवृत्तस्तु; T1.2 G M मकुटे चा( G3 M3.5 °टेना )हनत्क्रुद्धः.—^d) V1 D6.10.11 T3 G2 M3.4.7.10 मु( G2 M7 म )कुटं; T1 G1.3 M1.2.5 8.9 प्रहारात् ; T2 प्रहरन् ; M6 मकुटः ( for मुकुटः ). B4 आपतत् ; D5 M3 आगमत् ; D6.10.11 T1.2 G1.2 M1.2.5.7.8.10 आगतं ( for आगतः ). Ś V1.3 D2–4.8.9 12 T3.4 पार्श्वतोगमत्( D3.4 °तो गतः ).—After 10^cd, D3.4 T1.2 G M ins.; while D1 ins. after 9 ( owing to om. ) :

278* ततः संयुध्यमानेन विष्टब्धो नाप्यकम्पत ।

[ G1.2 M2–4.9 स; M8 सु- ( for सं- ). G1 बहुमानेन ( for -युध्यमानेन ). M6 स समाविध्यमानस्तु ( for the prior half ). M2 विष्टभ्यो. M3.6 व्यकंपत; M5 [ अ ]भ्य°; M10 ह्यकं° ( for [ अ ]प्यकम्पत ). D1.3.4 विष्टंभो ( D1 °ष्कंपे )नास्य कंपितः ( for the post. half ). ]

—^e) Ś Ñ V1.3 B2–4 D T3.4 ततः ( for तदा ).—^f) Ś D2.8.12 पार्श्वे( D2 °र्श्वं )शूलिर्; D3.4 पार्श्वमौली. Ś V1.3 D2.5.12 अ( V1 D5 त )थाभवत् ; Ñ B2–4 D6.7.9–11 अभूत्किल; D1.3.4 M6 नराधिप; D8 अथाब्रवीत् ; T3 अतोभवत् ; T4 तथा किल; M7 इति श्रुतः ( for इति स्मृतः ).

G. 7. 15. 16
B. 7. 15. 15
L. 7. 14. 12

तस्मिंस्तु विमुखे यक्षे माणिभद्रे महात्मनि ।
संनादः सुमहान्राम तस्मिञ्शैले व्यवर्धत ॥ ११
ततो दूरात्प्रददृशे धनाध्यक्षो गदाधरः ।
शुक्रप्रोष्ठपदाभ्यां च शङ्खपद्मसमावृतः ॥ १२
स दृष्ट्वा भ्रातरं संख्ये शापाद्विभ्रष्टगौरवम् ।
उवाच वचनं धीमान्युक्तं पैतामहे कुले ॥ १३
मया त्वं वार्यमाणोऽपि नावगच्छसि दुर्मते ।
पश्चादस्य फलं प्राप्य ज्ञास्यसे निरयं गतः ॥ १४
यो हि मोहाद्विषं पीत्वा नावगच्छति मानवः ।
परिणामे स वै मूढो जानीते कर्मणः फलम् ॥ १५
दैवतानि हि नन्दन्ति धर्मयुक्तेन केनचित् ।
येन त्वमीदृशं भावं नीतस्तच्च न बुध्यसे ॥ १६
यो हि मातॄः पितॄन्भ्रातॄनाचार्यांश्चावमन्यते ।
स पश्यति फलं तस्य प्रेतराजवशं गतः ॥ १७

---

11 a) D1 सु- (for तु). G1 सुमुखे. Ś2.3 B2 D8 भूते; D1.3.4 M6 राजन् (for यक्षे). Ś1 Ñ V1.3 B3.4 D2.5–7.9–12 T3.4 विमुखीभूते. — b) Ś D2.8.9.12 मणिभद्रे. — c) D8 संसादः. T3 तु; G3 स (for सु-). Ś Ñ V1.3 B2.3 D2.5–8.10–12 T3.4 राजंस्; B4 नादं (sic); D9 om. (for राम). — d) Ś1 D8 तत्र. B2–4 सैन्ये (for शैले). B4 व्यजायत; D1.3.4 विवर्धते(D1.3 °त); K (ed.) [ऽ]भ्यवर्तत.

12 a) Ñ2 B2–4 D1.6.7 G2 M1.5.10 स (for प्र-). — b) Ś V1.3 D2.5.8.9.12 T3.4 महाबलः; M5 महारथः (for गदाधरः). — c) B2 D1.4 शक्र-; D5.11 T3.4 शुक्र- (for शुक्र-). Ś1.3 Ñ V1.3 B2–4 D1.4.9–12 M4 Ct -प्रौष्ठ-पदाभ्यां(Ñ1 °नां [sic]); Cv.g.k as in text (for -प्रोष्ठ-पदाभ्यां). Ś D2.8.12 वा (for च). ❀ Cg: शुक्रप्रोष्ठपदौ मन्त्रिणौ. ❀ — d) Ñ2 V1.3 B2.3 D5–7.10.11 T3.4 Ct पद्म-शंख- (by transp.); B4 पद्मशंखैः; Cv.g.k as in text (for शङ्खपद्म-). B2 -गदावृतः (for -समावृतः). D1.3.4 शंखपद्मैश्च संयुतः(D1 °तैः); M6 पद्मशंखैश्च संवृतः. ❀ Cv: शङ्खपद्मसमावृत इत्यत्र अन्योऽर्थो वेदितव्यः। द्वाभ्यां समावृतत्वासंभवात्, परत्र च शङ्खपद्मादीनां निधीनामुपादानाच्च।; Cg.k: शङ्खपद्मसमावृतः शङ्खपद्मनिध्यभिमानिदेवैः संवृतः।; so also Ct. ❀

13 a) D4 संदृष्ट्वा. G2 M9 संघे (for संख्ये). — b) B3 पापाद्; D5 शाप-; D6 तथा; T4 कालाद्; G1 पाशाद् (meta.); Cg.k.t as in text (for शापाद्). V3 विगत-; M8 विभ्रवच- (sic) (for विभ्रष्ट-). — c) Ñ1 कोपाद्; B2 धीरो (for धीमान्).

14 a) Ñ B2–4 D6.7.10.11 यन्मया; G3 मयार्थं (for मया त्वं). Ñ B2.3 D6.7.10.11 त्वं; B4 तु; D1.3.4 वै; T3 हि (for ऽपि). — b) G2 नार्थं गच्छसि; M1 नावगच्छस्तु (sic); Ct as in text (for नावगच्छसि). — c) B4 पश्चादेतत्-; T3 पश्य तस्य. — d) Ś V1.3 D2.8.12 बाध्यसे; Ñ1 B2 दह्यसे; B4 D1.4.5.9 T4 भोक्ष्यसे. G1 नरकं; M6 नियतं; Ck.t निरयं (as in text).

15 a) M4 लोभ- (for यो हि). Ś D2.8.12 महाविषं. V1 T3.4 transp. मोहाद् and पीत्वा. — b) Ś Ñ V1.3 B2–4 D2.5–12 T3.4 दुर्मतिः; D1.4 मानद(D4 °दः) (for मानवः). — c) G1 मूढ (for मूढो). Ś Ñ V1.3 B2–4 D2.5–12 T3.4 स तस्य परिणामांते; D1.3.4 परिणामसुखे(D3 °मे सुखे) मूढो. — d) D1.3.4 M6 तस्य तत्; T2 G3 M5 कर्मणां (for कर्मणः).

16 a) Ś Ñ V1.3 B2–4 D1–4.6–12 T3 न; D5 T4 च; M7.10 [इ]ह (for हि). Ś Ñ1 V1.3 B2.3 D1.4 T2.4 M1.3.9 निं(Ś2 *)दंति (for नन्दन्ति). M5 Cg.k.t देवता नाभिनंदंति. — b) Ś V1.3 D2.9.12 T3.4 तपो-; D5 तथा- (for धर्म-). D1 -युक्तं न (for -युक्तेन). B2 धर्मोक्तेन च केन च. — c) M6 पापं; Cg.k.t भावं (as in text). — d) M4.6 नीवः; Cg.k.t as in text (for नीतस्). Ś1 D8 सर्वं न; Ś2.3 V1.3 D1–4.9.12 T3 स च न; B2 D5 T1.2 G1.3 M3–6 Cg.k.t स(B2 त)न्नाव-; Cv as in text (for तच्च न). D1.3 T3 G2 बुध्यते; Cg.k.t as in text (for बुध्यसे). M1 प्रापितो नावबुध्यसे. ❀ Cv: दैवतानि हीत्यादि। धर्मयुक्तेन केनचित्कर्मणा दैवतानि नन्दन्ति। येन त्वमीदृशं भावमतिमूर्खस्य भावं नीतः तेन तच्च दैवतं नन्दनं च न बुध्यसे। अभिवादनादि गुरुगौरवकर्मणा दैवतानि नन्दन्तीत्येतदतिमूर्खप्रकृतितया न जानीष इत्यर्थः।; Cg: देवता इति। धर्मयुक्तेन तव केनचिद्व्यापारेण त्वामिदानीं नाभिनन्दन्ति, धर्माभावात्त्वयि विमुखा भवन्तीत्यर्थः। येन देवतावैमुख्येन। त्वमीदृशं क्रूरं भावं नीतः सन्नावबुध्यसे।; Ck: देवता ब्रह्मरुद्रादयः। धर्मयुक्तेन केनचिद्व्यापारेण त्वामिदानीं नाभिनन्दन्ति। त्वयि विमुखा भवन्ति। धर्माभिभावाद्येन वैमुख्येन त्वमीदृशं क्रूरं भावं नीतः सन्नावबुध्यसे।; Ct: दैवतानि ब्रह्मरुद्रादयः। धर्मयुक्तेन केनचित्प्राकृतेन व्यापारेण त्वामिदानीं नाभिनन्दन्ति त्वयि विमुखा भवन्ति। संप्रति त्वयि धर्माभावाद्येन देवतानभिनन्दनेन त्वमीदृशं क्रूरं नीतः प्रापितः सन्नावबुध्यसे. ❀

17 a) D1 G1.3 M1.2.4 मातृ-; T4 मर्त्यः (for मातॄः). G1 M4 पितृ- (for पितॄन्). Ś Ñ V1.3 B2–4 D2.5–12 T3 मातरं पितरं विप्रान्(Ñ V3 B2–4 D6.7.10.11 °प्रम्). — b) Ñ B2–4 D6.7.10.11 G2 आचार्यं. Ñ2 V1 D6.10.11 चावमन्य वै; V3 B2.3 T3 अ(T3 त्व)वमन्य वै(B3 च); B4 G2.3 M4.5.10 अव(G2 न च; M4 वाव-)मन्यते; D5 M7 वा(D5 यो)व° (for चावमन्यते). G1 आर्यंश्चाप्यवमन्यते. — c) B2 M9 न; M6 यत् (for स). D1.3.4 पश्येत्तत् (for पश्यति). T3 तत्र (for तस्य). — d) M10 प्रेतराज्य-. D1.3.4 M6 -पुरं (for -वशं).

अध्रुवे हि शरीरे यो न करोति तपोर्जनम् ।
स पश्चात्तप्यते मूढो मृतो दृष्ट्वात्मनो गतिम् ॥ १८
कस्यचिन्न हि दुर्बुद्धेश्छन्दतो जायते मतिः ।
यादृशं कुरुते कर्म तादृशं फलमश्नुते ॥ १९
बुद्धिं रूपं बलं वित्तं पुत्रान्माहात्म्यमेव च ।
प्राप्नुवन्ति नराः सर्वं स्वकृतैः पूर्वकर्मभिः ॥ २०
एवं निरयगामी त्वं यस्य ते मतिरीदृशी ।
न त्वां समभिभाषिष्ये दुर्वृत्तस्यैष निर्णयः ॥ २१
एवमुक्त्वा ततस्तेन तस्यामात्याः समाहताः ।
मारीचप्रमुखाः सर्वे विमुखा विप्रदुद्रुवुः ॥ २२

G. 7. 15. 27
B. 7. 15. 26
L. 7. 14. 23

18 a) B4 अध्रुवो. M1 [ऽ]स्मिन् (for हि). Ś V1.3 D1-5.8.9.12 T3.4 यो (D9 अ)ध्रुवेण शरीरेण; Ñ1 अध्रुवं हि शरीरं यो. —b) D9 तपो ध्रुवं; T2 G M5 तपार्जनं. —c) B3 तत् (for स). —d) B2.4 G1 मृते. Ñ2 V3 D3.6.7.10.11 गत्वा (for दृष्ट्वा). G2 M10 जनो (for [आ]त्मनो). Ś V1 D2.5.8.9.12 T3.4 मृतो दुःखां (T3 दुःख)गतिं गतः. —After 18, D7 T3 M3 K (ed.) ins.; while T4 ins. l. 1 after 18 and l. 2–4 after 19:

279* धर्माद्राज्यं धनं सौख्यमधर्माद्दुःखमेव च ।
तस्माद्धर्मं सुखार्थाय कुर्यात्पापं विवर्जयेत् ।
पापस्य हि फलं दुःखं तद्भोक्तव्यमिहात्मना ।
तस्मादात्मोपघातार्थं मूढः पापं करिष्यति ।

[ (l. 1) T3 धान्यम् (for सौख्यम्). —(l. 2) D7 उपादाय (for सुखार्थाय). D7 T4 विसर्जयेत् (for विवर्जयेत्). —(l. 3) T4 महात्मना (for इहा°). —(l. 4) D7 T3.4 तत्किम् (for तस्माद्). K (ed.) आत्माप-. D7 T3.4 मूढ पापं करिष्यसि (for the post. half). ]

19 a) M6 च; Cg.k as in text (for हि). B3.4 D3.6.7.10.11 T3 M7 दुर्बुद्धे; Cg.k.t दुर्बुद्धेश् (as in text). —b) B3 दुर्गतौ. Ñ B2-4 D7 हीयते; M6 नियता; G (ed.) क्षीयते; Cv.g.k.t as in text (for जायते). M8 गतिः; Cv as in text (for मतिः). —For $19^{ab}$, Ś V1.3 D2.5.8.9.12 T3 subst.:

280* न हि सर्वस्य दुर्बुद्धे दीप्यते छन्दतो गतिः ।

[ Ś2.3 [अ]ति (for हि). V3 धर्मस्य (for सर्वस्य). Ś2 दुर्बुद्धेर्. T3 नियता (for दीप्यते). ]

—Then V3 cont.; while Ñ2 B3.4 D6.7 ins. after $19^{ab}$:

281* दैवं चेष्टयते सर्वं हतो दैवेन हन्यते ।

[ D6 ततो (for हतो). B3 दृश्यते (for हन्यते). ]

—c) T3 क्रियते (for कुरुते). B3 राजंस् (for कर्म). —After 19, T4 ins. l. 2–4 of 279*.

20 a) Ñ V1.3 B2-4 D7.10.11 T4 M6 ऋद्धिं; D5 M9 बुद्धि-; D6 T3 ऋद्धि-; D9 बुद्धी (for बुद्धिं). Ñ1 रूप-; M6 हर्ष- (for रूपं). Ś D2.8.9.12 कुलं; T3 फलं (for बलं). Ś Ñ V1.3 B2-4 D5-8.10-12 T3 पुत्रान्; D2.9 पुत्राः; T4 वीर्यं (for वित्तं). —b) Ś D8.12 K (ed.) शौर्यं (D12 °चं) गांभीर्यम् (K [ed.] धीरत्वम्); Ñ V1.3 B2.3 D6 शौर्यं (B3 °चं) शौटी (B2 D6 शौंडी)र्यम्; B4 शौटीरं शौर्यम्; D2.5.9 शौचं शौंडीर्यम्; D7.10.11 वित्तं (D7 शौर्यं) शूरत्वम्; T3 शौर्यं शौंडीरम्; M9 पुत्रमाहात्म्यम् (for पुत्रान्माहात्म्यम्). M4 (also as in text) वा (for च). —For $20^{ab}$, D1.3.4 subst.:

282* सुखं सिद्धिर्बलं शौर्यं चित्तं वित्तं तथैव च ।

[ D3 रूपमृद्धिं (for सुखं सिद्धिर्) and विवृत्तिं (subm.) (for चित्तं वित्तं). ]

—c) B4 आप्नुवंति. Ś Ñ V1.3 B2-4 D T3 लोके; T2 M10 सर्वे; M3 स्वर्गं (for सर्वं). —d) Ś Ñ B2 D2.6-12 M2 निर्जि (D8 °र्मि)तं; V1 प्रार्थितं; V3 B3 D3 T4 M6.7 सुकृतैः; B4 (with hiatus) अर्जितं; D1.4 सुवृत्तैः; D5 T3 स्वार्जितैः (for स्वकृतैः). Ñ2 D6.7.10-12 पुण्य-; B2 यत्तु (for पूर्व-).

21 a) Ś3 B2 D1.4.6.8.12 M6 Cv -गामित्वं; Cg.k.t -गामी त्वं (as in text). —b) B4 यास्यसे (for यस्य ते). —c) T2 M5.6 त्वा; Cv.g.k.t as in text (for त्वां). Ñ1 समभिभाषंत (sic); D1.4 विनयो विशति; D12 समति°; G2 समव°; M6 [अ]हमभि°; Cv.g.k.t as in text (for समभिभाषिष्ये). —d) Ś Ñ V1.3 B2.3 D2.5.8.12 T1.2 G3 दुर्वृ (D5 °र्दृ)त्तो हि; D1.4 दुर्बलस्य; D6.9 °त्ते हि; D7 °त्तेषु; D10.11 Ck.t [ऽ]सद्वृत्तेषु; Cv.g as in text (for दुर्वृत्तस्य). B2.3 [अ]सि; D1.10.11 M6 [ए]व; Cv.g.k.t as in text (for [ए]ष). Ñ B4 D6.7 निश्चयः; B2.3 निश्चितं (for निर्णयः). —After 21, Ñ1 V3 ins. 283*.

22 Ñ1 om. $22^{ab}$. —a) Ś2.3 B2-4 D2.3.8.9.12 T3 M8.9 उक्तस्; Ñ2 V1.3 D7.10.11 T3 G2.3 M1.2.7.10 Cg.k.t उक्तास्; D4-6 T4 G1 M3-5 उक्ते (for उक्त्वा). Ś1 D1 T1 उक्तवतस्. —b) Ś Ñ2 V1 B2-4 D2.5.6.8.9.12 T3 समागताः; T1.4 G M3-5.7-10 °हिताः; Cg.k.t as in text (for समाहताः). —After $22^{ab}$, Ñ2 B2-4 D6.7 ins.; while Ñ1 V3 ins. after 21:

283* दृष्ट्वाथ धनदं राम राक्षसाः सुमहाबलाः ।

[ V3 B2 च; B4 तु (for [अ]थ). ];

whereas T1.3.4 G M3.5.10 ins.:

284* संक्रुद्धाद्राक्षसाञ्शूरान्निजघ्नुः संयुगे तदा ।

[ T1.3.4 M3.10 संक्रुद्धा. T3.4 राक्षसाः (for राक्षसान्). T2 M3 क्रूरान्; T3 क्रूरा; M5 शूरा. T3.4 G3 निहन्युः (for निजघ्नुः). T3 तथा. ]

G. 7. 15. 28
B. 7. 15. 27
L. 7. 14. 24

ततस्तेन दशग्रीवो यक्षेन्द्रेण महात्मना ।
गदयाभिहतो मूर्ध्नि न च स्थानाद्व्यकम्पत ॥ २३
ततस्तौ राम निघ्नन्तावन्योन्यं परमाहवे ।
न विह्वलौ न च श्रान्तौ बभूवतुरमर्षणौ ॥ २४

आग्नेयमस्त्रं स ततो मुमोच धनदो रणे ।
वारुणेन दशग्रीवस्तदस्त्रं प्रत्यवारयत् ॥ २५
ततो मायां प्रविष्टः स राक्षसीं राक्षसेश्वरः ।
जघान मूर्ध्नि धनदं व्याविध्य महतीं गदाम् ॥ २६

—d) Ś2.3 V3 D2.9.12 संप्र- ; D1.3.4 तेथ; D5 T3 ते प्र- ; T4 तु प्र-; Ck.t as in text (for विप्र-).

23 b) D1.4 धनदेन (for यक्षेन्द्रेण). —c) Ñ1 B2 M6.8 निहतो; B4 D1.3.4 ताडितो (for [अ]भिहतो). T3 मूर्ध्न्यभिहतो (by transp.). Ś V1.3 D2.5.8.9.12 मूर्ध्न्याह(D2.9 °र्ध्ना ह; D5 °र्ध्नि ह)तः स(V1 °तस्तु) गदया. —d) D1.3–5.7.10.11 T3.4 G2 M5.8.10 प्रकंपितः ; D6 T1.2 G1.3 M1.3.4.7 प्रकंपते (for व्यकम्पत). Ś1 V3 D2.8 नास्थातुं तस्य राक्षसः ; Ś2.3 D12 न चकंपे च राक्षसः ; Ñ B2.3 D9 नास्थाभू(Ñ1 °भूय[sic])च्चास्य(D9 °त्तस्य) रक्षसः; B4 त्रस्तोभूच्चास्य राक्षसः. —After 23, D11 ins. श्रीरामाय नमः.

24 a) T1.2 G1.3 M1–5.7–9 अभि- ; G2 M10 अति- (for राम). —b) M4 परमावहे (meta.). Ś Ñ V1.3 B2–4 D2.5–12 T3.4 तदा(Ś D2.5.12 तथा; D9 यथा)न्योन्यं महाहवे (Ñ B2.3 D6.7.10.11 °मृधे). —c) B3 निराकुलौ. Ś1 D8 T3 तौ न; Ñ1 श्रम- (for न च). B2 अविश्रांतौ; D1.4 न च ग्लानौ; M9 न विक्रांतौ (for न च श्रान्तौ). V1 D2 न वि(V1 व्य)ह्वलेतां न श्रांताव् ; M6 विह्वलौ न च विश्रांतौ. —d) T4 G1 M5 अरिंदमौ; G2 M1.3.4.7.10 अमर्षिणौ (for अमर्षणौ). Ś Ñ V1.3 B2–4 D2.5–12 T3 तावुभौ(Ś V1 D2.5.8.9.12 T3 अभूतां) यक्षराक्षसौ.

25 a) Ś D2.8.9.12 तस्मै तु; Ñ V1.3 B2–4 D5–7.10.11 T3 G (ed.) तस्मै स(G [ed.] च) ; M6 स तदा; M8 च ततो (for स ततो). —b) Ś Ñ2 V1.3 B2–4 D2.5–12 तदा; Ñ1 T3 तथा (for रणे). D1.3.4 T4 G2 M1.2.4.6–10 द्रविणेश्वरः. —c) D1.3.4 च रक्षेंद्रस् (for दशग्रीवस्). Ś Ñ V1.3 B2–4 D2.5–12 T3 G (ed.) राक्षसेंद्रो वारुणेन (G [ed.] रावणोसौ). —d) M1 ततस्तं (for तदस्त्रं). Ś Ñ1 V1.3 B2–4 D2.8.9.12 T3 G3 पर्यवारयत्. —After 25, D1.3.4 ins.:

285* एतस्मिन्नन्तरे राम रविसूनुर्महायशाः ।
धनेशं व्यथितं श्रुत्वा रावणेन दुरात्मना ।
आजगाम ततः श्रीमान्बलेन महता वृतः ।
साहाय्यमकरोत्तत्र सार्थवाहः प्रतापवान् ।
वृतो यक्षसहस्रैः सोऽश्वारूढस्तत्र सुव्रतः ।
परस्वधैर्भिण्डमालैर्गदामुसलपट्टसैः ।
योधयामास रक्षेन्द्रः स ततः परवीरहा ।
तस्यानुगौ महावीर्यौ दण्डनायकपिङ्गलौ ।
युध्येतां परमोदग्रौ संग्रामेष्वनिवर्तिनौ ।
ततो रक्षोबलं ताभ्यां बभञ्ज पुरुषर्षभ ।
गोधनानीव कृषिपाः क्षेत्रमुन्मार्गगामिनः ।

[(l. 2) D3 स्खलितं (for व्यथितं). —(l. 5) D3 तु (subm.) (for तत्र). —(l. 6) D3 भिंडिमालैर्. D3 -पट्टिसैः. —(l. 7) D3 रक्षेंद्रं रेवतः (sic) (for रक्षेन्द्रः स ततः).]

—D3 cont.:

286* तदासीत्तुमुलं युद्धं भ्रातृभ्यां च नराधिप ।
सप्तरात्रं महाबाहो न बभूव परिश्रमः ।

26 ab) Ñ V3 B2–4 D6.7.10.11 [ऽ]सौ (for स). Ñ2 D6 राक्षसस्तदा; D1.3.4 °साधिपः (for राक्षसेश्वरः). Ñ1 B2–4 राक्षसो राक्षसीं तदा (for b). M6 ततो माया विसृष्टा सा राक्षसी राक्षसाधिपान्. —After 26ab, Ś Ñ V1.3 B2–4 D T3.4 ins.; T1.2 G3 M1.3.6.7 cont. l. 2–3 only after 289*:

287* रूपाणां शतसाहस्रं विनाशाय चकार च ।
व्याघ्रो वराहो जीमूतः पर्वतः सागरो द्रुमः ।
यक्षो दैत्यस्वरूपी च सोऽदृश्यत दशाननः ।

[(l. 1) D3 -साहस्रे. V3 करोति च; T3.4 [अ]करोत्तदा (for चकार च). Ś V1 D2.5.8.9.12 विनाशं(V1 D5.9 °श्य; D2.12 °श्यं) प्रकरोति च(D5 सः); Ñ B2–4 D6.7 स चकार (Ñ2 D6.7 चकार च) ननाद च; D1.3.4 नश्यते च करोति च (for the post. half). —B4 om. l. 2. M1 transp. l. 2 and l. 3. —(l. 2) G3 damaged for घ्रो वराहो. D1.3.4 वाराहो (unmetric) (for वराहो). Ś Ñ1 V1 D1–5.8 T3 ह्रदः; D12 [ऽ]बुदः (for द्रुमः). B2 स तदा पर्वतद्रुमः; T1.2 G3 M1.3.6.7 सारंगः(G3 M6.7 °गरः) पर्वतो ह्रदः (for the post. half). —(l. 3) B2 यक्षैर् (for यक्षो). T1.2 G3 M1.6.7 -रूपं (for -रूपी). D1.3.4 देवस्वरूपश्च ; D5 दैत्यः स्वरूपैश्. B4 सोपश्यत दशाननं; D1.3–5 T1.2 G3 M1.6.7 दृश्यते न च दृश्यते (for the post. half). —For l. 3, Ś V1.3 D2.8.9.12 T3.4 subst.:

287(A)* रक्षोरूपश्च स तदा दृश्यते च नराधिप ।

[V1 राक्षसो दैत्यरूपश्च; V3 यक्षो दैत्यो भुजंगश्च; T3.4 यक्षो दैत्यस्वरूपश्च (for the prior half). Ś2.3 V1.3 D2.12 T3.4 स (for second च).];

whereas M3 subst. for l. 3:

287(B)* यक्षराट् तादृशं राम नालुलोके दशाननम् ।

—Then M3 cont.:

287(C)* एवं मायां प्रकुर्वाणो बहुमायः स रावणः ।]

—After 287*, V3 ins. one illeg. line; while D1.3.4.5 (l. 1 only) cont.:

एवं स तेनाभिहतो विह्वलः शोणितोक्षितः ।
कृत्तमूल इवाशोको निपपात धनाधिपः ॥ २७
ततः पद्मादिभिस्तत्र निधिभिः स धनाधिपः ।
नन्दनं वनमानीय धनदो श्वासितस्तदा ॥ २८

ततो निर्जित्य तं राम धनदं राक्षसाधिपः ।
पुष्पकं तस्य जग्राह विमानं जयलक्षणम् ॥ २९
काञ्चनस्तम्भसंवीतं वैदूर्यमणितोरणम् ।
मुक्ताजालप्रतिच्छन्नं सर्वकामफलद्रुमम् ॥ ३० G. 7. 15. 37 B. 7. 15. 36 L. 7. 14. 33

288* संमोहयित्वा मायाभिरेवं राक्षसपुंगवः ।
परिवृत्य तदा तत्र सार्थवाहं दशाननः ।;

whereas D10.11 cont. after 287*; T1.2 G3 M1.3.6.7 ins. after 26$^{ab}$ :

289* बहूनि च करोति स्म दृश्यन्ते न त्वसौ ततः ।

[ M3 ववर्ष ( for बहूनि ). T1.2 M3 चास्त्रशस्त्राणि; G3 M1.6.7 शस्त्रवर्षाणि ( for च करोति स्म ). T1.2 G3 M1.6.7 च करोति च ( for न त्वसौ ततः ). M3 बहुरूपो बभूव ह ( for the post. half ). ]

—D10.11 further cont.; Ñ2 D7 cont. after 287* :

290* प्रतिगृह्य ततो राम महदस्त्रं दशाननः ।

—Ś Ñ1 V1 B4 D2.8.9.12 om. 26$^{cd}$. —$^{cd}$ ) M6 धनदं मूर्ध्नि ( by transp. ). D7 विव्याध ( for व्याविध्य ). V3 अताडय- द्दशग्रीवस्तेजसा धनदं रणे; D1.3–5 आजघ्ने( D5 जघान ) गदया मूर्ध्नि धनदं विननाद च.

27 M1 om. 27–28. —$^{a}$ ) D1.3.4 ततः ( for एवं ). Ñ1 B2–4 माया- ( for तेन ). B3 -[ अ ]भिमतो; B4 -विहतो. —$^{b}$ ) G1 विह्वलन. B3 निशिताक्षितः( sic ). —$^{c}$ ) Ś1 D8 क्षत-; D7.11 कृत-; G2 हृत- ( for कृत्त- ). Ś D1.2.4.8.9.12 G2 इवा- काशे( D1.4 °शान् ); G3 इव स्सालो ( metri causa ). —$^{d}$ ) Ś V1 D2.8.9.12 T3 वि( Ś1 V1 D2.8.9 नि )षसाद ( for निपपात ).

28 M1 om. 28 ( cf. v.l. 27 ). —$^{a}$ ) D1.4 तथा ( for ततः ). —$^{b}$ ) Ñ1 B2.4 D6.7 निधानैः; V1 निधिपैः. B4 च; T3 स्वैर् ( for स ). Ñ B2.3 D6.7.10.11 तदा वृतः; V1 D5 नराधिपः; B4 समावृतः; D1.3.4 T2 G2 M10 तथा( T2 G2 M10 °दा ) नृपः( D8 °प ); T1.4 G1.3 M2.4–9 तदा नृप ( for धनाधिपः ). —$^{c}$ ) D3 M6 नंदन-. D1.3.4 T4 M6 आनीतो; G2 आधाय ( for आनीय ). —$^{d}$ ) M8 धनदोच्छ्वासितस् ( for धनदो श्वासितस् ). D4 तथा ( for तदा ). T4 M6 धनदश्चाभव- त्स्थि( T4 °त्त )तः. —For 28$^{cd}$, Ś Ñ V1.3 B2–4 D2.5–12 T3 M3 subst. :

291* आश्वासितो धनपतिर्वनमानीय नन्दनम् ।

[ Ś V1 D2.5.8.9.12 T3 नरपते( D5 °तिर् ); M3 तदा राम ( for धनपतिर् ). D10.11 धनदोच्छ्वासितस्तैस्तु ( for the prior half ). ❀ Cg.t : धनदोच्छ्वासित इति संधिरार्षः ।; so also Ck. ❀ D8 वरम् ( for वनम् ). B2 आदाय ( for आनीय ). ]

—After 28, D1.3.4 ins. :

292* धनेशं निर्जितं दृष्ट्वा रावणस्य च तद्बलम् ।
यक्षाधिपतयः सर्वे सार्थवाहादयस्तथा ।
विषण्णास्तस्थुषश्चैव न किंचित्प्रत्यपद्यत ।

29 G3 damaged up to धनदं in $^{b}$. —$^{a}$ ) M3 एवं ( for ततो ). M1 निर्भिद्य; Cg निर्जित्य ( as in text ). D1.3.4 रक्षो ( for राम ). Ś V1.3 D2.5.8.9.12 T3 निर्जित्य राक्षसस्तत्र; Ñ B2–4 D6.7.10.11 निर्जित्य राक्षसेंद्रस्तं( B3.4 °द्रस्तु; D6 °द्रो वै ). —$^{b}$ ) Ś Ñ V1.3 B2–4 D T3 हृ( B4 दु )ष्टमानसः ( D1.3.4 °सं ) ( for राक्षसाधिपः ). —$^{d}$ ) G2 M10 कामगं शुभं; Cg.k.t जयलक्षणं ( as in text ).

30 D5 om. ( hapl. ? ) 30$^{ab}$. T1.2 G M1–5.7–10 transp. $^{ab}$ and $^{cd}$. —$^{a}$ ) Ś V1.3 D2.8.9.12 T3.4 -निर्व्यूहं; G1 M5 -संस्फीतं ( for -संवीतं ). —$^{b}$ ) Ś D1–4.6–12 S वैडूर्य-. V3 D1.3.4 T4 -कृत-; T1.2 G M -मय- ( for -मणि- ). —$^{c}$ ) M9 मुक्तादाम-. D5 T3.4 -परि- ( for -प्रति- ). —$^{d}$ ) Ś1 Ñ2 V1.3 B3 ( before corr.; after corr. as in text ) D6.10.11 T1 ( *inf. lin.* also as in text ) G1 M2.3 -काल- ( for -काम- ). Ñ1 -हत- ( sic ) ( for -फल- ). Ś1 B2–4 D8 T2.3 G1.2 M1.5.7 -प्रदं ( for -द्रुमम् ). —After 30, Ñ2 V1 D3.5–7.9–11 T3.4 G ( ed. ) ins.; while M3 ins. after 30$^{ab}$ ( transp. ) :

293* मनोजवं कामगमं कामरूपं विहंगमम् ।
मणिकाञ्चनसोपानं तप्तकाञ्चनवेदिकम् ।
देवोपवाह्यमक्षय्यं सदा दृष्टिमनःसुखम् ।
बह्वाश्चर्यं भक्तिचित्रं ब्रह्मणा परिनिर्मितम् ।

[ ( l. 1 ) V1 कामगं च ( for कामगमं ). —D8 reads the post. half of l. 1 of 294* in place of the post. half of l. 1. T3.4 M3 वियद्गमं ( for विहंगमम् ). —( l. 2 ) Ñ2 -संकाशं ( for -सोपानं ). V1 D9 T3 M3 तप्तहाटक-; D3.5 वैडूर्य- मणि- ( for तप्तकाञ्चन- ). —( l. 3 ) D6 दैव- ( for देव- ). D9 दैवोपवासम्. G ( ed. ) अक्षुब्धं ( for अक्षय्यं ). Ñ2 V1 देवोपवाह्य- पक्षय्यं ( for the prior half ). D3.5.9 T3.4 M3 श्रीमद् ( for सदा ). —( l. 4 ) M3 बह्वाश्चर्यं. ]

—Then Ñ2 V1 D3.6.7.10.11 G ( ed. ) cont.; whereas Ñ1 V3 B2–4 D1.4 M6 ins. after 30 :

294* निर्मितं सर्वकामैस्तु मनोहरमनुत्तमम् ।
न तु शीतं न चोष्णं च सर्वर्तुसुखदं शुभम् ।

[ ( l. 1 ) D3 om. the prior half. M6 निर्जितं ( for निर्मितं ) and तं ( for तु ). V1 वर्धमानं सर्वकामैर् ( for the prior half ). —D8 reads the post. half of l. 1 in

G. 7. 15. 41 B. 7. 15. 40 L. 7. 14. 36 तत्तु राजा समारुह्य कामगं वीर्यनिर्जितम् । जित्वा वैश्रवणं देवं कैलासादवरोहत ॥ ३१

इति श्रीरामायणे उत्तरकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

place of the post. half of l. 1 of 293*. Ñ1 B2–4 मनोरमम्( Ñ1 °थम् ). B2 अनुत्तमैः ( for °त्तमम् ). D1.4 नानाहर्षसमाकुलं ( for the post. half ). —( l. 2 ) B2–4 च ( for तु ). Ñ1 B2.4 [ ए ]वोष्णं; D11 [ उ ]ष्मं च ( for [ न ]ष्णं च ). V1 D1.3.4 M6 न शीतं न( D1 om. [ subm. ] ) च घर्मार्तं( V1 °र्मातं ) ( for the prior half ). D1.3.4 सर्वत्र ( for सर्वर्तु- ). B3 शिवं ( for शुभम् ). B4 सर्वदुःखसुखं शिवं ( for the post. half ). ]

31 [a]) Ś V3 D2.8.9.12 तं स; Ñ B2–4 D6.7.10.11 स तं; D3 G2 तत्र; T1 G3 M1.8 तं तु; T3.4 तच्च; M5 यत्तु ( for तत्तु ). D1.3.4 T3.4 M6 रक्षः; T1.2 G1.3 M1–3.5.8.9 राजन् ( for राजा ). V1 तत्संसक्तः; D5 तद्राक्षसः ( for तत्तु राजा ). T1.2 G M1–4.7–10 समारूढः. —[b]) M3 कामगो. V1 B4 ब्रह्म ( B4 वीर्य )निर्मितं. —After 31[ab], Ñ2 V1 B2.4 D3.6.7.10.11 T3.4 M3 ins.; while D5 ins. after 31 :

295* जितं त्रिभुवनं मेने दर्पोत्सेकात्सुदुर्मतिः ।

[ B2.4 वीर्योत्सुक-( B4 °त्सेकात ); D3.5 वीर्यौत्सुक्यात् ( for दर्पोत्सेकात् ). B4 D3.7 T4 M3 स; T3 च ( for सु- ). ]

—[c]) B4 हित्वा ( for जित्वा ). M6 ततो नगवराच्छुभ्रात्. —[d]) D1.3.4 कैलासम् . Ś V1 D8.9.12 T3.4 व्य( T4 अ )तर ( V1 °गम )त्तदा; Ñ B3 D6.7.10.11 समवातरत् ; V3 विचरंस्तदा; B2.4 समवाह( B4 °र )यत् ; D2 ह्युत्तरे तदा; D3 अवगाहत; D5 उत्तरं तदा; T2 G3 अवरोहयत् ( for अवरोहत ). —After 31, Ñ V3 B2–4 D3.6.7.10.11 ins.:

296* स तेजसा विपुलमवाप्य तं जयं
　　प्रतापवान्विमलकिरीटहारवान् ।
रराज वै परमविमानमास्थितो
　　निशाचरः सदसि गतो यथानलः ।

[ ( l. 1 ) B3 D3 स्व- ( for स ). Ñ1 अवाप्यते ( for अवाप्य तं ). D3 तज्जवे ( for तं जयं ). —( l. 2 ) V3 B3 विपुल-; D3 निर्मल- ( for विमल- ). Ñ V3 B2–4 -व( Ñ1 V3 -ध )र्मभृत् ; D3 -चर्मधृक् ( for -हारवान् ). D6 प्रतापवान्वै विपरीतकर्मकृत. —( l. 3 ) D3 स राजते ( for रराज वै ). Ñ1 -विधानम् ( for -विमानम् ). B3 रराज वैश्रवणपुरं समाश्रितः. —( l. 4 ) B3 स रावणः ( for निशाचरः ). D3 महानलः ( for यथा° ). ❀ Ct : कतकस्तु त्रयस्त्रिंशच्छ्लोकसंख्यामत्र सर्गे लिलेख. ❀ ]

Colophon. —*Kāṇḍa name* : Ś1 om. —*Sarga name* : Ś1 धनदजयः; Ś2.3 V3 D2.8.9.12 कैलासनिर्ज( V3 °विज )यः; Ñ1 कैलासयुद्धवैश्रवणविजयः; Ñ2 B4 D6 ( B4 उत्तरदिग्विजये ) वैश्रवणजयः; V1 वैश्रवणनिर्जयः; B2 D1.3.4 वैश्रवणपराजयः; B3 दिग्विजयः; D5 कैलासानंदविजयः. —*Sarga no.* ( figures, words or both ) : Ś Ñ1 V3 B2.4 D2 om. ; V1 12 ; D8.9.12 T3.4 14. —After colophon, G M1.5.8 conclude with श्रीरामाय नमः ; M10 with श्रीरामचन्द्राय नमः.

# १६

स जित्वा भ्रातरं राम धनदं राक्षसाधिपः ।
महासेनप्रसूतिं तु ययौ शरवणं ततः ॥ १
अथापश्यद्दशग्रीवो रौक्मं शरवणं तदा ।
गभस्तिजालसंवीतं द्वितीयमिव भास्करम् ॥ २
पर्वतं स समासाद्य किंचिद्रम्यवनान्तरम् ।
अपश्यत्पुष्पकं तत्र राम विष्टम्भितं दिवि ॥ ३
विष्टब्धं पुष्पकं दृष्ट्वा कामगं ह्यगमं कृतम् ।
राक्षसश्चिन्तयामास सचिवैस्तैः समावृतः ॥ ४
किमिदं यन्निमित्तं मे न च गच्छति पुष्पकम् ।
पर्वतस्योपरिस्थस्य कस्य कर्म त्विदं भवेत् ॥ ५
ततोऽब्रवीद्दशग्रीवं मारीचो बुद्धिकोविदः ।
नैतन्निष्कारणं राजन्पुष्पकोऽयं न गच्छति ॥ ६ G. 7. 15. 6 B. 7. 16. 6 L. 7. 15. 6

## 16

☞ V2 missing for Sarga 16 ( cf. v.l. 7.12.2 ). M10 begins with श्रीरामचन्द्राय नमः.

1 $^{ab}$) B1 reads $^{a}$ in marg. Ñ2 जित्वा तं; V3 B D1.3.4 M6 तं जित्वा; Cg.k.t as in text ( for स जित्वा ). Ś V1 D2.5.8.9.12 T3.4 जित्वा स( V1 T3.4 स जित्वा ) धनदं देवं ( T4 °व ) ( for $^{a}$ ) and कैलासाद् ( for धनदं ). B1 D6.7.10.11 transp. भ्रातरं and धनदं. M4 राक्षसेश्वरः. —$^{c}$) B1.3 -प्रसूतं; G2 -प्रसूयं ( sic ); Cg.k.t as in text ( for -प्रसूतिं ). Ś D2.5–8 तां; Ñ1 V3 B2–4 D3 T4 M1.2.4.7–9 स; V1 तं; B1 D1.4.9 T3 G3 च; D10–12 G1 M5 तद् ( for तु ). —$^{d}$) Ś2.3 D8.12 शरवनं. Ś Ñ2 V2 D2.5–12 T4 महत्; D1.3.4 M6 प्रति ( for ततः ). V1 ययौ स रावणो महान्; B2 संययौ श्रवणं तथा ( sic ); T3 स ययौ शरणं महत्.

2 $^{a}$) Ś Ñ V1.3 D2.8.9.12 T3.4 सोपश्यत्तद्( V3 T4 °च्च; D8 °त्तु ); D1 तथापश्यद्. —$^{b}$) D7 T3.4 M1–3.8.9 रौद्रं; M6 रम्यं ( for रौक्मं ). Ś2.3 D8.12 शरवनं. Ś V1 B2 D1–5. 8–12 T3.4 महत्; Ñ B1.4 M6 ततः; D6.7 तथा ( for तदा ). V3 रोषकं पनसं गतः ( sic ); B3 स कथं शरणं गतः ( sic ).

3 Ñ1 om. 3$^{ab}$. – $^{a}$) Ś Ñ2 V1.3 B D T3.4 स पर्वतं ( by transp. ); G1 M2.5.8.9 पर्वतं तं; G2 M6.10 पर्वते स ( for पर्वतं स ). Ś Ñ2 V1.3 D2.5–12 T M10 समारुह्य. —$^{b}$) Ś D2.8.9.12 कश्चिद् ; Ñ2 V3 D5.10.11 T3 कंचिद्. Ś D8.12 भव्य-; V1 भव्यं; B रौक्मं; D3.6.7 G2 M1.5.6.10 रम्यं; M4 ( *sec. m.* also ) द्रष्टुं ( for रम्य- ). D9 -लतांतरं. G ( ed.) किंचिद्रौक्मवनात्तदा. —$^{cd}$) Ś1 D8 प्रकृतेः; Ś2.3 D12 प्रवृत्तं; Ñ1 V1.3 D6.10.11 T3.4 प्रेक्षते; D2 प्राकृते; D5.7 प्रेक्ष्यते; D9 प्रख्यातं ( for अपश्यत् ). B3 पौष्पकं; D2 पुष्पके. Ñ2 B transp. तत्र and राम. Ś V3 D2.5.7–9.12 बलात् ; Ñ1 V1 D6.10.11 तदा; Ñ2 B स्थितं; G2 दिशि ( for दिवि ).

4 $^{a}$) Ñ1 V1 T3.4 स्तंभितं. V1 पुष्करं; V3 कामगं; D7.10.11 Ct किमिदं; Cg as in text ( for पुष्पकं ). Ñ1 ज्ञात्वा; V3 D7.10.11 T2 Ct कस्मान् ( for दृष्ट्वा ). —$^{b}$) Ñ1 खगमं; M6 ह्यगमत् ( for ह्यगमं ). B3 स्मृतं. Ś V1 D2.5 6.8.9.12 T3.4 दशग्रीवः प्रतापवान् ; V3 पुष्पकं कामगं कृतं; B1.2 कामगं कृतनिश्चयः; D7.10.11 Ct नागमत्कामगं कृतं; T1.2 G M1–5.7–10 ह्य( T2 त्वि )गमं( G3 °म्यं ) कामगं कृतं. ❀ Ck : ब्रह्मनिर्मितमपीदं पुष्पकं न गमत् न गच्छत् भवति । च्छाभाव आर्षः. ❀ —Ś2 om. 4$^{c}$–5. —$^{c}$) D1.3.4 तद्रक्षश् ( for राक्षसश् ). Ś1.3 Ñ V1.3 B D2.5–12 T3.4 श( B4 सो; T3 च्य )चिंतयद्राक्षसेंद्रः. —$^{d}$) Ś1.3 D8.12 G1 M5 समाश्रि( G1 M5 °हि )तः ( for समावृतः ).

5 Ś2 om 5 ( cf. v.l. 4). —$^{a}$) D7 ह्रीदं ( for इदं ). Ñ2 D6 M1 किं ( for यन् ). Ñ2 B1.3.4 तु; M6 वै ( for मे ). Ś3 D2.5 7.9.12 T3.4 ह्यनिमित्तं मे; Ñ1 B2 यन्निमित्तेन ( for यन्निमित्तं मे ). Ś1 D8.10.11 Cg.k.t किं निमित्तमिदं मेने ( D10.11 Ck.t °च्छया मे ). —$^{b}$) Ś1.3 Ñ V3 B D T3.4 [ इ ]दं; M6 [ ए ]तद् ( for च ). V1 G1 M5 न गच्छति च ( by transp.) ( for न च गच्छति ). —$^{c}$) Ś1.3 Ñ V1.3 B D1–9.12 T3.4 M6 [ उ ]परिष्टात्तु( Ñ2 B D6.7 °च्च; D1.3–5 M6 °द्धि ) ( for [ उ ]परिस्थस्य ). —$^{d}$) G1 M5 कृतं ( for भवेत् ). Ś1.3 D1–4.8.9.12 M6 कर्म कस्य भवेदिदं; Ñ B D5 कस्येदं कर्म वै भवेत् ; V1.3 D6.7.10.11 T3.4 Ck.t कर्मेदं कस्यचिद्भ( V1 D7 T3 °स्य वै भ )वेत् . —After 5, D11 ins. श्री.

6 $^{a}$) Ñ V3 B तम् ( for ततो ). Ś Ñ V1.3 B D T3.4 M6 ततो ( Ś V1 B3 D T3.4 M6 °दा ) राम ( for दशग्रीवं ). —$^{b}$) Ñ1 B4 बुद्धिस( B4 °म )त्तमः; Ñ2 B1–3 बुद्धिसंमतः. —$^{c}$) Ś Ñ1 V1.3 D2.5–12 T3.4 [ इ ]दं ( for [ ए ]तन् ). B4 निष्कारणाद्. T4 शून्यं ( for राजन् ). —$^{d}$) Ś V3 D2.8. 9.12 T3.4 नाद्य गच्छति पुष्पकं; Ñ B G ( ed.) विमानं ते न- ( B4 तन्न; G [ ed. ] यन्न ) गच्छति; D1.3.4.7.10.11 M6 Ck.t पुष्पकं यन्न गच्छति; D5 6 M3 यन्न गच्छ( D6 कंप )ति पुष्पकं. —After 6, Ś V1 D2.3.5–9.12 T3.4 M10 ins. ; while V3 ins. after 7 :

297* शिखरस्थं गिरिस्थस्य कर्म कस्येदमद्भुतम् ।
निश्चितं राजराजेन पुष्पकं विनिवारितम् ।

[ (l. 1) D3 श्रवणस्य ( for शिखरस्थं ). D3.5 गिरेरस्य; T4 गिरेस्तस्य ( for गिरिस्थस्य ). M10 transp. कर्म and कस्य. —(l. 2) T3 विनिपातितं. ]

—Thereafter D5 cont. ; while D7.10.11 T3.4 M6 cont. after 301* :

G. 7. 16. 8
B. 7. 16. 9
L. 7. 15. 8

ततः पार्श्वमुपागम्य भवस्यानुचरो बली ।
नन्दीश्वर उवाचेदं राक्षसेन्द्रमशङ्कितः ॥ ७
निवर्तस्व दशग्रीव शैले क्रीडति शंकरः ॥ ८
सुपर्णनागयक्षाणां दैत्यदानवरक्षसाम् ।
प्राणिनामेव सर्वेषामगम्यः पर्वतः कृतः ॥ ९
स रोषात्ताम्रनयनः पुष्पकादवरुह्य च ।
कोऽयं शंकर इत्युक्त्वा शैलमूलमुपागमत् ॥ १०
नन्दीश्वरमथापश्यदविदूरस्थितं प्रभुम् ।
दीप्तं शूलमवष्टभ्य द्वितीयमिव शंकरम् ॥ ११

298* इति वाक्यान्तरे तस्य करालः कृष्णपिङ्गलः ।
वामनो विकटो मुण्डी नन्दी ह्रस्वभुजो बली ।

[ (l. 2) T3 M6 मुंडो (for मुण्डी). D5 M6 दंडी; D7 क्रूरो (for नन्दी). K (ed.) प्रह्वभुजो. ]

—After 6, Ñ V3 B D1.3.4.6.7.10.11 T1.2 G M1–9 ins.; while T3.4 M10 cont. after 297*:

299* अथ वा पुष्पकमिदं धनदात्रान्यवाहनम् ।

[ Ñ V3 B G (ed.) इदं हि( Ñ2 तु; B2 *) पुष्पकं रम्यं (G [ ed. ] नाम ) (for the prior half). —V3 illeg. for the post. half. Ñ1 नान्य वै तदा (sic); Ñ2 B2–4 D3 M2.6.9 नान्यवाहि वै; Ck.t as above (for नान्यवाहनम्). B1 धनदार्थे तवं वहेत (sic); D1.4 जाने धनदवाहि तत् (for the post. half). ]

—Thereafter Ñ V3 B cont.:

300* तेनेदं विष्ठितं व्योम्नि नान्यदस्तीह कारणम् ।
एवं मन्त्रयतां तेषां राक्षसानां नराधिप ।

[ (l. 1) Ñ2 V3 B1 [ इ ]ति (for [ इ ]ह). —B1.3 om. l. 2. —(l. 2) Ñ2 एव (for तेषां). ];

while D6.7.10.11 S (T3.4 M10 further) cont. after 299*:

301* अतो निष्पन्दमभवद्धनाध्यक्षविनाकृतम् ।

[ T3.4 G1 M5 ततो. D10.11 G1 निस्पंदम्. D6 अनिष्पंदं समभवद् (for the prior half). G3 धनदेन (for धनाध्यक्ष-). ]

7 ᵃ) V1 तस्य (for ततः). D6 पश्चाद् (for पार्श्वम्). —ᵇ) Ś V1 B3 D2.5–12 T3.4 [ ऽ ]ब्रवीत्; Ñ V3 B1.2 D1.3.4 M6 तदा; B4 तथा (for बली). —Ś V1 D2.5.8.9.12 om. 7ᶜᵈ. —ᶜ) Ñ1 B दशाननम्; D1.4 नंदीशस्तम् (for नन्दीश्वर). D6 चोवाचेदं; D7.10.11 T3.4 वचश्चेदं( T4 °श्चैनं ). —ᵈ) D1.4 उपागतं; G1 M4 अशंकितं. V3 राक्षसेंद्रवशं गतः. —After 7, V3 ins. 297*.

8 ᵃ) Ñ1 निवर्तय.

9 B3 om. (hapl.?) 9–11. Ñ B1.2.4 D1.3.4 T1.2 G M2–10 G (ed.) transp. 9ᵃᵇ and 9ᶜᵈ (Ñ1 alone repeating 9ᶜᵈ after 9ᵃᵇ [ transp. ]). —ᵃ) B1 -यक्षनागानां (by transp.). —ᵇ) Ś V1.3 D2.5–12 T3.4 M1 देवगंधर्व- (for दैत्यदानव-). —After 9ᵃᵇ, Ñ2 B1.2.4 D1.3.4 T1.2 G M1–3.6.7.10 ins.; while Ñ1 V3 M4.5.8.9 ins. after 9ᶜᵈ (Ñ1 after ᶜᵈ [ r. ]):

302* तन्निवर्तस्व दुर्बुद्धे मा विनाशमवाप्स्यसि ।

[ Ñ1 तं निवर्तय. B2 निवर्तस्व सुदुर्बुद्धे (for the prior half). Ñ1 न (for मा). B1 विषादम् (for विनाशम्). Ñ1 M1.3 अवाप्नुहि; D3 अवाप्स्यति. ]

—ᶜ) D1.3.4 G1.2 M5.6.10 एष (for एव). Ś Ñ1 (second time).2 V1.3 B1.2 D2.5–12 T3.4 सर्वेषामेव( Ñ2 B1.2 °षां तेन ) भूता( Ñ1 B2 देवा )नाम्; Ñ1 (first time) B4 सर्वप्राणिषु तेनैव( B4 °च ). —ᵈ) Ñ1 (first time).2 B1.2.4 दुर्गमः; G2 M2.9.10 अगमः (for अगम्यः). D1.3.4.7 सर्वतः कृतः; D5 पर्वतोत्तमः; D6 [ ऽ ]यं स पर्वतः (for पर्वतः कृतः). —After 9, D5–7.10.11 T3.4 M10 ins.; while M6 cont. after 302*:

303* इति नन्दिवचः श्रुत्वा क्रोधात्कम्पितकुण्डलः ।

[ T3.4 M6 तस्य (for नन्दि-). ]

10 B3 D9 om. 10 (for B3, cf. v.l. 9). —ᵃ) Ñ1 B1.2.4 D1.4 M1.3 स रोष-; Ñ2 V1 D2.5–7.10.11 T3.4 M10 रोषात्तु; T1.2 G1.3 M5 अमर्ष- (for स रोषात्). Ñ1 -नयनैः. —ᵇ) V3 D3.6.7.10.11 T4 M10 सः (for च). Ś V1 D2.5.8.12 T3 अवतीर्य सः (for अवरुह्य च). Ñ B1.2.4 M6 त्व( B4 M6 ह्य )वरुह्याथ( B1.2 °तीर्याथ; M6 °रुह्य च ) पुष्पकात्. —ᶜ) D2.8 [ उ ]क्तः (for [ उ ]क्त्वा). —ᵈ) B4 तं शैलं सम्-; M8 शैलराजम् (for शैलमूलम्). Ś2.3 V3 D2.5–7.10.12 T3.4 उपागतः; D1.3.4 उपाविशत्. V1 कैलासतलमागमत्.

11 B3 om. 11 (cf. v.l. 9). —ᵃ) G1 M5 अथोपश्यद्. Ñ B1.2.4 नंदिनं स तदापश्यद्; D1.3.4 स पश्यति तदा नंदिम्. —ᵇ) Ñ1 B1.2.4 G2 M4.7 अवि( Ñ1 °पि; G2 °ति )दूरे; Ñ2 तमदूरे. Ñ1 M1 प्रभुः; B1.2 M10 प्रभो: (for प्रभुम्). M6 अदूरे विष्ठितं प्रभुं. —For 11ᵃᵇ, Ś V1.3 D2.5–12 T3.4 subst.:

304* अपश्यन्नन्दिनं तत्र देवस्यादूरतः स्थितम् ।

[ V3 D6.7.10.11 T3.4 सोपश्यन्. V1 पुरतः (for [ अ ]दूरतः). ]

—G1 M5 om. 11ᶜ–13. —ᶜ) Ñ B1.2.4 शूलं दीप्तम् (by transp.); V1 दीप्तस्तंभम्; D1.3.4 T1.2 G2 M7.9.10 दीप्तशूलम्. D1.3.4 अवष्टब्धं (for अवष्टभ्य).

स वानरमुखं दृष्ट्वा तमवज्ञाय राक्षसः ।
प्रहासं मुमुचे मौर्ख्यात्सतोय इव तोयदः ॥ १२
संक्रुद्धो भगवान्नन्दी शंकरस्यापरा तनुः ।
अब्रवीद्राक्षसं तत्र दशग्रीवमुपस्थितम् ॥ १३
यस्माद्वानरमूर्तिं मां दृष्ट्वा राक्षस दुर्मते ।
मौर्ख्यात्त्वमवजानीषे परिहासं च मुञ्चसि ॥ १४
तस्मान्मद्रूपसंयुक्ता मद्वीर्यसमतेजसः ।
उत्पत्स्यन्ते वधार्थं हि कुलस्य तव वानराः ॥ १५
किं त्विदानीं मया शक्यं कर्तुं यत्त्वां निशाचर ।
न हन्तव्यो हतस्त्वं हि पूर्वमेव स्वकर्मभिः ॥ १६

G. 7. 15. 20
B. 7. 16. 20
L. 7. 15. 18

12 G1 M5 om. 12 (cf. v.l. 11). —For 12ab, Ś Ñ V1.3 B D2.5–12 T3.4 subst.:

305* तं दृष्ट्वा वानरमुखमवज्ञाय स राक्षसः ।

[Ñ B2–4 दृष्ट्वा तं (by transp.). Ñ1 स रावणः; T4 दशाननः (for स राक्षसः).]

—Thereafter B1 cont.:

306* शैलमुत्पाटयामास सह देव्या च शंकरम् ।
तत्पृष्ठेन महादेवः पीडयामास पर्वतम् ।
तत्र आर्तस्वरो मुक्तो रावणेन दुरात्मना ।

—c) Ś1 M1 प्रहसं; G2 प्राहासं; Ck.t प्रहासं (as in text). Ś Ñ V1.3 B D T3.4 तत्र; M8 मौख्यात् (for मौर्ख्यात्). —d) Ś D2.8.12 T2 L (ed.) स(Ś2.3 D12 प्र; L [ed.] सु)तोयम्.

13 G1 M5 om. 13 (cf. v.l. 11). —a) Ś D8.12 तत्; V1.3 B1 D1–7.9–11 T3.4 तं; T2 G3 M1–3.8 स (for सं-). B2 ह्यभवन् (for भगवान्). —b) M8 परा (for [अ]परा). —B1 om. 13c – 24b. —c) Ś1 D2.8.9 तत्र रक्षेंद्रं(D2.9 °क्षः स); Ñ V1.3 B2–4 राक्षसेंद्रं तं(Ñ1 B2.4 च); D1.3.4.6.7.10.11 T3.4 तत्र तद्रक्षो (for राक्षसं तत्र). —d) Ś1 D8 रावणं सम्-; Ś2.3 V1.3 D1–7.9–12 T3.4 दशाननम् (for दशग्रीवम्). B4 अवस्थितं; M9 उपस्थितः.

14 B1 om. 14 (cf. v.l. 13). —a) Ś V1 D T3.4 -रूपं मां; B3 -रक्तं मां (for -मूर्तिं मां). —b) V3 lacuna for राक्षस दुर्मते. Ś D1–4.8.9.12 त्वमवज्ञाय (for दृष्ट्वा राक्षस). V1 D5–7.10.11 T3.4 अवज्ञाय दशानन; B2 दृष्ट्वा हससि राक्षस. —c) Ñ1 V3 B2–4 मोहादिह(B2 °व); G2 मूर्ख त्वम्; M8 मौख्यात्त्वम् (for मौर्ख्यात्त्वम्). G (ed.) न जानीषे. Ñ2 *** न विजानीषे (illeg.); M6 अवजानासि मोहान्मा. —d) Ñ V3 B2–4 प्रहासं चैव(B2–4 च वि-); M6 अपहासं च (with hiatus) (for परिहासं च). —For 14cd, Ś V1 D T3.4 subst.

307* अशनीपातसंकाशमट्टहासं प्रमुक्तवान् ।

[V1 अशनीकाश-; D1.4 corrupt. D1.3.4 -सदृशम् (for -संकाशम्). V1 D7.10.11 T3 अपहासं. D5 वि- (for प्र-).]

15 B1 om. 15 (cf. v.l. 13). —a) Ś V1.3 D1–5.9.12 T3.4 मन्मुख-; B3 त्वं सुप- (sic); D6.7.10.11 G3 मद्वीर्य-; D8 संमुख- (for मद्रूप-) Ś V1.3 D1–5.8.9.12 T3.4 -संकाशा; M6 -संपन्ना (for -संयुक्ता). M1 तस्माद्वीर्यसमायुक्ता. —b) Ñ2 D6.7.10.11 M1.3 मद्रूप-; G2 द्वितीय- (sic) (for मद्वीर्य-). V3 -बल- (for -सम-). Ś V1 D8.12 मद्वी(Ś2.3 D12 °द्वे)र्या ममतेजसः(Ś2 °सा). —c) V1 D6.7.10.11 T1–3 G M1–5.7–10 उत्पत्स्यंति; D12 उत्पद्यंते. Ś2.3 D1.4 वधार्थे (for वधार्थं). Ś1.3 Ñ V1 B2–4 D2.5.8.9.12 T3.4 ते; V3 वै; M3 इ (for हि). G2 M10 वधार्थाय. —d) M9 दशस्य (for कुलस्य). Ś V1 D2.5.9.12 T4 [अ]स्य च; Ñ V3 B2–4 भुवि (for तव). D8 ब्रह्मस्यास्य च वानराः (sic); T3 सकुलस्यान्यवानराः. —After 15, Ś Ñ V1.3 (l. 1 only) B2–4 D T3.4 M3 ins.:

308* नखदंष्ट्रायुधाः शूरा मनःपवनरंहसः ।
युद्धोन्मत्ता बलोदग्राः शैला इव विसर्पिणः ।
ते तवाशु बलं दर्पमुत्सेकं च पृथग्विधम् ।
व्यपनेष्यन्ति संभूय सहामात्यसुतस्य हि ।

[(l. 1) Ś D8.12 -दंत- (for -दंष्ट्रा). V3 D10.11 क्रूर; D6.7 क्रूरा (for शूरा). V3 D6.7.10.11 -संपातरंहसः. B4 महाबलपराक्रमाः (for the post. half). —(l. 2) B4 युद्धेषु च; D4 युद्धोन्मग्ना (for युद्धोन्मत्ता). V1 महावीर्या; D7.10.11 बलोद्रिक्ताः. V1 बलिनः कामरूपिणः (for the post. half). —(l. 3) D1 तत् (for ते). Ñ1 V1 त्वामाशु; Ñ2 B3.4 T4 M3 तवास्त्रं(B3 T4 M3 °स्त्र-); B2 राक्षस; D1.4 त्वदीयं; D3.5–7.10.11 T3 तव(D6 नव) प्र- (for तवाशु). D7.10.11 उत्सेधं. D11 चेत् (for च). D12 पृथग्विधा. —(l. 4) Ś1 D8 व्ययं नेष्यंति. B4 ते भूयः; D9 संभूय. D1.4 सामात्यस- (for सहामात्य-). Ñ1 V1 -पुरस्य; B3 -ससुतस्य (hypm.) (for -सुतस्य). Ñ2 B3 D3 T3.4 इ; B2 ते; B4 D6.7.10.11 च (for हि).]

16 B1 om. 16 (cf. v.l. 13). —a) D5 तु तावत् (for त्विदानीं). V3 कर्तुं; D1.3.4 M6 भवेच्; T3 कर्म (for शक्यं). —b) V3 शक्यं; D6.10.11 T1.2 G1.3 M1.3.5.7 Ck.t हंतुं (for कर्तुं). D10.11 Ck.t त्वां हे; G1 यत्त्वा; G2 M2.8–10 यत्त्वं; M3 शक्यं; M4 यत्तत् (for यत्त्वां). G2 निबध्यसे (for निशाचर). Ś D2.5.8.9.12 यावन्न बु(D2.9.12 व)ध्यसे; Ñ1 V1.3 D7 T3.4 यत्नावबुध्यसे(T3 °ते); Ñ2 B2–4 यत्न(B3 बल)वतापि(Ñ2 °शतानि) यत्(Ñ2 च; B2 वा); D1.3.4 M6 यत्नं भवान्मया(M6 °म); G (ed.) यन्न मया भवान् (for यत्त्वां निशाचर). —c) Ś Ñ1 V1.3 D2.5.8.9.12 T3.4 शक्यो हंतुं; D3 निहंतव्यो; Ck.t as in text (for न हन्तव्यो). Ñ2 B2.4 वा (for हि). G (ed.) हंतव्यो हत एव त्वं. —d) V1 पूर्वैर् (for पूर्वम्). Ś D2.8.12 च यत्त्वया; Ñ1 V3 D5.9 च यन्मया; Ñ2 स्वकर्मणा; V1 न संशयः; B2–4 D3 M6 [आ]त्म-

G. 7. 16. 20
B 7. 16. 22
L 7. 15. 19

अचिन्तयित्वा स तदा नन्दिवाक्यं निशाचरः ।
पर्वतं तं समासाद्य वाक्यमेतदुवाच ह ॥ १७

पुष्पकस्य गतिश्छिन्ना यत्कृते मम गच्छतः ।
तदेतच्छैलमुन्मूलं करोमि तव गोपते ॥ १८

केन प्रभावेन भवस्तत्र क्रीडति राजवत् ।
विज्ञातव्यं न जानीषे भयस्थानमुपस्थितम् ॥ १९

एवमुक्त्वा ततो राजन्भुजान्प्रक्षिप्य पर्वते ।
तोलयामास तं शैलं समृगव्यालपादपम् ॥ २०

ततो राम महादेवः प्रहसन्वीक्ष्य तत्कृतम् ।
पादाङ्गुष्ठेन तं शैलं पीडयामास लीलया ॥ २१

ततस्ते पीडितास्तस्य शैलस्याधोगता भुजाः ।
विस्मितायाभवंस्तत्र सचिवास्तस्य रक्षसः ॥ २२

---

(B3 [अ]नु; D4 [अ]स्य)कर्मभिः. —After 16, D6 7.10.11 T1.2 G1.3 M1.3.5 ins.:

309* इत्युदीरितवाक्ये तु देवे तस्मिन्महात्मनि ।
देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खाच्च्युता ।

[(l. 2) G1 M5 पपात ह (for च खाच्च्युता).]

17 B1 om. 17 (cf. v.l. 13). —[a]) Ñ1 D5 तु तदा; D1.3.4 M6 तद्वाक्यं (for स तदा). —[b]) D1.3.4 M6 दशग्रीवो; T4 नंदिशापं; M8 नंदीवाक्यं. Ś Ñ V1 B2 D M6 महाबलः; V3 B3.4 महामनाः; T3.4 दशाननः (for निशाचरः). —[c]) Ñ1 D5.6 T3.4 स; V1 D10.11 तु (for तं). Ñ2 V3 B2–4 तच्छापाग्नि (V3 °च्च)विनिर्दग्धो; D1.3.4 M6 नंदिवाक्याग्निनिर्दग्धो; G (ed.) तच्छापाग्निना निर्दग्धो. —[d]) Ś N1 V1 D2.5–12 T3.4 वाक्यमाह दशाननः (T4 महाबलः). ❀ Cv: पर्वतमासाद्य तं नन्दिं वाक्यमुवाचेत्यन्वयः. ❀

18 B1 om. 18 (cf. v.l. 13). —[a]) Ś1 D5.8 T1.2 G1 M3.5 छन्ना; B2 मंदा; Ct as in text (for छिन्ना). —[b]) Ś1 D8 यतस्ते; Ś2.3 D12 पर्वते (for यत्कृते). —After 18[ab], Ñ2 B2–4 D1.3.4 M6 ins.:

310* करिष्याम्यहमप्यत्र प्रतिकारं सुदारुणम् ।

[G (ed.) [अ]स्य (for [अ]त्र). B3 [अ]नम चाद्यैव (sic) (for [अ]हमप्यत्र). Ñ2 B4 D3.4 प्रतीकारं.]

—[c]) Ś Ñ1 V1.3 D5–8.10–12 T3.4 M6 Ct तमि(Ś2.3 D12 M6 °दि)मं; Ñ2 B2.4 तदेष; B3 तमेष; D1.4 तथैव; D2.9 य(D9 त)दिदं; D3 तदेवं; T2 G1.2 M2.3.5.10 तदेतं; M4.7 ततस्तच्- (for तदेतच्-). —[d]) Ñ1 B3 M1 करोति. B4 D1.4 M2.9 गोपतेः. ❀ Cv: तव गोपतेः तव स्वामिनः पशुपतेः।; Cg.t: गोपते हे वृषभपते रुद्र।; so also Ck. ❀

19 B1 om. 19 (cf. v.l. 13). —[a]) T4 यस्य; M9 तेन (for केन). V3 प्रकारेण; D1.3.4 M6 प्रभुत्वेन. Ś1 D8 12 नायं; Ś2.3 [अ]त्रायं; Ñ1 B3.4 D1.3.4 T3 G M2.5.6.8–10 भवान्; D5 हरः; M1 [ए]वात्र (for भवस्). B2 केन भावेन भगवान्; D6 केन त्विह प्रभावेन. —[b]) D1.3.4 T2 G1.3 M2.5.9 अत्र; D6 भवः; D7.10.11 M10 नित्यं; M1 (with hiatus) ईशः; M3 त्वत्र; M6 उग्रः (for तत्र). Ś Ñ V1.3 B2–4 D2.5.8.9.12 T3.4 G (ed.) क्रीडत्यत्र प्रभुर्यथा(Ñ B2–4 यथा प्रभुः; G [ed.] स लीलया). —G (ed.) om. 19[c]–21. —[c]) B2 वर्जनीयं (for विज्ञातव्यं). D7.10.11 T1.4 G2.3 M3.4.7.10 जानीते. Ś Ñ V1.3 B2–4 D2.5.8 9.12 T3 वर्जनीयं न जानीते(B2 °षे). —[d]) D9 मम (for भय-). Ś Ñ V3 B2–4 D2.5.8.9.12 T3 न बुध्यते(Ś2 Ñ1 B2 °से; B3 °ति); V1 न विंदति; D1.3.4 उपागतं.

20 B1 G (ed.) om. 20 (cf. v.l. 13 and 19 respy.). —[a]) Ś D2.8.9 12 राजा; D5–7.10.11 T3.4 M3.7 राम (for राजन्). —[b]) Ñ B3.4 D1.3.4 भुजौ. Ś V1 D2.8.12 आ-; Ñ1 V3 D6.7.10.11 वि-; Ñ2 B4 G1 M5 9 नि- (for प्र-). V1 भूतले (for पर्वते). B2 प्रक्षिप्य पर्वते तदा; D5 T3.4 भुजेनाक्षि(T3 °नोत्क्षि)प्य पर्वतं. ❀ Ct: पर्वते पर्वताधस्तात्. ❀ —[c]) G1 चालयामास. Ś V1 D2.5–12 शीघ्रं (for शैलं). —[d]) Ś Ñ V3 B2–4 D1–4.8 9.12 M6 L (ed.) स च(Ś2.3 D12 सर्वः) शैलोऽभ्य(D1.3.4 °लो व्य; D9 °लो ह्य; M6 °प्य)-कंपत(Ñ1 °ते; L (ed.) °यत्); V1 D5–7.10.11 स शैलः समकंपत(D5 °नः). —After 20, V1 D5–7.10.11 S ins.:

311* चलनात्पर्वतस्यैव गणा देवस्य कम्पिताः ।
चचाल पार्वती चापि तदाश्लिष्टा महेश्वरम् ।

[(l. 1) V1 D5–7.10.11 G1 M6.7.10 चालनात्. T2 G3 पर्वतेंद्रस्य. G2 M2.4.7–9 गणो (for गणा). T2 देवाश्च (for देवस्य). G2 M2.4.7–9 कंपितः; M6 तापिताः. —(l. 2) D5–7 तदाश्लिष्य.];

while D1.3.4 ins. after 20:

312* नारायणभुजोत्क्षिप्तो मन्दरः स इवाचलः ।

[D1 -भुजे क्षिप्तो.]

21 B1 G (ed.) om. 21 (cf. v.l. 13 and 19 respy.). —[a]) D1.3.4 M6 राजन् (for राम). V3 महाबाहो. —[b]) G1.2 M1.4.5.7–10 त(G2 M4 स)त्कृतिं. Ś Ñ V1.3 B2–4 D2.5–12 T4 देवानां प्रवरो हरः(Ñ B2–4 हसन्; V3 भवः); D1.3.4 M6 प्रहसन्देवसत्तमः. —After 21[ab], T4 ins:

313* तत्त्वतश्चेष्टितं ज्ञात्वा प्रहस्य गिरिजा गणान् ।

—[d]) D2 क्रीडयामास. Ś D2.8.9.12 पर्वतं; L (ed.) सर्वतः (for लीलया).

22 B1 om. 22 (cf. v.l. 13). B4 T4 repeat 22[ab] consecutively. —[a]) Ś Ñ V1.3 D2.5–9.12 T4 (second time) आ(V1 D2.5–7.9 अ)पीड्यंत ततस्; B2 अपीडयत्ततस्; B3.4 (first time) आपीड्येतां ततस्; D10.11 T4 (first time) Cg पीडितास्तु ततस्. B4 (second time) M6

रक्षसा तेन रोषाच्च भुजानां पीडनात्तथा ।
मुक्तो विरावः सुमहांस्त्रैलोक्यं येन पूरितम् ॥ २३
मानुषाः शब्दवित्रस्ता मेनिरे लोकसंक्षयम् ।
देवताश्चापि संक्षुब्धाश्चलिताः स्वेषु कर्मसु ॥ २४
ततः प्रीतो महादेवः शैलाग्रे विष्ठितस्तदा ।
मुक्त्वा तस्य भुजान्राजन्प्राह वाक्यं दशाननम् ॥ २५

G. 7. 16. 30
B. 7. 16. 35
L. 7. 15. 27

ततस्तान्पीडितान्मत्वा ( M6 °न्दृष्ट्वा ); D1.3.4 ततस्तौ पीडितौ दृष्ट्वा. —$^{b}$) Ś Ñ V1.3 B3.4 (first time) D1–5.7–12 T4 (second time) शैलस्तंभोपमा ( V1 °भमहा ) भुजाः ( Ñ B3.4 D1.3.4 °मौ भुजौ ); B2.4 ( second time ) M6 शैलस्तंभोपमान्भुजान्. ❀ Cg: अधोभागगता भुजाः पीडिता आसन्।; so also Ck.t. ❀ —Ś D8 om. $22^{c}$–23. D12 om. $22^{c}$–$23^{b}$. —$^{c}$) D1.3.4 M6 ते ( for च ). —$^{d}$) V3 B3 राक्षसाः.

23 B1 om. 23 ( cf. v.l. 13 ). Ś D8 om. 23; D12 om. $23^{ab}$ ( for both, cf. v.l. 22 ). —$^{b}$) Ñ2 D1.3.4 भुजयोः; D6 भुजाभ्यां. B2 अवपीडनात्; D1.3.4 M6 पीडनेन च; D2.9 पीडनं तथा; T3.4 पीडनात्तदा. B3 भुजयोश्चैव पीडनात् ( sic ); B4 भुजयोरवपीडनात्. —For $23^{ab}$, T1.2 G M1–5.7–10 subst. :

314* तेन रक्षोधिपेनात्र वेदनार्तभुजेन वै ।
[ G3 देवेन ( for वेदना- ). M8 च ( for वै ). ]

—$^{c}$) Ñ2 निनादः ( for विरावः ). V1.3 D6.7.10.11 सहसा. —$^{d}$) Ñ V1.3 B2–4 D1–5.7.9–11 T3 कंपितं; D6 कर्षितं; T4 पीडितं; M6 रावितं ( for पूरितम् ). —For $23^{cd}$, D12 subst. :

315* ततोऽमुञ्चन्महारावं दशग्रीवो महाबलः ।

24 B1 D6 om. $24^{ab}$ ( for B1, cf. v.l. 13 ). —$^{ab}$) G2 M10 मनुष्याः. M5 लोकसंक्षये. D1.3.4 M6 दैत्या ( D1.4 °त्य ) वज्रनिपातं हि ( M6 च ) विदुर्मर्त्या युगक्षयं. —$^{c}$) G2 M10 देवता अपि. M4 संक्रुद्धाश् ( for संक्षुब्धाश् ). D1.3.4 M6 त्रिदशाश्चाभि ( M6 °पि ) संक्षोभाच्च. —$^{d}$) T2 तेषु ( for स्वेषु ). D1.3.4 वेश्मसु; T1.2 G M1.3.5.6.10 वर्त्मसु ( for कर्मसु ). —For 24, Ś Ñ V1.3 B2–4 D2.5.7–12 T3.4 subst.; while B1 D6 subst. l. 2 only for $24^{cd}$ :

316* मेनिरे वज्रनिष्पेषं दैत्या मर्त्या युगक्षयम् ।
आसनेभ्यः प्रचलिता देवाः शक्रपुरोगमाः ।

[ ( l. 1 ) Ś1 D8 तं रावं; Ś2.3 तमेव; D12 तच्छ्रुत्वा; L ( ed. ) तमेवं ( for मेनिरे ). D7 तस्य ( for वज्र- ). T4 ( also ) देवा ( for दैत्या ). Ś1 D8 मत्वा; Ś2.3 D12 ज्ञात्वा; D2.5 -[ अ ]मात्या ( for मर्त्या ). G ( ed. ) transp. दैत्या and मर्त्या. B3 युगक्षये. V1 D7.10.11 T3.4 तस्यामात्या युगक्षये ( for the post. half ). —( l. 2 ) Ñ च ( for प्र- ). D10.11 तदा वर्त्मसु चलिता ( for the prior half ). B3 D6.7.10.11 इंद्र-; D12 चक्रे ( for शक्र- ). ❀ Ct: वर्त्मसु स्थिता देवा वर्त्मभ्यः प्रचलिता इत्यर्थः. ❀ ]

—Thereafter D6.7.10.11 T3.4 cont.; T1.2 G M1–5.7–10 ins. ( M2.8 l. 10 only ) after 24; while D5 ins. after $25^{ab}$ ( first time ); M6 cont. l. 10 only after 318* :

317* समुद्राश्चापि संक्षुब्धाश्चलिताश्चापि पर्वताः ।
यक्षा विद्याधराः सिद्धाः किमेतदिति चाब्रुवन् ।
अथ ते मन्त्रिणस्तस्य विक्रोशन्तमथाब्रुवन् ।
तोषयस्व महादेवं नीलग्रीवमुमापतिम् ।
तमृते शरणं नान्यं पश्यामोऽत्र दशानन ।
स्तुतिभिः प्रणतो भूत्वा तमेव शरणं व्रज ।
कृपालुः शंकरस्तुष्टः प्रसादं ते विधास्यति ।
एवमुक्तस्तदामात्यैस्तुष्टाव वृषभध्वजम् ।
सामभिर्विविधैः स्तोत्रैः प्रणम्य स दशाननः ।
संवत्सरसहस्रं तु रुदतो रक्षसो गतम् ।

[ T1.2 G M1.4.5.7.10 om. l. 1. —( l. 1 ) D7 चालिताश् ( for चलिताश् ). —M4.7 read l. 2 after the first occurrence of l. 10. —( l. 2 ) G3 M4 यक्ष-. G3 सर्वाः; M1 चैव ( for सिद्धाः ). —D5.7.10.11 om. l. 3. —( l. 3 ) G3 तं; M1 [ ए ]ते ( for ते ). D6 तत्र; G2 ते तु; G3 सर्वे; M10 तं तु ( for तस्य ). G2 M10 तथा ( for अथ ). T3 विक्रोशंतस्त * * वन्; T4 विक्रोशंतस्तमब्रुवन् ( for the post. half ). —( l. 4 ) D5–7.10.11 T3.4 नीलकंठम्. —( l. 5 ) G2 अत्र ते ( for तमृते ). M1 शंकरं ( for शरणं ). G1 M5 तु ( for न ). M4.7 [ ऽ ]त्र ( M4 °त्र ) विशारद ( for ऽत्र दशानन ). —( l. 6 ) T1 M10 त्वमेनं; M8 तमेनं ( for तमेव ). —( l. 7 ) D5.6 T3.4 हि दास्यति; T1 M5 [ ऽ ]भियास्यति. —( l. 8 ) T4 G3 तथा ( for तदा ). —( l. 9 ) D5.6 नामभिर्. G2 दशाननं. —G M5.10 read l. 10 before l. 2 ( G3 after l. 2 ); G1 M5 repeating it here. M4.7 read l. 10 twice. —( l. 10 ) M4.7 ( both first time ) कालो महान्नरश्रेष्ठ ( for the prior half ). T1.2 G1.3 M3.4 ( first time ).7.8 ( G1 M7 both times ) रवतो; M1.2.5 ( first time ).6.9 स्रवतो. D5 गतिः; D6 M4.5 ( both first time ).7 ( both times ).8 गतः ( for गतम् ). M4 ( second time ) रवतो राक्षसस्यैव गतः संवत्सरस्तदा. ]

—After 24, M6 ins. :

318* विस्फोटिताश्च गिरयो नागा गच्छन्ति चासकृत् ।
निश्चेष्टाः सत्त्ववन्तश्च गतप्राणास्तदाभवन् ।
समुद्राश्चुक्षुभुस्तत्र प्रचकम्पे वसुंधरा ।
रक्षोरगाः सगन्धर्वाः स्तब्धाक्षास्तत्रसुस्तदा ।

25 B3 om. 25–$27^{b}$. D5 reads $25^{ab}$ twice. —$^{b}$) Ś2.3 मूलेन; D12 मूलाग्रे; L ( ed. ) मलेन ( for शैलाग्रे ). Ś1 D12 [ ऽ ]धिष्ठितांस्; Ś2.3 [ अ ]धिष्ठितास्; Ñ1 B2.4 D2.5 ( first time ).8.9 [ ऽ ]धिष्ठितस्; D5 ( second time ).6.7 विस्मितः; D10.11 विष्ठितं; G2 M10 निष्ठितस्. D5 ( second time ).6.7.10.11 T3.4 प्रभुः ( for तदा ). D1.3.4 प्रहस्य वृषभध्वजः; M6 प्रहसन्देवसत्तमः. —After $25^{ab}$ ( first time ), D5 ins. 317*. —$^{c}$) Ś V3 D2.5–12 T4 G1 चास्य ( for

G. 7.16.31 B. 7.16.36 L. 7.15.28 प्रीतोऽस्मि तव वीर्याच्च शौण्डीर्याच्च निशाचर ।
रवतो वेदनामुक्तः स्वरः परमदारुणः ॥ २६
यस्माल्लोकत्रयं त्वेतद्रावितं भयमागतम् ।
तस्मात्त्वं रावणो नाम नाम्ना तेन भविष्यसि ॥ २७

देवता मानुषा यक्षा ये चान्ये जगतीतले ।
एवं त्वामभिधास्यन्ति रावणं लोकरावणम् ॥ २८
गच्छ पौलस्त्य विस्रब्धः पथा येन त्वमिच्छसि ।
मया त्वमभ्यनुज्ञातो राक्षसाधिप गम्यताम् ॥ २९

तस्य ). Ś2.3 B2 भुजा; Ñ B1.4 D1.3.4 भुजौ (for भुजान्). D6.7.10.11 T3.4 M1.6 राम; D9 प्राह (for राजन्). —$^{d}$) Ñ B1.2.4 उवाचेदं; D5 वाक्यं प्राह (by transp.); D6 प्राह राम; D9 वाक्यं राम (for प्राह वाक्यं).

26 B3 om. 26 (cf. v.l. 25). D10 om. $26^{ab}$. —$^{a}$) Ś V1.3 D2.5.8.9.12 T3 वीर्येण; D6.7 वीर्यस्य; D11 वीरस्य. —$^{b}$) Ś Ñ V1.3 B1.2.4 D9.12 शौटीर्याच्च. Ś V1.3 D T G1.2 M1.3–5.7.10 दशानन. ❀ Ck : शौण्डीर्यादिति । बलमिह शौण्डीर्यशब्देनोच्यते ।; Ct : शौटीर्यात् । चास्तुते:. ❀ —$^{cd}$) G2 M10 वदनाद्; G3 M6.8 रवता; M1.2.9 रुवता (for रवतो). T1.2 G3 M1.3 वदनान्; M2.7.8 वेदनान्; M6 वेगवन्-. T2 G1 M5 -मुक्ताः (for मुक्तः). G2.3 M10 स्वनः. T2 G1 M5 स्वराः परमदारुणाः (for $^{d}$). D6.7.10.11 T4 शैलाक्रांतेन यो मुक्तस्त्वया रावः सुदारुणः. — For $26^{cd}$, Ś Ñ V1.3 B1.2.4 D2.5.8.9.12 T3 subst. :

319* अराक्षसश्च ते रावो मुक्तो लोकभयंकरः ।

[ B1.2 T3 अ( T3 स )राक्षसस्य. V3 रावस्ते (by transp.); B4 ते भावः (for ते रावो). Ñ2 G (ed.) अराक्षस( G [ ed. ] °सः )स्वभावस्ते (for the prior half). Ñ2 V3 B1.2.4 रू( Ñ2 B4 स्व )र एषः सुदारुणः (for the prior half). ];

while D1.3.4 subst. :

320* राक्षसेश त्वया मुक्तो रावणः प्रमहास्वनः ।

[ D3 रक्षेश यत् (for राक्षसेश). —D4 om. (hapl.) from the post. half up to तस्मात्त्वं in $27^{c}$. D3 एवमेष महास्वनः (for the post. half). ]

27 B3 om. $27^{ab}$ (cf. v.l. 25). D4 om. up to तस्मात्त्वं in $27^{c}$ (cf. v.l. 320*). —$^{a}$) Ś D2.8.12 चैव; V1.3 B1 D5–7.9–11 T2.4 चैतद् (for त्वेतद्). D1.3 M6 येन लो( M6 यस्माल्लो )कास्त्रयस्त्वेते. —$^{b}$) B4 भावितं; D1.3 M6 र( D3 रा )वात्ते. D1.3 M6 आगताः. —$^{c}$) D2 यस्मात्. Ñ B नाम्ना (for नाम). —$^{d}$) Ś V2 D T4 M6 राजन्; V1 राज्ञो; T3 M3 वीर; M4.7 [ अ ]नेन (for तेन). D8 G1 भविष्यति. Ñ B ख्यातिं राजन्ग( B4 लोके ग )मिष्यसि.

28 G2 repeats 28–$29^{b}$ consecutively. —$^{ab}$) Ś V1 D2.5.8.9.12 T3 एवं त्वां( Ś2.3 D12 ते ); Ñ V3 B1–3 भवंतं; B4 ध्रुवं त्वां (for देवता). T1 दानवा; G3 वा न वा; M1 मानवा (for मानुषा). Ś Ñ V1.3 B D2.5.8.9.12 T3 दैत्या (for यक्षा). M8 देवदानवयक्षाश्च (for $^{a}$). D10 (m.) [ अ ]पि (for [ अ ]न्ये). Ś Ñ V1.3 B D2.5.8.9.12 T3 गंधर्वाः सह दैवतैः( Ś2.3 किंनराः; D5 राक्षसैः; D12 किंनरैः ) (for $^{b}$). D1.3.4 M6 देवमानुषगंधर्वा दैत्यदानवराक्षसाः. —$^{c}$) Ś V3 D2.8.9.12 सर्वदैव; Ñ1 सर्वत्र वा; Ñ2 V1 B D5 T3 सर्व एव (for एवं त्वाम्). D6 [ अ ]पि (for [ अ ]भि-). —$^{d}$) G2 M10 -राविणं. Ś V1.3 D2.5.8.9.12 T3 रावणेत्ये( D9 °णादे )व रावण( V1.3 °णं; D5.8.9 °णः ).

29 G2 repeats 28–$29^{b}$ consecutively. —$^{a}$) V3 स तु (for गच्छ). D1.3.4 T1.2 G M1–5.7–10 गच्छ सु- (for पौलस्त्य). Ś D8.12 विश्रब्धः; Ñ V1.3 B D1–6 विश्रब्धं; D7.9–11 T3.4 M5 विस्रब्धं. M6 गच्छ गच्छ शिवं तेस्तु. —$^{b}$) Ś3 V3 B4 D1–6.8 G2 यथा (for पथा). Ñ1 त्वमागतः. —$^{c}$) Ś Ñ1 V1 D2.5–12 T3.4 चैव (for त्वम्). M10 समनुज्ञातो. —After 29, D6.7.10.11 T G1.2 M1.3.5.10 ins. :

321* एवमुक्तः स लङ्केशः शंभुना स्वयमब्रवीत् ।
प्रीतो यदि महादेव वरं मे देहि याचतः ।
अवध्यता मया प्राप्ता देवगन्धर्वदानवैः ।
राक्षसैर्गुह्यकैर्नागैर्ये चान्ये बलवत्तराः ।
तिर्यङ्मनुष्यान्न गणे दुर्बला इति चिन्तयन् ।
दीर्घमायुश्च संप्राप्तं ब्रह्मणस्त्रिपुरान्तक ।
वाञ्छितस्यायुषः शेषं शस्त्रं च त्वं प्रयच्छ मे ।
एवमुक्तस्तदा तेन रावणेन स शंकरः ।
ददौ खड्गं महादीप्तं चन्द्रहासमिति श्रुतम् ।
आयुषश्चावशेषं च स्मित्वा भूतपतिस्तदा ।
दत्त्वोवाच तदा शंभुर्नावज्ञेयमिदं त्वया ।
अवज्ञातं यदि हि ते मामेवैष्यत्यसंशयः ।

[ (l. 1) D6.7.10.11 T3 G1 M5 तु (for स). —(l. 2) T4 वरये (for वरं मे). D7 धेहि यततः. —(l. 3) D6.7.10.11 T3.4 अवध्यत्वं मया प्राप्तं (for the prior half). —(l. 4) T4 बलदर्पिताः (for °वत्तराः). —D6 om. l. 5-6. D7 T3.4 om. l. 5. —(l. 5) G2 -मनुष्यं. T1 M3 तिर्यङ्नरान्न गणये; G1 M5 गणये मानुषान्नाहं (for the prior half). G2 M10 मे मतिः (for चिन्तयन्). D10.11 M10 Cg मानुषान्न गणे देव स्वल्पास्ते मम संमताः. ❀ Cg : न गणे न गणयामि ।; so also Ck.t. ❀ —(l. 6) D7.10.11 T4 मे (for सं-). —(l. 7) D10.11 Cg.k.t वांछितं च. M3 [ आ ]युध- (for [ आ ]युषः). T1 G2 शिष्टं; M3 श्रेष्ठं; Cg.k.t as above (for शेषं). T2 चंद्रहासं महादिव्यं; G1 M5 आयुषश्चार्धकोटिं च (for the prior half). G1 M5 तस्मात् (for शस्त्रं). D6.7.10.11 T3.4 G1.2 M5.10 त्वं च (by transp.). —(l. 8) D6.7.10.11 T3.4 ततस्; G1 M5 तथा (for तदा). G1 M5 तु (for स). —(l. 9) G1 M5 ततो (for ददौ). T3 च सं-; G2 M1.10 महद्- (for महा-). M1.10 -दिव्यं (for -दीप्तं). —D6 om. l. 10–12. —(l. 10) D7.10.11 T3 ददौ; T2

साक्षान्महेश्वरेणैवं कृतनामा स रावणः ।
अभिवाद्य महादेवं विमानं तत्समारुहत् ॥ ३०

ततो महीतले राम परिचक्राम रावणः ।  G. 7. 16. 36 B. 7. 16. 46 L. 7. 15. 33
क्षत्रियान्सुमहावीर्यान्बाधमानस्ततस्ततः ॥ ३१

इति श्रीरामायणे उत्तरकाण्डे षोडशः सर्गः ॥ १६ ॥

---

M1.10 स्मृत्वा (for स्मित्वा). T1 तथा (for तदा). —(l. 11) D7.10.11 T3.4 M10 ततः (for तदा). —(l. 12) D11 अभिज्ञातं. T1 यदिह; M3 हि यदि (by transp.). T3 अवज्ञाता यदा हेतिर् (for the prior half). T4 M10 [अ]संशयं. G2 मामेवैष न संशयः (for the post. half).]

30 [a]) D6.7.10.11 T4 एवं (for साक्षान्). Ś2.3 Ñ V1.3 B1.2 D1.3.4.6–8.10.11 T4 G2 M10 [ए]व; T1.2 [अ]यं (for [ए]वं). M8 महेश्वरादेवं. —[b]) G2 वरं प्राप्य (for कृतनामा). Ś1 D8 च (for स). Ś2.3 Ñ2 V1.3 D2.9.12 T3 राक्षसः. —[c]) T1.2 G M1–5.7–10 नमस्कृत्य (for अभिवाद्य). D1.3.4 M6 महात्मानं. —[d]) Ś Ñ1 V1.3 D2.5–12 T3.4 आरुरोहाथ पुष्पकं; Ñ2 B आरोहत्पुष्पकं पुनः (B4 रथं); D1.3.4 विमानं सोध्य (D3 °भ्य) रोहत.

31 [a]) Ś Ñ2 V1.3 B D2.3.5–12 T3.4 महीतलं. Ñ2 प्राप्य; B3 कामं (for राम). G2 रावणो भूतले राम. —[b]) Ś D2.5.8.9.12 पर्याक्रमत; Ñ1 B पर्यं (Ñ1 °र्या) क्रामत्स; Ñ2 योद्धुकामः स; V1 D7.10.11 पर्यक्रामत; D1.3.4 परिक्रांतः स (for परिचक्राम). T1–3 G M2.4–10 राक्षसः. —[c]) Ñ1 D2.8.9 T3 G2 M10 स; D1.3.4 तु (for सु-). Ś Ñ V1.3 B D1–5.8.9.12 T3 -महाभागान् (V3 °ग) (for -महावीर्यान्). M6 क्षत्रियान्वीर्यसंपन्नान्. —[d]) V3 D5 M3 इतस् (for ततस्). D1.3.4 तदा (for ततः). —After 31, Ś Ñ V1 B1.2 D T3.4 ins.:

322* केचित्तेजस्विनः शूराः क्षत्रिया युद्धदुर्मदाः ।
तच्छासनमकुर्वन्तो विनेशुः सपरिच्छदाः ।
अपरे दुर्जयं रक्षो जानानाः प्राज्ञसंमताः ।
जिताः स्म इत्यभाषन्त राक्षसं बलदर्पितम् ।
एवं दर्पबलोत्सिक्तो रावणो लोकरावणः ।
प्रतापावनतान्कुर्वन्क्षत्रियान्विचचार ह ।

[(l. 2) Ñ1 विविशुः (sic) (for विनेशुः). —(l. 3) Ñ2 B1 D5–7.10.11 जानंतः; B2 जानीयः (sic); D3 राजानः (for जानानाः). B1 सर्वसंमताः; D10 संमता जिताः. —(l. 4) D7 T4 भाषंतो (for [अ]भाषन्त). D5 राजानं वरदर्पितं (for the post. half). —D10.11 om. l. 5–6. —(l. 5) T3 सर्व- (for दर्प-). —D6 om. l. 6. —(l. 6) B2 प्रतापवान्सदेव (sic); D1.4.5 प्रतापवि (D5 °पादा) नतान्कुर्वन्; G (ed.) प्रतापवान्वशीकुर्वन्; K (ed.) प्रतापावनतीकुर्वन् (for the prior half). Ñ1 V1 D1.3.4.7 T3.4 राष्ट्राणि; Ñ2 B1 लोकांस्तु; B2 त्रीन्लोकान् (for क्षत्रियान्).]

—Thereafter Ñ B1.2 cont.; while V3 B3.4 ins. after 31:

323* स मानुषं लोकमरीन्द्रमर्दनो
निशाचरेन्द्रोऽप्रतिमश्च तेजसा ।
चकार विघ्नं तरसा महीक्षिताम् ।
युगान्तकाले प्रतपन्रविर्यथा ।

[(l. 1) V3 B2 अहींद्र-; B1 अनींद्र-; B4 अहीस्तु (sic) (for अरीन्द्र-). B1.2 -दर्पणो. Ñ2 समानुषं लोकं स विप्रमर्दनो (sic). —(l. 2) V3 B3.4 स्व- (for च). —(l. 4) B3 तथा (for यथा).]

ततस्ते प्रत्यभिज्ञाय अर्जुनाय न्यवेदयन् ॥ ५
पुलस्त्य इति तं श्रुत्वा वचनं हैहयाधिपः ।
शिरस्यञ्जलिमुद्धृत्य प्रत्युद्गच्छाद्द्विजोत्तमम् ॥ ६   G. 7. 22. 6 B. 7. 33. 6 L. 7. 21. 6

## 33

☞ V2 missing for Sarga 33 (cf. v.l. 7.12.2). Ś Ñ V1.3 B D1–5.8.9.12 T3.4 M6 read 7.31–34 before 7.20 (T3 alone repeating here). D12 begins with ॐ.

1 a) Ś D8.12 तत्र; D1.3.4 T3.4 G1 M2.4.8–10 तं तु; G2 दृष्ट्वा (for तत्तु).—For 1ab, Ñ B subst.:

678* ग्रहणं राक्षसेन्द्रस्य तत्तु वायुग्रहोपमम् ।

[ Ñ1 अर्जुनेन तु तत्कर्म (for the prior half). Ñ1 कृतं (for तत्तु). B1–3 राहु- (for वायु-). ]

—c) D5 om.; D6.7.10.11 M1 ततः (for ऋषिः). D1.12 पौलस्त्यः.—d) Ś Ñ1 V1.3 D1–5.8.9.12 कथ्यमानं दिवालयैः (D2–4 °ये).

2 a) Ś Ñ1 V1.3 D1–4.8.9.12 भृशं; B2 पुनः; D5 नृशंसं (corrupt); G1 पौत्र- (for पुत्र-). B1 D6.7.10.11 T4 G1 -कृत-; T3 -गत-; M2 -स्नत- (for -सुत-).—b) D6.7 T2.3 G कंपमानो; M2.7.9 कंप्यमान-. V3 मनोधृतिः; G3 महाव्रतः; M5.10 महामतिः (for महाधृतिः). Ś Ñ1 V1 D1–4.8.9.12 M6 कंप(Ś D9.12 तप्य; D2 काव्यं; D8 तुष्य)मानमनोधृतिः; Ñ2 B त्वरितं(B1 °तः) स(Ñ2 *) महामुनिः(B1 °मतिः); D5 तथाममतो धृतिः (sic). ❀ Cg : कम्प्यमानः अनुकम्पायुक्ततया संपद्यमानः । यद्वा पौत्रस्नेहात्कम्पित इत्यर्थः । अथवा महाधृतेरपि कम्पितं हृदयमित्यर्थः ।; Ck : कम्प्यमानः अनुकम्पायुक्ततया संपा(प ?)द्यमानः ।; so also Ct. ❀ —d) Ñ1 V1.3 T4 महामुनिः; Ñ2 B महातपाः (for महानृषिः). D1.3.4 जगाम स महामुनिः.—For 2cd, Ś D2.5.8.9.12 subst.:

679* स च माहिष्मतीं द्रष्टुं जगाम सहसा मुनिः ।

3 a) D1.4 वायोर् (for वायु-). V3 B2 -वेगम् (for -मार्गम्).—b) B2 वात-; B3 वज्रि-; D4 वासु- (for वायु-).—Ś1 om. 3cd.—c) Ś3 D2.5.8.9.12 प्रायान् (for प्राप्तो).—d) D1.4 मुनिः; D5 द्विज- (for मनः-). Ñ B -संकल्प-; D1.4.8 T4 G2 -संपाति-; Cg.k.t as in text (for -संपात-). ❀ Cg.t : मनःसंपातविक्रमः मनो(Ct °नस्तुल्य)गतिः ।; Ck : विक्रमो गतिः. ❀

4 a) D2 सामरावति-; G (ed.) °वती- (for सोऽमरावति-). D2 -संकाशा; D3 -सकाशां (unmetric) (for -संकाशां). ❀ Cg : अमरावतिसंकाशामित्यत्र "ङ्यापोः संज्ञाछन्दसोर्बहुलम्" इति ह्रस्वः ।; Ck.t : अमरावतिसंकाशाम् ङ्यापोरिति(Ct °संकाशाम् आर्षो) ह्रस्वः. ❀ —b) D5 हर्ष- (for हृष्ट-). B2 M4.7 -[आ]कुलां; D2 [आ]वृता; M10 -[आ]युतां (for -[आ]वृताम्).—Note hiatus between c and d.—c) G2 M1 (also as in text) रम्याम् (for ब्रह्मा). Ś Ñ1 V1.3 D1–5.8.9.12 T4 विवेश ब्रह्मणः पुत्र.—d) Ñ2 B यथेंद्रस्य(B2 °श्च) (for इन्द्रस्येव).

5 a) B3 पात्रवंतम्; M3 पादचाराद् (for पादचारम्). B1 [आ]दित्यः.—b) Ñ2 B2–4 प्रविशंतं; M6 निष्पतंतं (for निष्पतन्तं). B3 सुदुर्जयं; T1.2 M3 महामुनिं; Ck.t as in text (for सुदुर्दशम्). B1 प्रविवेश सुदुःखितः. ❀ Cg : सुदुर्दशम् दुर्दर्शमिति यावत् ।; Ck : सुदुर्दशमिति । सुदुर्दर्शमिति यावत् ।; so also Ct. ❀ —For 5ab, Ś Ñ1 V1.3 D1–5.8.9.12 T4 subst.:

680* पादचारी यथादित्यः प्रतपन्सर्वतो दिशः ।

[ D5 * पितृवद् (for पादचारी). Ñ1 प्रभवन्; D2.8 प्रपतन् (for प्रतपन्). ]

—Note hiatus between c and d.—c) Ś1 V3 D8 सं-; Ś3 V1 D1–5.9.12 T4 M3 तं (for ते). D1.4 सम(D1 °*) भिज्ञाय. Ñ B विज्ञाय तमृषिं द्वा(B2 द्वाः) स्था(Ñ1 B1 °स्थो).—d) D6 अर्जुनस्य; T3 त्वर्जुनाय. Ñ1 B1 न्यवेदयत्. Ś V1.3 D1–5.8.9.12 T4 M3 द्वा(D8 द्वार [hypm.])स्थो(D5 M3 °स्था) राज्ञे न्यवेदयत्(D5 M3 °यन्).

6 a) V1 पुलस्त्यम्. Ś2.3 D1.3.4.12 इह (for इति). Ś V3 D1–5.8 M3.6 संप्राप्तः(D2 °सं); V1 D6.7.10.11 विज्ञाय; T4 M2.7–9 तच्छ्रुत्वा; M5 तं ज्ञात्वा; M10 संश्रुत्वा. D9 पुलस्त्यं प्रतिसंप्रा*म्; M1 पुलस्त्यमागतं श्रुत्वा.—b) Ś D1–5.8.12 प्राह तं; V1 प्राहुस्ते; V3 corrupt; D9 आह तं; D10.11 वचनाद् (for वचनं). V1.3 D6.9 हैहयाधिपं; T1.2 G M1.2.4–10 हेहयाधिपः. M3 इति श्रुत्वा तु हैहयः.—For 6ab, Ñ B subst.:

681* श्रुत्वा पुलस्त्यं संप्राप्तमर्जुनः सह मन्त्रिभिः ।

G. 7. 22. 7
B. 7. 33. 7
L. 7. 21. 7

पुरोहितोऽस्य गृह्यार्घ्यं मधुपर्कं तथैव च ।
पुरस्तात्प्रययौ राज्ञ इन्द्रस्येव बृहस्पतिः ॥ ७
ततस्तमृषिमायान्तमुद्यन्तमिव भास्करम् ।
अर्जुनो दृश्य संप्राप्तं ववन्देन्द्र इवेश्वरम् ॥ ८
स तस्य मधुपर्कं च पाद्यमर्घ्यं च दापयन् ।
पुलस्त्यमाह राजेन्द्रो हर्षगद्गदया गिरा ॥ ९

अद्येयममरावत्या तुल्या माहिष्मती कृता ।
अद्याहं तु द्विजेन्द्रेन्द्र यस्मात्पश्यामि दुर्दशम् ॥ १०
अद्य मे कुशलं देव अद्य मे कुलमुद्धृतम् ।
यत्ते देवगणैर्वन्द्यौ वन्देऽहं चरणाविमौ ॥ ११
इदं राज्यमिमे पुत्रा इमे दारा इमे वयम् ।
ब्रह्मन्किं कुर्म किं कार्यमाज्ञापयतु नो भवान् ॥ १२

[ B3 महर्षिम् (unmetric); B4 आयांतम् (for संप्राप्तम्). ] —$^{c}$) B1.3 शिरसा (for शिरसि). Ś Ñ V1 B2–4 D2.8.12 T4 G2.3 आदाय; V3 B1 D1.3–7.9–11 T1.2 M1.3 आघ्राय; M6 उत्क्षिप्य (for उद्धृत्य). —V3 illeg. for $^{d}$. —$^{d}$) D2.5.8.9.12 T4 M3 प्रत्यगच्छत्; D6.7 M6 प्रत्युद्गम्य; Cg.k.t as in text (for प्रत्युद्गच्छद्). Ś D2.5.8.9.12 स ब्रह्मजं; D6.7.10.11 T4 तपस्विनं; T2 M10 स तं (T2 ततो) द्विजं; G1 *बांधवं; M6 च ब्राह्मणं (for द्विजोत्तमम्). Ñ B ततः प्रत्युद्ययौ मुनिं; V1 ब्रह्मणः पुत्रमन्वगात्; D1.3.4 शीघ्रं प्रत्युद्य(D1 °त्थाय)यौ द्विजं; T1 G2.3 M1.8 प्रत्युद्गच्छत तं द्विजं; M5 प्रत्युद्गच्छति सत्वरं. ❀ Cg.k.t : प्रत्युद्गच्छत् प्रत्युदगच्छत्. ❀

**7** $^{a}$) D2 T3 पुरोहितं. Ś2.3 Ñ1 V1.3 D3.5.9.12 T3 प्र-; D1.4 T4 च; D8 स (for ऽस्य). Ś1 V3 D1.4 [अ]र्थं; D5.9 [अ]र्थ; T3 [अ]र्घं; M8 [अ]र्घ्यान् (for [अ]र्घ्यं). Ñ2 B गृहीत्वार्घ्यं (B1 °र्घं); D2 प्रगृह्यार्थं (for ऽस्य गृह्यार्घ्यं). —$^{b}$) D4 मधुपर्कं. Ñ2 B2.4 गां (for च). Ś Ñ1 V1.3 D1–5.8.9.12 च गां च (Ñ1 गाश्च) ह; M6 च मारिष. —$^{c}$) Ś V1 D2.8.9.12 पुरतः (for पुरस्तात्). V1 M5 राजन्; D1.3.4 प्राज्ञः (for राज्ञ). D5 पुरतः पुरतः प्रेक्ष्य. —D5 om. 7$^{d}$–8$^{c}$. —$^{d}$) Ś Ñ V1.3 B D1–4.6–12 T4 M6 शक्रस्य (for इन्द्रस्य).

**8** D5 om. 8$^{abc}$ (cf. v.l. 7). V3 lacuna for 8$^{ab}$. —$^{c}$) D1.3.4 प्रेक्ष्य (for दृश्य). D10.11 संभ्रांतो (for संप्राप्तं). Ś Ñ V1.3 B D2.8.9.12 T4 प्रेक्ष्य (Ñ2 B भृश) संभ्रांतो (T4 °तोषाद्). —$^{d}$) V1 संपश्य; G1 पन्नग-; M2.4.7.8 वंदते (for ववन्दे). D6 T1.2 G2.3 जितेंद्रिय (G2 °यम्) (for ववन्देन्द्र). Ś1 D8 द्रुतम्; D1.4 ब्राह्मण-; T3 [इं]द्रमिव; M1 तं मुनि-; M9 [अ]जमिव (for [इ]न्द्र इव). D4 M3 -[ई]श्वरः. Ś2.3 D12 चरणावृषेः; Ñ1 मुनिसत्तमं; Ñ2 B [अ]र्घं (B4 °र्घ्यं)पुरःसरः (B2.4 °रं) (for [इ]न्द्र इवेश्वरम्). ❀ Cg.t : ईश्वरं ब्रह्माणम् ।; Ck : ईश्वरं चतुर्मुखरुद्रम्. ❀

**9** $^{a}$) Ñ2 B D10.11 गां; V3 वै (for च). —$^{b}$) D1.3.4.8 G2 अर्घं (for अर्घ्यं). B3 पाद्यार्घ्यं च (for पाद्यमर्घ्यं). Ś D2.8.12 प्रदाप्य (D2 °य) च; Ñ1 निवेदयेत्; V1 T4 न्यवेदयत्; B3 D10.11 निवेद्य च; D1.4 M1 च दापयेत्; D5.9 तथैव च (for च दापयन्). —G2 repeats 9$^{cd}$ consecutively. —$^{c}$) Ś V1.3 D2.5.8.9.12 T4 प्राह (for आह). M8 राजेंद्र. Ñ2 B अब्रवीद्राजा (for आह राजेन्द्रो). —$^{d}$) G2 (both times) हर्षाद् (for हर्ष-).

**10** $^{a}$) Ś1 Ñ2 V1 D1.4–7.9–11 G1 M2.4.7–9 अद्यैवम् (V1 °व हि; G1 M2.4.7–9 °व मे); V3 पुरीयम् (for अद्येयम्). Ś V1 D1–5.8.9.12 T4 अमरावत्यास्. —$^{b}$) M8 तुल्यं (for तुल्या). Ś1 D8 पुरी; Ś2.3 V1 D1–5.9.12 T4 मम (for कृता). —$^{c}$) M7 त्वां (for तु). T4 अद्य चाहं; M6 अद्यैवाहं (for अद्याहं तु). D6.7.10.11 T3.4 M3.5 द्विजेंद्र (T3 M3.5 °द्रं) त्वां (T3 M3 त्वा); T1 G2 M1.7–9 द्विजेंद्रेंद्र. —$^{d}$) M6 यस्त्वां (for यस्मात्). T4 [अ]हं मुने (for दुर्दशम्). —For 10$^{cd}$, Ś Ñ V1.3 B D1–5.8.9.12 subst.:

682* अद्य चाहं द्विजेन्द्राभो यस्त्वां पश्यामि वेश्मनि ।

[ Ñ2 अपि (for अद्य). D2.8.9 अद्य वा (D2 °चैवा)हं. Ś2.3 D12 द्विजश्रेष्ठ (Ś3 °ष्ठो); Ñ1 B मनुष्येंद्रो; Ñ2 सुरेंद्रोस्मि; V1 द्विजेंद्रोपि; D1–5.9 द्विजेंद्रें(D5 °*)द्रो(D1 °*; D3 °द्र). B2 यस् (for यस्). D1.5 त्वा (for त्वां). Ñ1 (with hiatus) ईदृशं; Ñ2 B1.2.4 दुर्दृशं; V1 [अ]हं मुनिं; B3 त्वादृशं (for वेश्मनि). ]

**11** Note hiatus between $^{a}$ and $^{b}$. —$^{a}$) Ś1 V1 D7.8 ब्रह्मन्; D6 T4 G1.2 M4.7 दैवम् (for देव). D1.3.4 transp. कुशलं and देव. —$^{b}$) D1.4 यच्च (for अद्य). V3 D6.7.10.11 कुशलं व्रतं; B1 सफलं कुलं (for कुलमुद्धृतम्). —For 11$^{ab}$, Ñ2 subst.; while D7.10.11 T3.4 M3 ins. after 11$^{ab}$:

683* अद्य मे सफलं जन्म अद्य मे सफलं तपः ।

[ Note hiatus between the two halves. Ñ2 कुशलं व्रतं (for सफलं तपः). ]

—$^{c}$) V1 अद्य; T1 यत्तैर्; M6 यतो (for यत्ते). Ś1 Ñ V1.3 B D1–5.8.9 M6 -शतैर्; Ś2.3 D12 -वरैर् (for -गणैर्). —$^{d}$) D6.7.10.11 तव; M1 उभौ (for इमौ). G2 चरणांबुजौ (for चरणाविमौ).

**12** $^{b}$) D4 इमा (for first इमे). Ñ2 B तथा; M6 अयं (for second इमे). B2 बलं; M6 त्वहं (for वयम्). —For subst. in Ś etc. cf. v.l. 13. —$^{c}$) D1.3.4 करोमि; D10.11 किं कुर्मः; M2.4.7 किं कर्म; K(ed.) किं कुर्मि (for किं कुर्म); Ñ1 B1.3 कुर्मस्ते; Ñ2 B2.4 कुर्महे (for कुर्म किं). V3 किं कार्यं विप्र किं कुर्म. ❀ Cg : किं कुर्मि किं करवाणि ।; Ck : किं

तं धर्मेऽग्निषु भृत्येषु शिवं पृष्ट्वाथ पार्थिवम् ।
पुलस्त्योवाच राजानं हैहयानां तदार्जुनम् ॥ १३
राजेन्द्रामलपद्माक्ष पूर्णचन्द्रनिभानन ।
अतुलं ते बलं येन दशग्रीवस्त्वया जितः ॥ १४
भयाद्यस्यावतिष्ठेतां निष्पन्दौ सागरानिलौ ।
सोऽयमद्य त्वया बद्धः पौत्रो मेऽतीवदुर्जयः ॥ १५
तत्पुत्रक यशःस्फीतं नाम विश्रावितं त्वया ।
मद्वाक्याद्याच्यमानोऽद्य मुञ्च वत्स दशाननम् ॥ १६
पुलस्त्याज्ञां स गृह्याथ अकिंचनवचोऽर्जुनः ।
मुमोच पार्थिवेन्द्रेन्द्रो राक्षसेन्द्रं प्रहृष्टवत् ॥ १७
स तं प्रमुक्त्वा त्रिदशारिमर्जुनः
प्रपूज्य दिव्याभरणस्रगम्बरैः ।
अहिंसकं सख्यमुपेत्य साग्निकं
प्रणम्य स ब्रह्मसुतं गृहं ययौ ॥ १८

G. 7. 22. 18
B. 7. 33. 18
L. 7. 21. 18

कुर्मे किं करवामेति. ❀ —$^{d}$) $T_{1.2}$ $G_{2.3}$ मे; $M_1$ मां; $M_{10}$ मा (for नो). $D_{1.3.4}$ आज्ञापय ममानघ.

13 $V_3$ illeg. for $^{ab}$. —$^{a}$) $M_{8.10}$ स; $M_9$ तद् (for तं). $T_3$ स तं धर्माग्नि-; $G_1$ $M_6$ धर्मेष्वग्निषु (for तं धर्मेऽग्निषु). $D_{6.7.10.11}$ $M_9$ पुत्रेषु (for भृत्येषु). —$^{b}$) $D_{6.7.10.11}$ $T_{1.2}$ $G_3$ $M_{2.3.6}$ च; $G_1$ ह; $M_{10}$ तु (for [ अ ]थ). $G_2$ $M_8$ पार्थिव:. —For $12^{c}$–$13^{b}$, Ś $V_1$ $D_{2.5.8.9.12}$ $T_4$ subst.; while $\tilde{N}_2$ B $D_{1.3.4}$ subst. l. 2 only for $13^{ab}$:

684* किं कार्यं विप्र किं कुर्मे आज्ञापय ममानघ ।
धर्मे चाग्निषु भृत्येषु पृष्ट्वा तं कुशलं यथा ।

[ (l. 1) $D_5$ ब्रूहि; $T_4$ देव (for विप्र). $V_1$ ते (for second किं). $D_2$ कर्मे (for कुर्मे). $D_5$ ममा * *; $D_8$ ननाम च (for ममानघ). —(l. 2) Ñ $B_{3.4}$ तं धर्मेग्निषु; $B_1$ तं धर्मेष्वपि (for धर्मे चाग्निषु). $B_4$ राज्ये च (for भृत्येषु). $B_2$ तच्छ्रुत्वा नृपतेर्वाक्यं; $D_5$ नथाधर्मेवग्निक्षत्येषु (corrupt) (for the prior half). $D_{1.2.4.12}$ दृष्ट्वा (for पृष्ट्वा). $D_8$ *गतं (for पृष्ट्वा तं). $\tilde{N}_1$ $V_1$ $T_4$ तदा; $D_{1-4}$ तथा (for यथा). $\tilde{N}_2$ B पृष्ट्वा कुशलमव्ययं (for the post. half).]

—$^{c}$) Ñ B $M_8$ प्रा( $M_9$ त्वा)ह (for [ उ ]वाच). Ś $V_{1.3}$ $D_{1-5.8.9.12}$ उवाच विप्रो राजानं. ❀ Cg.k.t : पुलस्त्योवाचेति संधिरार्षः( Ck °धिश्छान्दसः). ❀ —$^{d}$) Ś $V_1$ $D_{1-5.8.9.12}$ ततो; $\tilde{N}_2$ $V_3$ $D_{6.7.10.11}$ $T_1$ $M_5$ तथा (for तदा). $T_3$ हैहयाधिपमर्जुनं.

14 $^{a}$) $D_8$ [ आ ]यत-; $T_{1.2.4}$ $G_3$ $M_{1.6.10}$ [ अं ]बुज- (for [ अ ]मल-). $Ś_3$ $V_1$ $D_{2.5.8.9}$ $T_{1.2.4}$ $G_{2.3}$ $M_{1.5.6.8.10}$ -पत्राक्ष (for -पद्माक्ष). $Ś_{1.2}$ Ñ $V_3$ B $D_{1.3.4.12}$ राजन्कमलपत्राक्ष; $D_{6.7.10.11}$ नरेंद्रांबुजपत्राक्ष. —$^{b}$) $T_3$ पूर्णेंदुसदृशानन. —$^{c}$) $D_6$ अचलं; $G_{2.3}$ $M_{10}$ अतुल्यं (for अतुलं). $M_9$ तु (for ते). —After 14, $D_{11}$ ins. रामाय नमः.

15 $^{a}$) Ś $D_{8.12}$ तु तिष्ठेते; $V_{1.3}$ $D_{2.5-7.9-11}$ $T_{2.3}$ [ उ ]प( $V_1$ $D_{2.5.9}$ तु)तिष्ठतां (for [ अ ]वतिष्ठेतां). $D_{1.3.4}$ भयात्तु यस्य तिष्ठेते. —$^{b}$) $D_{1.5.12}$ निस्पंदौ (for निष्पन्दौ). $V_3$ भास्करानिलौ; $B_3$ सागराविमौ (for सागरानिलौ). —$^{c}$) $V_3$ $D_{7.10.11}$ मृधे (for अद्य). —$^{d}$) $Ś_1$ $M_1$ पुत्रो (for पौत्रो). $M_6$ सो (for मे). $D_{6.7.10.11}$ रण- (for ऽतीव-). $D_5$ यो मेतीव सुदुर्जयः.

16 $^{a}$) $\tilde{N}_1$ तं; $T_4$ यत् (for तत्). $Ś_{1.2}$ $V_{1.3}$ $T_{1.3}$ G $M_{1.5}$ पीतं; $M_{2-4.6.7}$ प्राप्तं (for -स्फीतं). $M_{10}$ यशस्यं च (for यशःस्फीतं). $D_{7.10.11}$ Ck.t पुत्रकस्य यशः पीतं. —$^{b}$) $\tilde{N}_2$ B लोके (for नाम). ❀ Cg : पुत्रकस्य मदीयबालकस्य नाम विश्रावितं रावणजिदिति नाम त्वया त्रैलोक्ये विश्रावितम् ।; Ck : पुत्रकस्य मदीयबालस्य रावणस्य यशः पीतं त्वदीयं नाम च रावणजिदित्येवं रूपं त्वया त्रैलोक्ये विश्रावितम् ।; Ct : पुत्रकस्य मदीयबालस्य रावणस्य यशः पीतं नाशितम्, स्वीयं नाम च रावणजि दित्येवं त्रैलोक्ये विश्रावितम्. ❀ —$V_3$ illeg. for $^{cd}$. —$^{c}$) $D_6$ $M_{6.7}$ वाच्यमानोद्य( $D_6$ °पि) (for याच्यमानोऽद्य). Ś Ñ $V_1$ B $D_{1-5.8.9.12}$ $T_4$ मद्वाक्यं मानयाद्य त्वं( $\tilde{N}_2$ B °यस्वद्य; $D_5$ °याद्य *). —$^{d}$) $\tilde{N}_1$ त्वं तद्; $\tilde{N}_2$ $B_{1.3.4}$ तात; $B_2$ $D_{1.3.4}$ तावद्; $M_8$ मुंच; Cg k वत्सं (for वत्स). Ś $V_1$ $D_{2.5.8.9.12}$ $T_4$ मुच्यतां हि दशाननः.

17 Note hiatus between $^{a}$ and $^{b}$. —$^{a}$) $D_{1.3.4}$ -[ उ ]क्तं (for -[ आ ]ज्ञां). $D_{6.7.10.11}$ $M_7$ प्र-; $M_8$ सु- (for स). Ś $\tilde{N}_1$ $V_{1.3}$ $D_{1-5.8.9.12}$ $T_4$ प्रगृह्याशु; $\tilde{N}_2$ B गृहीत्वा स; $T_{1-3}$ $G_{2.3}$ $M_3$ स( $T_2$ $G_2$ सु) संगृह्य (for स गृह्याथ). —$^{b}$) $D_{6.7.10.11}$ $G_2$ $M_1$ न किंचन; $T_{1-3}$ $G_{1.3}$ नोचे किंचिद् (for अकिंचन-). Ś $\tilde{N}_1$ $V_{1.3}$ $D_{1-5.8.9.12}$ $T_4$ प्रहृष्टः स( $D_8$ सु) नृपो( $Ś_3$ नरो)त्तमः ( $D_{1.3.4}$ नराधिपः); $\tilde{N}_2$ B नाकिंचिद्वचनोर्जुनः; $M_3$ किंचिन्नावोचदर्जुनः. ❀ Cv : अकिंचनवचः अविद्यमानकिंचिद्वचः । किंचिदप्यवदन्नित्यर्थः ।; Cg : किंचिद्वचोऽपि नोवाच किंचन अविद्यमानं किंचिद्वचनं न किंचिदप्यवददित्यर्थः; अपि तु क्रिया केवलमुत्तरमिति मुमोचेत्यर्थः ।; so also Ck.t. ❀ —$^{c}$) $M_6$ अमुचत् (for मुमोच). $G_1$ राक्षस- (for पार्थिव-). $D_6$ पार्थिवइंद्रो (metri causa) (for °वेन्द्रेन्द्रो.). Ś Ñ $V_{1.3}$ B $D_{1.2.4.5.8.9.12}$ $T_4$ अमुं( $D_5$ °मु)चत्पार्थिवेंद्रो हि( Ñ B $D_4$ °द्रस्तं; $D_1$ °द्र *; $T_4$ °द्रोपि); $D_{10.11}$ मुमोचैव पार्थिवेंद्रो. —$^{d}$) $T_3$ प्रहृष्टवान्; Cg.k.t as in text (for प्रहृष्टवत्). ❀ Cg.k : प्रहृष्टवत् ब्रह्मणा प्रार्थनीयोऽ( Ck °णा च प्रार्थनीयकृत्यवान )स्मीति संतोषयुक्तः सन् ।; Ct : प्रहृष्टवद्ब्रह्मपुत्रो मां प्रार्थितवानिति संतोषयुक्तः सन्. ❀ —For $17^{cd}$, $D_3$ subst.:

685* अमुञ्चद्राक्षसेन्द्रं स पार्थिवेन्द्रः प्रहृष्टवान् ।

18 $^{a}$) Ś $\tilde{N}_2$ $V_{1.3}$ $B_{1-3}$ D $T_4$ $M_{3.6}$ वि( $D_{1.3.4.6.7.10.11}$ प्र)मुच्य( $M_6$ °क्त्वा); $B_4$ व्यमुंचत्; $G_1$ च मुक्त्वा

G. 7. 22. 19
B. 7. 33. 19
L. 7. 21. 19

पुलस्त्येनापि संगम्य राक्षसेन्द्रः प्रतापवान् ।
परिष्वङ्गकृतातिथ्यो लज्जमानो विसर्जितः ॥ १९
पितामहसुतश्चापि पुलस्त्यो मुनिसत्तमः ।
मोचयित्वा दशग्रीवं ब्रह्मलोकं जगाम सः ॥ २०
एवं स रावणः प्राप्तः कार्तवीर्यात्तु धर्षणाम् ।
पुलस्त्यवचनाच्चापि पुनर्मोक्षमवाप्तवान् ॥ २१
एवं बलिभ्यो बलिनः सन्ति राघवनन्दन ।
नावज्ञा परतः कार्या य इच्छेच्छ्रेय आत्मनः ॥ २२
ततः स राजा पिशिताशनानां
सहस्रबाहोरुपलभ्य मैत्रीम् ।
पुनर्नराणां कदनं चकार
चचार सर्वां पृथिवीं च दर्पात् ॥ २३

इति श्रीरामायणे उत्तरकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

---

(for प्रमुक्त्वा). B1.3 T3 M6.7 त्रिदशारिमर्द(B3 °वधं)नः (B1 T3 °नं) (for त्रिदशारिमर्जुनः). —[b]) Ś D5.8.9 प्रहस्य; V1 B3 प्रगृह्य; B2 प्रयुज्य; D2 प्रदास्य; M3.6 संपूज्य (for प्रपूज्य). B1.3.4 दिव्याभरणैः(B4 °णानि च) (for दिव्याभरण-). Ś D2.8.9.12 T4 -[अं]बरस्रजं(T4 °जा); Ñ V1.3 B2 -[अं]बरैः(V1 °र) शुभैः(Ñ1 V1 स्रजैः; B2 शनैः); B1 स्वलंकृतैः; B3 कुले शुभैः; B4 तत्र तत्र; D5 -* * स्रजं; M6 -[अं]बराशनैः (for -स्रगम्बरैः). —[c]) Ñ2 B अहिंसया (for अहिंसकं). M7.8 सत्यम् (for सख्यम्). M1 इतोग्निसाक्षिकं (for उपेत्य साग्निकं). ❀ Cv : अहिंसकं परस्परहिंसाहीनम् ।; Cg : परस्परहिंसाप्रवृत्तिनिवारणसाधनभूतं साग्निकमग्निसाक्षिपूर्वकम् ।; so also Ck.t. ❀ —[d]) Ñ1 V1 प्रगृह्य (for प्रणम्य). Ś V3 D2–4.8.12 च; Ñ1 V1 B2 D1.6.7.10.11 T4 M3 तं; D5.9 om. (for स). Ñ1 D1 ब्रह्मसुतो (for ब्रह्मसुतं). B व्यसर्जयत्; M5 ययौ पुरं (for गृहं ययौ).

19 V3 om. 19. —[a]) Ś V1 D2.5.8.9.12 G2 M1.3.5 [अ]भि-; T4 [अ]थ; Cg.k.t as in text (for [अ]पि). D6 संयुक्तो; D7.10.11 T3 Ct संत्यक्तो; T1.2 G M1.2.4.5.7.9.10 संपूज्य; M6 संत्यज्य; M8 संप्राप्तो (for संगम्य). ❀ Cg.k : पुलस्त्येनेति । अपि(Ck °नापीत्यपि)नार्जुनेनापीति समुच्चीयते ।; Ct : पुलस्त्येनापि संत्यक्तो गच्छ लङ्कामित्यनुज्ञातः । अपिनार्जुनेनापि त्यक्तो बन्धनान्मुक्तः. ❀ —[b]) Ś D8.12 सु(D8.12 स) रोषणः; Ñ V1 B D1–4.9 T4 M6 स(B2 सु) रावणः (for प्रतापवान्). D5 राक्षसेंद्रमुपागतः. —[c]) Ñ2 B3 D6.7.10.11 M10 परिष्वक्तः; B2 परियुज्य; B4 T1.2 G2.3 M1.5 परिष्वज्य (for परिष्वङ्ग-). ❀ Cg.k.t : कृतातिथ्य इति(Ct °थ्यः) । अर्जुनेनेति शेषः. ❀ —[d]) B1 [ऽ]वसर्जितः; B4 D7.10.11 विनिर्जितः (for विसर्जितः).

20 [b]) V1 D6.7.10.11 T1–3 G M1.3.5.8–10 -पुंगवः (for -सत्तमः). —[c]) Ñ2 B D1.3.4 M6 मोक्षयित्वा (for मोचयित्वा). —[d]) Ś Ñ V1.3 B D T3 ह; T4 हि (for सः).

21 [a]) D3.5 om. स (subm). Ś D1–5.8.12 T4 प्राप्य (for प्राप्तः). —[b]) Ś Ñ1 V1.3 D1–3(m.).4.5.7–12 T4 M3.6 प्रधर्षणं(Ś3 V3 °णां; Ñ1 °णात्); B4 D6 T2.3 G2.3 M1.2.4.7.8.10 तु(T3 च) धर्षणं (for तु धर्षणाम्). M5 कार्तवीर्येण धर्षणं. —[c]) T4 राम; G1 चैव (for चापि). —[d]) D2 मुनेर्; M2.4.7.8 विनिर्-; M5 नृपान् (for पुनर्). Ś1.2 Ñ1 D1.3.4.8 अवाप्नुयात्; Ś3 D12 अवाप ह(D12 हि) (for अवाप्तवान्). D6.7.10.11 पुनर्मुक्तो महाबलः. ❀ Cv : विनिर्मोक्षमवाप्तवानिति पाठः. ❀

22 [b]) V1 T4 राघवसत्तम. D1.3.4 पृथिव्यां संति राघव. —[c]) D3 तावत्सा; T4 नावज्ञाम् (for नावज्ञा). Ñ1 D1.3.4 तु परे; Ñ2 V3 B D10.11 हि परे; V1 T4 अ(V1 त्व)परे; D6.7 [अ]पि परे; G2 M10 रिपवे; G3 परितः; M6 [अ]रिवले (for परतः). Ś D2.8.9.12 नावज्ञां तु(Ś1 °ज्ञानं) परे कुर्याद्; D5 अज्ञानां परे कुर्याद् (sic). —[d]) Ś3 Ñ2 B1.2.4 D1.3.4.12 T3.4 M2.7.9 यदीच्छेच्च; G2 M10 इच्छेच्चेच्; M4 यदि चेच्; G (ed.) यदीच्छेः (for य इच्छेच्). Ñ2 B1 D2.5.7 G1 श्रेयम्; D1.3.4 जयम्; K (ed.) प्रियम् (for श्रेय). ❀ Ct : यः श्रेय इच्छेत्तेन परे परस्मिन्नवज्ञा न कार्या. ❀

23 [a]) Ś1 D8 पिशिताशितानां; D1 पिशिताशताभां (sic). —[b]) G2 उपतुल्य-; M1 प्रतिलभ्य (for उपलभ्य). M3–8 मैत्रं (for मैत्रीम्). Ś Ñ1 V1.3 D1–5.8.9.12 सहस्रबाहुं परिर(Ñ1 V1 D1.3.4 प्रतिल)भ्य मित्रं; Ñ2 B सहस्रबाहुं समवेक्ष्य मित्रं(Ñ2 धार्मिकं). —[c]) B3 D6.7.10.11 T4 नृपाणां (for नराणां). —V3 lacuna for [d]. —[d]) B2 D5 om. (hapl.) चचार. Ñ1 B4 D9 स (for च). M4 दर्पवान् (for दर्पात्).

Colophon. —*Kāṇḍa name* : Ś1 V3 D2.5.9 M7 om. —*Sarga name* : Ś Ñ V1.3 B D5.8 रावणमोक्षः(Ñ1 °क्षं; B3 °क्षणं); Ś2.3 D1–4.9.12 सहस्रार्जुनबद्ध (D1.4 °युद्ध) रावणमोक्षः(D1.3.4 °क्षणं). —*Sarga no.* (figures, words or both) : Ś Ñ1 V3 B1–3 D2 om.; Ñ2 B4 D1.3–5 M6 22; V1 18; D8.9 T4 21; D12 20; T3 38. —After colophon, T4 concludes with श्रीरामार्पणमस्तु; G M1.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

# ३४

अर्जुनेन विमुक्तस्तु रावणो राक्षसाधिपः ।
चचार पृथिवीं सर्वामनिर्विण्णस्तथा कृतः ॥ १
राक्षसं वा मनुष्यं वा शृणुते यं बलाधिकम् ।
रावणस्तं समासाद्य युद्धे ह्वयति दर्पितः ॥ २
ततः कदाचित्किष्किन्धां नगरीं वालिपालिताम् ।
गत्वाह्वयति युद्धाय वालिनं हेममालिनम् ॥ ३
ततस्तं वानरामात्यस्तारस्तारापिता प्रभुः ।
उवाच रावणं वाक्यं युद्धप्रेप्सुमुपागतम् ॥ ४
राक्षसेन्द्र गतो वाली यस्ते प्रतिबलो भवेत् ।
नान्यः प्रमुखतः स्थातुं तव शक्तः प्लवंगमः ॥ ५
चतुर्भ्योऽपि समुद्रेभ्यः संध्यामन्वास्य रावण ।
इमं मुहूर्तमायाति वाली तिष्ठ मुहूर्तकम् ॥ ६
एतानस्थिचयान्पश्य य एते शङ्खपाण्डुराः ।
युद्धार्थिनामिमे राजन्वानराधिपतेजसा ॥ ७
यद्वामृतरसः पीतस्त्वया रावण राक्षस ।
तथा वालिनमासाद्य तदन्तं तव जीवितम् ॥ ८    G. 7. 23. 8 B. 7. 34. 8 L. 7. 22. 8

## 34

☞ V2 missing for Sarga 34 (cf. v.l. 7.12.2). Ś Ñ V1.3 B D1-5.8.9.12 T3.4 M6 read Sargas 7.31-34 before Sarga 7.20 (T3 alone repeating them here).

1 a) M6 [ए]वमुक्तस्. —b) Ś Ñ1 V1 D1-5.8.12 T4 M1 राक्षसेश्वरः; V3 नाम वीर्यवान्. —c) Ñ2 B2.3 कृत्स्नाम्. —d) Ś1 D8 अविषण्णस्; B3 अनुद्विग्नस् (for अनिर्विण्णस्). D11 reads तथा कृतः in marg. M3 तदा; Ck as in text (for तथा). V1 D3 T4 युधि; Ck.t as in text (for कृतः). M6 इच्छन्विजयमात्मनः.

2 D1 om. 2. —a) Ñ1 प्लवंगं (for राक्षसं). D10 reads second वा in marg. B3 M6 राक्षसाद्वा (M6 °नां) मनुष्याद्वा (M6 °णां). —b) Ś Ñ1 V1.3 D2-5.8.9.12 T4 यं शृणोति; Ñ2 B श्रुतवान्यं (B2.3 °न्यद्). —c) Ñ2 B4 राक्षसस्तं; B1.3 राक्षसः (B3 °सं) स; B2 स राक्षसः (for रावणस्तं). —d) M6 दारुणः (for दर्पितः). Ś Ñ1 V1.3 D2-5.8.9.12 T4 युद्धायाह्वयते हि तं (Ñ1 D2-5 T4 सः); Ñ2 B M3 G (ed.) युद्धायाह्वयति (G [ed.] °ते) स्म तं (Ñ2 °ति * सः; M3 °तीति सः). ✻ Cg : युद्धे युद्धनिमित्तम् । ह्वयति आह्वयति स्म ।; Ck.t : युद्धे ह्वयति (Ck °यतीति) । युद्धनिमित्तमाह्वयतीत्यर्थः. ✻

3 c) Ś Ñ1 V1 B D1-5.8.9.12 T4 [आ]ह्वयत. Ś V3 D1-4.8.12 युद्धार्थं. —After 3, B2 ins. :

686* तं च वै वानरं मत्वा बलहीनं स राक्षसः ।

4 a) Ś1 D6.7.10.11 तु (for तं). Ś1.2 Ñ1 V1.3 D10.11 T1 वानरामात्यास्; T3 G1 M3 वालिनोमात्यस्. —b) G1 तस्य (for तारस्). Ś1.2 Ñ1 V1.3 D1.2.4.5.8.9 -[अ]धिपः प्रभुः; Ś3 D3.12 T4 M5.6 -[अ]धिपप्रभः; Ñ2 B -[अ]धिपोपमः (for -पिता प्रभुः). —c) D6.7.10.11 वानरो (for रावणं). Ś V1.3 D2.5.8.9.12 T4 वीरो; D1.3.4 राम. —d) D1 समागतं. ✻ Cv : तारस्तारापितेति । अत्र पितृव्यत्वादिसंबन्धविशेषेण तारस्य पितृव्यत्वमवगन्तव्यम् । सर्वत्र सुषेणस्यैव पितृत्वकथनात् ।; Cg.k : वानरामात्यः वालिनोऽमात्यः मन्त्री तार उवाच । तथा तारापिता सुषेणश्चोवाच । प्रभुर्युवराजः सुग्रीवश्चोवाच ।; Ct : तार एकः । तारापिता सुषेणः प्रभुर्युवराजः सुग्रीवश्चोवाच. ✻

5 a) M6 सो वै (for वाली). —b) Ś D8.12 योसौ; Ñ1 तव (for यस्ते). T1.2 तुल्यः प्र-; T3 G2.3 M1.5.6.8 तुभ्यं प्र-; G1 M3.7.10 त्वत्तः प्र-; Cg.k.t as in text (for ते प्रति-). Ñ1 मृधे (for भवेत्). Ñ2 B यस्तव प्रबलो (Ñ2 B2.3 °वरो) मृधे. ✻ Cg : ते तुभ्यम् । प्रतिबल इति, युद्धं दातुमिति शेषः ।; so also Ck.t. ✻ —c) D6.7.10.11 कोन्यः. —d) B3 पुरंगवः (sic); M5 प्लवंगमात्. —After 5, T1.2 M3 ins. :

687* ऋते वानरशार्दूलाद्वालिनो हेममालिनः ।

6 a) M6 हि (for ऽपि). Ś Ñ V1.3 B D1-5.8.9.12 T4 चतुर्ष्वपि समुद्रेषु. —b) Ñ1 गत्वा स; D5 अध्यास्त (for अन्वास्य). —D5 om. 6c-7b. —c) B2 D6.7.10.11 T4 G1 M1.6 इदं. Ś V3 D1-4.8.9.12 क्षणमिह (D1.3.4 °व) (for मुहूर्तम्). Ñ1 V1 इदं क्षणमुपायाति. —d) G2 बली (for वाली). ✻ Ct : चतुर्भ्यः समुद्रेभ्यश्चतुर्षु समुद्रेषु । संध्यां सन्ध्याध्येयदेवतां ब्रह्मरूपामन्वास्य ध्यात्वेदं मुहूर्तमस्मिन्मुहूर्ते आयाति. ✻

7 D5 om. 7ab (cf. v.l. 6). M2 om. 7b-8c. —b) B2 यत्र ते (for य एते). B2.4 T1 G M1.3-5.7-10 -पांडराः. —For 7ab, Ś Ñ1 V1.3 D1-4.8.9.12 subst. :

688* पश्यस्यस्थीनि यान्येव महान्ति बलिनामपि ।

[ D1.3.4 पश्य हि (D4 तु) (for पश्यसि). V3 परेषां (for महान्ति). Ñ1 V1 D1.3.4 वाप्ये (Ñ1 V1 यान्ये; D4 वाप्ये) तान्यन्येषां (for यान्येव महान्ति). ]

—c) Ś Ñ1 V1.3 D1-5.8.9.12 दृश्यंते शंख (Ś2.3 सार्व; D8.12 शाव) शुद्धानि (D5 °भ्राणि). —d) Ñ1 ताराधिपतितेजसा.

8 M2 om. 8abc (cf. v.l. 7). V3 lacuna for a. —a) B अद्यामृत-; D1.4.5 यद्यमृतो (for यद्वामृत-). D3

G. 7. 23. 10
B. 7. 34. 10
L. 7. 22. 9

अथवा त्वरसे मर्तुं गच्छ दक्षिणसागरम् ।
वालिनं द्रक्ष्यसे तत्र भूमिष्ठमिव भास्करम् ॥ ९
स तु तारं विनिर्भर्त्स्य रावणो राक्षसेश्वरः ।
पुष्पकं तत्समारुह्य प्रययौ दक्षिणार्णवम् ॥ १०
तत्र हेमगिरिप्रख्यं तरुणार्कनिभाननम् ।
रावणो वालिनं दृष्ट्वा संध्योपासनतत्परम् ॥ ११
पुष्पकादवरुह्याथ रावणोऽञ्जनसंनिभः ।
ग्रहीतुं वालिनं तूर्णं निःशब्दपदमाद्रवत् ॥ १२
यदृच्छयोन्मीलयता वालिनापि स रावणः ।
पापाभिप्रायवान्दृष्टश्चकार न च संभ्रमम् ॥ १३

---

रसोमृतः ( for [ अ ]मृतरसः ). Ś $D_{2.8.9.12}$ भवे( $D_2$ ताव )-त्पीतोमृतरसस् ; Ñ$_1$ $V_1$ पीतं यद्यमृतरसं. —$^{b}$) Ñ$_2$ त्वयाद्य रजनीचर; B त्वया यद्यपि रावण; $T_4$ त्वया यदि निशाचर. —$^{c}$) $D_{6.7.10.11}$ T $M_1$ Cg.t तदा; Ck तथा ( as in text ). Ś Ñ $V_{1.3}$ B $D_{1-5.8.9.12}$ तथापि वालिनं( Ś$_1$ $D_8$ रावणं [ sic ]; $D_2$ बलिनं ) प्राप्य. —$^{d}$) $V_1$ न भवेत् ; $B_1$ तदस्तं; $T_1$ $M_3$ दुर्लभं. $D_{12}$ चैव ( for तव ). $B_2$ जीवनं. ❀ Cg : यद्वेति । तदा तथापि वालिनमासाद्य तव जीवितं तदन्तं तत्समीपप्राप्तिपर्यन्तमित्यर्थः ।; Ck : यद्वा यद्यपि अमृतरसोऽपि पीतो भवतु तथा तथापि वालिनमासाद्य तव जीवितं तदन्तं तत्समीपप्राप्तिपर्यन्तमित्यर्थः ।; Ct : यद्वेति यद्यप्यर्थे । यद्यप्यमृतरसः पीतो भवति तदा तथापि वालिनमासाद्य तव जीवितं तदन्तं तत्समीपगमनपर्यन्तम्. ❀ —After 8, Ñ $V_3$ B $D_{6.7.10.11}$ S ins. :

689* पश्येदानीं जगच्चित्रमिह विश्रवसः सुत ।
इमं मुहूर्तं तिष्ठस्व दुर्लभं ते भविष्यति ।

[ ( l. 1 ) Ñ$_2$ $B_3$ $D_{10.11}$ इमं ( for इह ). $D_{6.7}$ $T_4$ इह बलं तस्य ( for जगच्चित्रमिह ). Ñ$_1$ $V_3$ $B_{2.4}$ $M_6$ इदं( $V_3$ इमं ) विश्रवसा-( Ñ$_1$ °वआ )त्मज ( for the post. half ). $B_1$ ( with hiatus ) जगच्चित्रमिदं पश्य इदानीं विश्रवात्मज. —( l. 2 ) Ñ $V_3$ $D_{10.11}$ $T_4$ $M_{4-7}$ इदं ( for इमं ). Ñ $B_{1-3}$ $M_6$ पश्याद्य; $B_4$ पश्चात्तु; G ( ed. ) संप्राप्य ( for तिष्ठस्व ). $M_1$ तव जीवितं ( for ते भविष्यति ). ]

—After 8, $D_3$ reads erroneously $42^{c}$–44, repeating $42^{cd}$ in its proper place.

9 $^{a}$) $D_{3.8}$ गंतुं; $D_5$ कर्तुं; $D_{12}$ सर्तुं. —$^{b}$) Ñ$_2$ B $M_6$ याहि. Ś Ñ$_1$ $V_{1.3}$ $D_{1-4.8.9.12}$ $T_4$ दक्षिणं गच्छ ( for गच्छ दक्षिण- ). —$B_4$ om. $9^{cd}$. —$^{c}$) $G_1$ प्रेक्ष्यसे; $M_{2.4.5.7.9}$ प्रेक्षसे; $M_8$ द्रक्ष्यते ( for द्रक्ष्यसे ). Ś $V_{1.3}$ $D_{1-5.8.9.12}$ $T_4$ ह( $D_{1.4.5}$ अ )रिं द्रक्ष्यसि तत्र त्वं ( $D_9$ $T_4$ °त्रस्थं ). —$^{d}$) Ś $V_3$ $D_{1-5.8.9.12}$ $T_3$ $G_{1.3}$ $M_{2-9}$ भूमिस्थम्( $G_3$ °स्थ ). $V_3$ $D_{6.7.10.11}$ पावकं ( for भास्करम् ).

10 $^{a}$) Ś Ñ $V_{1.3}$ $B_1$ $D_{1.3-5.8.9.12}$ $T_4$ स तं; $M_6$ ततस्; Cg.k as in text ( for स तु ). $D_2$ तु ( for वि- ). ❀ Cg : तारं तारादीन् । यद्वा पूर्वं तार एवोक्तवान् । तस्य तारापितृत्वं संबन्धविशेषात् ।; Ck.t तारं तारादीनित्यर्थः. ❀ —$^{b}$) Ñ $B_{2.4}$ $M_{2.4.5.7}$ राक्षसाधिपः; $D_{6.7.10.11}$ लोकरावणः. —$^{c}$) Ś $V_1$ $D_{2.3.8.9.12}$ $T_4$ तु; $V_3$ स; $D_{1.4.5}$ च; $M_{4.9}$ तं ( for तत् ). Ñ B ततः पुष्पकमारुह्य. —$^{d}$) $T_4$ प्रयातो. $G_2$ $M_{10}$ दक्षिणां दिशं.

11 $^{a}$) Ś $D_{2.3.8.9.12}$ -गिरिं प्राप्य; $B_3$ -गिरिसख्यं. —$^{b}$) $V_3$ -समप्रभं ( for -निभाननम् ). —$^{c}$) $M_1$ बलिनं ( for वालिनं ). $D_5$ प्रेक्ष्य. $B_1$ [ ऽ ]पश्यत हरिं ( for वालिनं दृष्ट्वा ). Ś Ñ $V_{1.3}$ $B_{2-4}$ $D_{1-4.8.9.12}$ $T_{3.4}$ वालिनं रावणोपश्यत् ( $D_2$ °णः पश्यन् ; $T_3$ °णो दृष्ट्वा ). —$^{d}$) $D_3$ -तर्पणं ( for -तत्परम् ).

12 Ñ$_2$ B read 12 ( along with 690* ) after 692*. $D_{11}$ reads 12 twice. —$^{a}$) Ś Ñ$_1$ $V_{1.3}$ $D_{1-5.8.9.12}$ $T_{1.2}$ $G_{2.3}$ $M_{6.10}$ [ आ ]शु ( for [ अ ]थ ). —$^{b}$) Ñ$_2$ $B_{3.4}$ -सप्रभः ( for -संनिभः ). —$^{c}$) Ñ$_2$ B पश्चाद् ( for तूर्णं ). —$^{d}$) Ñ$_2$ B अशब्द-; G ( ed. ) अशब्दः. $M_{2.4.7.9}$ Ck -पदः; Cg.t as in text ( for -पदम् ). Ś Ñ$_1$ $V_1$ $D_{2.3.8.12}$ $T_{3.4}$ $M_5$ आव्रजत् ; Ñ$_2$ $D_{5.9-11}$ ( both times ) $T_2$ अव्रजत् ; $V_3$ $B_{1.4}$ $M_8$ अद्रवत् ; $B_2$ om. ( for आद्रवत् ). $D_{6.7}$ निःशब्देन पदाव्रजत्. ❀ Cv : तत्रेत्यादावेको वालिशब्दो यौगिकः. ❀ Cg : निःशब्दपदं निःशब्दचरणविन्यासम् ।; Ck : निःशब्दपदः निःशब्दं यथा तथा पदं पदविक्षेपो यस्य स तथा ।; Ct : निःशब्दपदं निःशब्दः पदविक्षेपो यस्यां क्रियायां तथा. ❀ —After 12, Ñ$_2$ B ins.; Ñ$_1$ cont. after 692*; $V_1$ ins. after 14 :

690* विज्ञातं वालिना तस्य तच्च पापविचेष्टितम् ।
असंभ्रममतिश्चासौ चिन्तयामास राघव ।

[ ( l. 1 ) Ñ$_1$ $V_1$ तच्चैवाप( $V_1$ °च्च पापं )च्चिकीर्षितं ( for the post. half ). —( l. 2 ) Ñ$_1$ $V_1$ -गतश्, $B_{1.3}$ -मनाश् ( for -मतिश् ). ]

13 $^{a}$) $D_{6.7.10.11}$ तदा दृष्टो; $G_2$ $M_{6.8.10}$ [ उ ]न्मीलितया( $M_6$ °तेन ) ( for [ उ ]न्मीलयता ). Ś $D_{3.8.12}$ पश्चादुन्मी( Ś$_3$ $D_{3.8.12}$ °त्संमी )लितदृशा; Ñ$_1$ $V_{1.3}$ $B_2$ $D_{1.2.4.5.9}$ $T_{3.4}$ $M_5$ यदृच्छोन्मीलितदृशा( $V_3$ °तं दृष्टो ). —$^{b}$) Ś $D_{2.3.8.9.12}$ स च; Ñ$_1$ $V_{1.3}$ $D_{1.4.5}$ $M_5$ [ अ ]थ स; $B_1$ वै स ( for [ अ ]पि स ). —After $13^{ab}$, $M_6$ ins. :

691* दृष्टो जिघृक्षुः संलीनस्तस्य पापस्य दुर्मतेः ।

—Ś $D_{3.8.12}$ om. $13^{c}$–$14^{b}$. —$^{c}$) $D_5$ दुष्ट- ( for पाप- ). Ñ$_1$ -[ अ ]भिप्रायको ( for °वान् ). Ñ$_2$ B आयातो( Ñ$_2$ आगच्छन् )लक्षितो दूराच् ; $V_3$ $D_{6.7.10.11}$ $G_3$ पापाभिप्रायकं दृष्ट्वा( $G_3$ °दृष्टिः स ). —$^{d}$) Ñ$_1$ $B_{1.3.4}$ $D_{1.4.9}$ $T_4$ च

शशमालक्ष्य सिंहो वा पन्नगं गरुडो यथा ।
न चिन्तयति तं वाली रावणं पापनिश्चयम् ॥ १४
जिघृक्षमाणमद्यैनं रावणं पापबुद्धिनम् ।
कक्षावलम्बिनं कृत्वा गमिष्यामि महार्णवान् ॥ १५
द्रक्ष्यन्त्यरिं ममाङ्कस्थं स्रंसितोरुकराम्बरम् ।
लम्बमानं दशग्रीवं गरुडस्येव पन्नगम् ॥ १६
इत्येवं मतिमास्थाय वाली कर्णमुपाश्रितः ।
जपन्वै नैगमान्मन्त्रांस्तस्थौ पर्वतराडिव ॥ १७
तावन्योन्यं जिघृक्षन्तौ हरिराक्षसपार्थिवौ ।
प्रयत्नवन्तौ तत्कर्म ईहतुर्बलदर्पितौ ॥ १८
हस्तग्राह्यं तु तं मत्वा पादशब्देन रावणम् ।
पराङ्मुखोऽपि जग्राह वाली सर्पमिवाण्डजः ॥ १९
ग्रहीतुकामं तं गृह्य रक्षसामीश्वरं हरिः ।
खमुत्पपात वेगेन कृत्वा कक्षावलम्बिनम् ॥ २० G. 7. 23 22 B. 7. 34. 21 L. 7. 22. 20

न ( by transp. ); Ñ2 V3 D6.7.10.11 न तु; G3 कर-. T1.2 M3 स चकार न (for चकार न च).

14 Ś D3.8.12 om. $14^{ab}$ ( cf. v.l. 13 ). —$^{a}$) Ñ1 V1 D1.2.4.5.9 T4 गजम्. D1.2.4.5.9 T4 आलंक्य (for आलक्ष्य ). M4 सिंहेंद्र:; M6 सिंहेव [ sic ]. ❀ Cv : सिंहो वा सिंह इव । 'इववद्वायथाशब्दाः सादृश्ये संप्रकीर्तिताः' इति हलायुधः ।; so also Cg.k.t. ❀ —$^{b}$) Ñ1 V3 D2 T4 M6 भुजंगं; D1.4.9 भुजगं. G3 [ ऽ ]पि वा ( for यथा ). D5 गरुडो भुजगं यथा. —$^{c}$) Ś V1 D1.3–5.8.9.12 T4 M6 नाचिंतयत. V1 transp. तं and वाली. D2 T1.2 G3 M3 नाचिंतयत्तदा( D2 °तो ) वाली. —$^{d}$) D1 पापचेतसं. —For 14, Ñ2 B subst.; Ñ1 subst. l. 2 only for $14^{cd}$ (followed by 690* ) :

692* सिंहः शशमिवालक्ष्य गरुडो वा भुजंगमम् ।
नाचिन्तयत्तदा दृष्ट्वा वाली रावणमागतम् ।

[ (l. 2) N1 यथा; B3.4 तथा (for तदा ). ]

—Then Ñ2 B read 12 ( along with 690* ). —After 14, V1 ins. 690*.

15 D1 ( hapl. ) T3.4 G3 M8 om. $15^{ab}$. —$^{a}$) Ś V1 D2–5.8.9.12 एवैनं; V3 D6.7.10.11 आयांतं; T1.2 स्वेनैव ( for अद्यैनं ). —$^{b}$) Ś1 Ñ V1.3 B D2.4.6–11 पापचेतसं; Ś2.3 D3.5.12 T1.2 M1.3.6 पापनिश्चयं; G1 लोकरावणं. —$^{c}$) D3.7.12 कक्ष्या-. Ś1 D6.8 -विलंबिनं; Ñ1 B4 ( orig.; marg. also as in text ) -[ अ ]वलंबितं; D2 T1 G3 -[ अ ]वलंबनं. —$^{d}$) Ś Ñ2 V1.3 B D T3.4 M1.3.6 गमिष्ये त्रीन् ; Ñ1 नयिष्ये त्रीन् ; T1.2 G1.3 गमिष्येत्र( G1 °द्य ) ( for गमिष्यामि ).

16 $^{a}$) Ś1.2 D8 M4 द्रक्ष्यति; Ś3 D3.5.12 T2 द्रक्ष्यंतु; B2 M8 द्रक्ष्यामि; Cg.k.t द्रक्ष्यंति ( as in text ). Ś1.2 V3 D8 [ ए ]वं; Ś3 Ñ B D2.3.5.9.12 [ ए ]नं ( for [ अ ]रिं ). V1 द्रक्ष्यते ते; D1.4 प्रेक्ष्यसेनं; G ( ed. ) पश्यंत्वेनं ( for द्रक्ष्यन्त्यरिं ). D1.4.5 G2 M5.10 [ शं ]गस्थं. Ś D2.3.8.9.12 मयानीतं; M9 मां कक्षस्थं; Cg.k.t as in text ( for ममाङ्कस्थं ). T2 M3 मम कक्षस्थं; T4 मामकांकस्थं. M6 द्रक्ष्यतेरिमिमं कक्षे. —D5 om. $16^{b}$–$17^{c}$. —$^{b}$) Ñ1 संहृतोरु-; Ñ2 B M6 प्र ( M6 सं )सृतोरु-; V1 D2 संश्रितोरु-; D7 विवृतोरु-; D10.11 T1.2 G3 M3 स्रंसदूरु-; T4 स्तंभितोरु-. Ś V3 D2.3.8.9.12 -[ आ ]ननं ( for -[ अ ]म्बरम् ). D1.4 संत्रस्ताभरणांबरं; D6 T3 अंबरे देवतागणाः. ❀ Ck.t : स्रंसत्स्रंसमानान्यूरुकरावम्बरं वस्त्रं च यस्य तम्( Ct °था ). ❀

17 D5 om. $17^{abc}$ ( cf. v.l. 16 ). —$^{a}$) Ñ B [ ए ]तां ( for [ ए ]वं ). —$^{b}$) D6.7.10.11 T1.2 G3 M3 मौनम् ; T3 बलम् ; G2 कंठम् ; M10 कक्षम् ; Cv.g as in text ( for कर्णम् ). D11 उपास्थितः; G2 M2.4.7.8.10 अपाश्रितः; Cv.g as in text ( for उपाश्रितः ). Ś D2–4.8.12 वाली कर्णब( D12 °बि )लं श्रितं( Ś2.3 °तः ); Ñ V1.3 B वाली नियम( V1 सुबल )मास्थितः; D1 T4 वाली स्वबलमाश्रि( T4 °स्थि )तः; D9 M6 वाली निज( M6 ह्यात्म )बलाश्रितः; M5 वाली कर्मसमाश्रितः. ❀ Cv.g : कर्णमुपाश्रितः पा( Cv प )दशब्दश्रवणार्थं कर्णमुपाश्रितमनाः. ❀ —$^{c}$) Ś Ñ V1 B2–4 D1–4.8.9.12 T4 वै नैगमं मंत्रं; B1 ब्रह्ममयं मंत्रं. ❀ Cg : नैगमान्वैदिकान् । देवकुमारत्वान्मन्त्रवत्त्वम् ।; Ck : नैगमा वैदिकाः । वालिहनुमदादीनां देवकुमारत्वात् । स्वयं प्रतिभातवेदशाखा इमे ।; so also Ct which adds जपंस्तदर्थं ध्यायन्. ❀

18 $^{b}$) T4 वालि- ( for हरि- ). B3 -पुंगवौ ( for -पार्थिवौ ). —Note hiatus between $^{c}$ and $^{d}$. —$^{d}$) Ñ B4 चेरतुर् ; B1 रेजतुर् ; M3 स्वीहतुर्. B3 चतुर्वदन- ( for ईहतुर्बल- ).

19 $^{a}$) Ñ B1.3.4 हस्तप्रासं( B3 °प्यं ); V1.3 D1.4.5.10.11 Cg.k.t हस्तग्राहं; B2 प्रहस्तप्रासं ( hypm. ); T4 जिघृक्षंतं. Ś D2.3.8.9.12 ततो ( for तु तं ). B4 D6.7 दृष्ट्वा; D1.4 गत्वा. —$^{b}$) Ñ1 पादैः; B1.3.4 पद- ( for पाद- ). —$^{cd}$) Ś2.3 D1.2.4 पराङ्मुखं( D2 °खात् ); G ( ed. ) प्राङ्मुखस्तं. Ś Ñ V3 B D1–5.8.9.12 T4 प्र( Ñ B नि; D1 च; D9 स )जग्राह; G2 M10 [ ऽ ]भिज°; M4 हि ज°; M6 [ ऽ ]वज° ( for ऽपि जग्राह ). Ś1 Ñ1 D2.8 वालिः; M9 बाल-. M10 पुत्रम् ( for सर्पम् ). V1 प्राङ्मुखं परिजग्राह संसर्पंस्तमिवांडजं ( sic ). ❀ Cg : हस्तग्राहं हस्तैर्ग्रहणाभिप्रायवन्तम् । पादशब्देन सूक्ष्मपादशब्देन ।; Ck : हस्तग्राहं हस्तैर्ग्रहणाभिप्रायवन्तमित्यर्थः । पादशब्देन मत्वेति । सूक्ष्मपादविक्षेपशब्देन पश्चादायान्तं ज्ञात्वेत्यर्थः । पराङ्मुखोऽपि तद्दिगवलोकनरहितोऽपि ।; so also Ct which adds 'हस्तग्राह्यम्' इति पाठे रावणपादशब्देन तादृशं मत्वेत्यर्थः. ❀

20 $^{a}$) D2 ग्रहीतुं कर्म. Ś D1–4.8.9.12 संगृह्य; Ñ V1 B

G. 7. 23. 23
B. 7. 34. 22
L. 7. 22. 21

स तं पीडयमानस्तु वितुदन्तं नखैर्मुहुः ।
जहार रावणं वाली पवनस्तोयदं यथा ॥ २१
अथ ते राक्षसामात्या ह्रियमाणे दशानने ।
मुमोक्षयिषवो घोरा रवमाणा ह्यभिद्रवन् ॥ २२
अन्वीयमानस्तैर्वाली भ्राजतेऽम्बरमध्यगः ।
अन्वीयमानो मेघौघैरम्बरस्थ इवांशुमान् ॥ २३
तेऽशक्नुवन्तः संप्राप्तुं वालिनं राक्षसोत्तमाः ।
तस्य बाहूरुवेगेन परिश्रान्ताः पतन्ति च ॥ २४
वालिमार्गादपाक्रामन्पर्वतेन्द्रा हि गच्छतः ॥ २५
अपक्षिगणसंपातो वानरेन्द्रो महाजवः ।
क्रमशः सागरान्सर्वान्संध्याकालमवन्दत ॥ २६

T4 आदाय; G1 तद्गृह्य. —d) D3 कक्ष्या-. T1.2.4 G3 [अ]-वलंबनं.

21 a) D1.4 तमुत्-; T3 M2.5.8.9 तमा-; T4 तं च (for स तं). Ś Ñ1 V1.3 D2.3.8.9.12 ततः संपीड्यमानं तु (Ñ1 V1 °नस्तु); Ñ2 B2.4 G (ed.) अत्यर्थं पीड्यमानं तं (G [ed.] °नस्तु); B1.3 अत्यंतं पीड्यमानं हि (B3 °नस्तु); D5-7.10.11 M1.6.7 तं च पी (D5 तमुत्पी; M1.7 स तं पी)डयमानं तु; G2 M4.10 स तु तं (M4 damaged up to तं) पीड्यमानस्तु; K (ed.) तं चापीड्यमानं तु (subm.). ❀ Cg : तं चेति । आपीडयमानम् "णिचश्च" इत्यात्मनेपदम् ।; Ck : पीडयमानः णिचश्चेत्यात्मनेपदम्. ❀ —b) Ś Ñ1 V1 D2.3.8.9.12 तु (D2.8 र)दते स्म (Ś2 स); V3 स तुदंतं; D1 T3 वितुदन्वै (T3 °न्स्म); T1.2 G3 (all with hiatus) ऊरुदंत-; G1 M1 करदंत-; G3 M10 नखैर्दंतैर्; G (ed.) तदा दंत- (for वितुदन्तं). B4 M10 मुखैर्; G2 मुहुर् (for नखैर्). —D12 om. 21cd. —c) Ś V3 D2.3.8.9 T1.2 G3 M6 जग्राह (for जहार). T3 वेगात् (for वाली).

22 a) Ś V3 D2.3.8.9.12 ततस्. V3 तं (for ते). Ś Ñ V1.3 D1-5.8.9.12 T4 G1 M1 रावण- (for राक्षस-). —b) Ś Ñ V1.3 B D1-5.8.9.12 T4 M3.6 ह्रि (Ś3 D3.8 ध्रि)यमाणं दशाननं. —c) Ś Ñ V1.3 B D2.3.8.9.12 T4 M6 मुमोच (M6 उन्मोक्ष)यिषवो. Ś Ñ1 V1 D T4 M6 वालिं; Ñ2 V3 B राजन्; M8 घोरं (for घोरा). ❀ Ck : मुमोक्षयिषव इति तत्करोतिण्यन्तमोक्षशब्दात्सन् ।; so also Ct. ❀ —d) G1 रवमाणं; M5 त्वरमाणा; Ck.t रवमाणा (as in text). D5.10.11 अभिद्रुताः (for ह्यभिद्रवन्). Ś V1 D1-4.6-9.12 T4 M6 द्रवमाण (D6.7 T4 प्लवमान)मभि (D9 °नु)द्रुताः; Ñ V3 B वालिनं समनु (V3 °मभि; B4 °मुप)द्रुताः; G2 M10 रावणं ह्यभिदुद्रुवुः.

23 Ś1.2 V3 B2 D2.3.8.9.12 om. (hapl.) 23ab. —ab) M5 राजते (for भ्राजते). Ñ V1 B1.3.4 बभौ नीलैर्नि (Ñ1 °लनि)शाचरैः (for b). Ś3 (marg.) स तै राक्षसवर्यैस्तु शुशुभे वानरोत्तमः. —d) D9 अंबररूढ (hypm.).

24 a) Ś V3 D1-4.6.9.12 T3.4 अ (D1.4 T3 न)शक्नुवंतः; Ñ1 V1 नाशक्नुवंश्च. Ñ2 T1.3.4 G M3.5.10 तं प्राप्तुं; D5 प्राप्तुं ते. ❀ Cg.k.t : अशक्नुवन्त इति पदम्. ❀ —b) Ñ2 B राक्षसास्तदा; D5 G2 M10 राक्षसेश्वराः. —d) D2 परिश्रांत; M3 परिश्रांताः. Ś Ñ V1.3 B D T G2.3 M1.6.8.10 व्यवस्थिताः (for पतन्ति च).

25 a) Ñ1 (with hiatus) वालिनोपि. Ś V1.3 B2 D1.3-5.9.12 T4 अप (B2 °पा)क्रांताः; Ñ T3 G2 M5 अपक्रामन् (M5 °मत्); D2.8 ह्यु (D8 उ)पक्रांताः; M1 अपाक्रामेत्; M6 अपक्रेमुः; Cg.k.t as in text (for अपाक्रामन्). —b) D10.11 Ct [अ]पि; G1.3 [अ]भि-; Cgp.k as in text (for हि). Ñ B1.3.4 M6 पर्वता अपि; B2 पर्वतादपि; D6.7 T4 °तस्येव; M1.5 °तेंद्रोपि (for पर्वतेन्द्रा हि). M2.8.9 हि भूरिणः; G (ed.) इव प्लुताः (for हि गच्छतः). Ś V1.3 D1-5.8.9.12 पर्वतेंद्रादिव च्युताः (D1.4.5 °वांबुदाः). —After 25, Ñ B D6.7.10.11 T1-3 G M ins. :

693* किं पुनर्जीवितप्रेप्सुर्बिभ्रद्वै मांसशोणितम् ।

[B1 D10.11 Ct जीवन-; B4 M1 जीवितं (B4 °तुं); Cg.k as above (for जीवित-). Ñ B1.3.4 बिभ्राणो; T1 M1.3 बिभ्रन्वै. ❀ Cg.k : हि यस्मात्पर्वतेन्द्रा अपि वालिमार्गादपाक्रामन् । मांसादिमाञ्जीवितप्रेप्सुः प्राणी गच्छतस्तस्य मार्गादपा (Ck °प)क्रामतीति किं पुनः । Cg adds पर्वतेन्द्रा हीति च पाठः ।; Ct : यतः पर्वतेन्द्रा अपि वालिमार्गादपाक्रामन् । मांसशोणितं बिभ्रज्जीवनप्रेप्सुः प्राणी तस्य मार्गादपक्रामतीति किं वक्तव्यम्. ❀]

26 a) Ś D3.8.9.12 सपक्षि-. Ñ1 V1 D1.4-7.10.11 T3.4 G1.2 M10 Cg.k.t -संपातान्; M1 -संपाते; M2.4.5.7.9 -संपाताद् (for -संपातो). Ñ2 B यो ह्यक्षि (B3 योक्षि [subm.])पक्ष्मसंपा (B2 °घा)ताद्. —b) Ñ2 V3 M2.6 महाबलः; B1.3 मनोजवः; G2 M10 महाजवान्. —c) Ś V3 D3.8.12 T4 अगमत्; Ñ1 V1 D5 आक्रमत्; Ñ2 B M6 क्र (B3 क्रा)मते; D1.2.4.9 आक्रमन्; Cg.k.t as in text (for क्रमशः). M8 गत्वा (for सर्वान्). —After 26c, M5 reads from 28d up to the prior half of l. 2 of 694* for the first time, repeating them in their proper place. —d) Ś Ñ1 V1.3 D1-5.8.9.12 T4 उपासितुं; Ñ2 B M6 च विंदति; M5 अवर्तत; Cg.k.t as in text (for अवन्दत). G2 M1.3.10 संध्याकाले ययौ तदा (M1.3 समाययौ). ❀ Cg.k : संध्याकालं प्रातःसंध्याकालदेवतारूपमवन्दत (Ck °पं ब्रह्माणमवन्दतेत्यर्थः) ।; so also Ct. Ck adds तस्य दक्षिणसमुद्रे शौचं पश्चिमे स्नानमुत्तरे प्रोक्षणं पूर्वेऽर्घ्यमेतादृशं परमं व्रतं महेन्द्रः पुत्रद्वारा रावणस्य समूलोन्मूलनार्थमनुतिष्ठति. ❀

सभाज्यमानो भूतैस्तु खेचरैः खेचरो हरिः ।
पश्चिमं सागरं वाली आजगाम सरावणः ॥ २७
तत्र संध्यामुपासित्वा स्नात्वा जप्त्वा च वानरः ।
उत्तरं सागरं प्रायाद्वहमानो दशाननम् ॥ २८
उत्तरे सागरे संध्यामुपासित्वा दशाननम् ।
वहमानोऽगमद्वाली पूर्वमम्बुमहानिधिम् ॥ २९
तत्रापि संध्यामन्वास्य वासविः स हरीश्वरः ।
किष्किन्धाभिमुखो गृह्य रावणं पुनरागमत् ॥ ३०
चतुर्ष्वपि समुद्रेषु संध्यामन्वास्य वानरः ।
रावणोद्वहनश्रान्तः किष्किन्धोपवनेऽपतत् ॥ ३१
रावणं तु मुमोचाथ स्वकक्षात्कपिसत्तमः ।
कुतस्त्वमिति चोवाच प्रहसन्रावणं प्रति ॥ ३२ G. 7. 23. 35 B. 7. 34. 34 L. 7. 22. 31

27 a) Ś Ñ1 V1.3 D T4 सं( D6 स )पूज्यमानो; M8 संभाव्यमानो. Ś Ñ1 V1.3 D2.3.5.8.9.12 M9 च; Ñ2 B2–4 स (for तु). D6.7.10.11 यातस्तु; M1 भूतौघैः.—b) Ś1 D8 वचनैः; Ś2.3 Ñ V1 B4 D2.3.5.6.7.9–12 T4 G1.3 M1.6 खचरैः (for खेचरैः). Ś D3.8.12 खे बभौ; V1 B1 D2.5.9 T4 M2.6.9 खचरो (for खेचरो). D6.7.10.11 खचरोत्त( D7 °प )मः. —Note hiatus between c and d.—c) D5 वालिर्; T3 संध्याम्.—d) Ś D1–5.8.9.12 जगामैव( D1.2.4.9 °वं ); V3 निपपात; M1.5 ह्याजगाम. ❀ Cg: सभाज्यमानः पूज्यमानः । पश्चिममित्यादि । दक्षिणे संध्याङ्गशौचम् । पश्चिमे मन्त्रपूर्वकसंध्याङ्गस्नानम् । उत्तरे प्रोक्षणादिकम् । पूर्वेऽर्घ्यप्रदानादिकमिति । अन्यथा संध्याचतुष्टयाभावात्तदङ्गस्यापि तत्त्वेन व्यपदेशात् ।; Ck: सभाज्यमानः पूज्यमानो हरिर्वानरः । सर्वसमुद्रेषु । संध्यामुपासित्वेति वचनमस्त्वस्मदुक्तरीत्या संध्यावन्दनशेषाङ्गानुष्ठानत्वात्संध्यावन्दनं कृत्वेत्युच्यत इति द्रष्टव्यम् । न ह्युत्तरदक्षिणयोः कदाचिदपि संध्याप्रसक्तिरस्ति । 'संध्या हि नामोद्यतोऽस्तं यतो वा मण्डलस्य रश्मिमात्रोपेतः कालः ।; Ct: सरावणः कक्षस्थरावणसहितः. ❀

28 L (ed.) repeats 28ab in place of 29ab.—a) D6.7.10.11 तस्मिन्; D9 ततः (for तत्र). Ś V1.3 D1–4.8.9.12 T4 उपास्यैव( D8.9.12 °वं ); Ñ B उपास्यासौ.—b) Ś1 D8 जप्य (for जप्त्वा). Ñ2 B जप्त्वा जप्यं; G2 जप्त्वा स्नात्वा (by transp.). M6 [अ]पि (for च). Ś1 D8 सागरे.—D9 om. (hapl.) 28c–31b.—c) V1 प्राप्य (for प्रायाद्).—M5 repeats from 28d up to the prior half of l. 2 of 694* (cf. v.l. 26).—d) V1 D1.4 T4 लंबमानं (for वहमानो). V1 स रावणं; B1 निशाचरं. Ś D2.3.5.8.12 लंब( D2 ब्रुव )माने दशानने.—After 28, Ñ B D6.7.10.11 S ins.:

694* बहुयोजनसाहस्रं तदध्वानं महाहरिः ।
वायुवच्च मनोवच्च जगाम सह शत्रुणा ।

[M5 repeats up to the prior half of l. 2.—(l. 1) Ñ B G1.2 M2.4.5(first time).7.10 तमध्वानं; D6.7.10.11 T4 वहमानो; M5(second time).9 तदाध्वानं; M6 अध्वानं च. Ñ1 महाबलः; Ñ2 B M5 (both times) °कपिः (for °हरिः).—T4 om. l. 2.]

29 D9 om. 29 (cf. v.l. 28). Ś V1.3 D1–5.8.12 om. (V3 D1.4 hapl.) 29ab. L (ed.) repeats 28ab in place of 29ab.—a) M6 सांध्यम्.—b) Ñ B उपास्यैवं( B3 °व ) विधानतः. ❀ Ct: तस्मिन्संध्यामुपासित्वा स्नात्वेत्यादि। दक्षिणसमुद्रतटेऽपि । 'जपन्वै नैगमान्मन्त्रान्' इत्युक्तेः समुद्रचतुष्टयेऽपि प्रातःसंध्याकालस्योदयात्पूर्वं परतश्च मिलित्वा त्रिमुहूर्तात्मकस्य मध्ये चतुःसमुद्रतटावच्छेदेन किंचित्किंचित्कालं ध्येयब्रह्मणो ध्याननियमस्तत्प्रतिपादकमन्त्रस्मरणनियमश्च वालिन इति गम्यते । ईदृशं व्रतं च महेन्द्रो रावणस्य समूलनाशाय पुत्रद्वारानुतिष्ठतीति बोध्यम् । यत्तु तस्य दक्षिणसमुद्रे शौचम्, पश्चिमे स्नानम्, उत्तरे आपोहिष्ठादिमन्त्रैर्मार्जनम्, पूर्वसमुद्रेऽर्घ्यादीत्येवं संध्यावन्दनशेषानुष्ठानत्वाच्चतुर्षु समुद्रेषु संध्यामन्वास्येत्युक्तिरिति कतकतीर्थादयः, तत् 'जपन्वै नैगमान्मन्त्रान्' इति दक्षिणसमुद्रस्नानकालोक्त्या विरुध्यते । मदुक्तरीत्या सामञ्जस्याच्च । संध्याकाले गायत्र्यर्थं ब्रह्मणो ध्यानमेव प्रधानं स एव संध्यापदार्थ इति स्पष्टं श्रुतिस्मृतिविदाम्. ❀—c) Ñ B प्रययौ वेगवान्वा( B4 बलवद्वा )ली; M6 वहमानोत्तसबली.—d) V3 एव पयो- (for अम्बुमहा-). M3 -निधिं परं; M8 -महोदधिं (for -महानिधिम्). Ś Ñ1 V1 D1–5.8.9.12 पूर्वमेव( D3 °वं ) त( D5 य )थोदधिं; D6.7.10.11 T4 पूर्वं वै स महोदधिं; T3 तथा पूर्वपयोनिधिं; G2.3 M10 पूर्वाबुनिधिमुत्तमं.

30 D9 om. 30 (cf. v.l. 28).—c) Ñ2 B3 -[अ]भिमुखं. Ś Ñ V1.3 B D1–5.8.12 T4 रक्षः (for गृह्य). D6.7.10.11 G1 किंष्किधामभितो( G1 °भिमुखो [hypm.]) गृह्य.—d) Ś Ñ1 V1.3 D1–5.8.12 T4 सं( V3 D5 प्र )गृह्य; Ñ2 B गृहीत्वा (for रावणं). B3 पुरम् (for पुनर्). M1 आगतः.

31 D9 om. 31ab (cf. v.l. 28). V3 illeg. for 31.—a) G1 [अ]थ (for [अ]पि).—b) B4 वासविः (for वानरः). ❀ Cg.k.t वासवस्यापत्यं वासविः. ❀—c) G1 -[उ]द्वहने. M7 -क्रांतः (for -श्रान्तः). Ś V1 D1–4.8.9.12 सरक्षो वालिरश्रां( Ś3 D3 °रभ्रां; D2 °वें श्रां )तः; D5 रक्षो बहुतरश्रांतः.

32 a) Ś2.3 B1.3 D1–4.8.9.12 च; V3 प्र- (for तु). T4 विमुच्याथ.—b) Ñ2 B4 कक्षात्; B1 कक्षांतः; G3 कक्षाच्च; M6 कक्षात्स; M7 स कक्षात्; M10 कक्षात्तु (for स्वकक्षात्). Ś Ñ1 V1.3 B2 D1–5.8.9.12 T4 कक्ष्यातः( Ñ1 °क्षया; V3 D3.12 °क्ष्यांतः; B2 D1.5.9 °क्षातः; D3.4 °क्षांतः; T4 °क्षस्थं ) कपिकुंजरः; B3 कक्षांतं कपिपुंगवः:—c) B2 हृतस् (for कुतस्). D3 त्व **. Ś Ñ2 V1.3 D2.3.8.9.12 T1.2.4

G. 7. 23. 36
B. 7. 34. 35
L. 7. 22. 32

विस्मयं तु महद्गत्वा श्रमलोलनिरीक्षणः ।
राक्षसेशो हरीशं तमिदं वचनमब्रवीत् ॥ ३३
वानरेन्द्र महेन्द्राभ राक्षसेन्द्रोऽस्मि रावणः ।
युद्धेप्सुरिह संप्राप्तः स चाद्यासादितस्त्वया ॥ ३४
अहो बलमहो वीर्यमहो गम्भीरता च ते ।
येनाहं पशुवद्गृह्य भ्रामितश्चतुरोऽर्णवान् ॥ ३५
एवमश्रान्तवद्वीर शीघ्रमेव च वानर ।
मां चैवोद्वहमानस्तु कोऽन्यो वीरः क्रमिष्यति ॥ ३६
त्रयाणामेव भूतानां गतिरेषा प्लवंगम ।
मनोनिलसुपर्णानां तव वा नात्र संशयः ॥ ३७
सोऽहं दृष्टबलस्तुभ्यमिच्छामि हरिपुंगव ।
त्वया सह चिरं सख्यं सुस्निग्धं पावकाग्रतः ॥ ३८
दाराः पुत्राः पुरं राष्ट्रं भोगाच्छादनभोजनम् ।
सर्वमेवाविभक्तं नौ भविष्यति हरीश्वर ॥ ३९

M3.5–7 ह; B1 प्र- (for च). —[d]) Ś D3.8.12 दारुणं; B2 वानरं (sic) (for रावणं). Ñ2 B पुनः; D6.7.10.11 मुहुः; T4 बली; M3 हरिः.

33 [a]) Ś Ñ1 V3 D1–5.8.9.12 T4 परमं; Ñ2 B तु परं (for तु महद्). B4 मत्वा; M10 प्राप्य (for गत्वा). V1 अविस्मयं परं गत्वा (sic). —[b]) Ñ1 V1 T4 भय-; M6 सम- (for श्रम-). Ś Ñ1 V1.3 D1–5.8.9.12 T4 -[आ]कुलेक्षणः (for -निरीक्षणः). —[c]) Ś D2.3.8.9.12 राक्षसश्च; Ñ V1.3 B D6.7.10.11 G1 M5.6 °सेंद्रो; G2 M10 °सोथ (for राक्षसेशो). Ñ2 B2–4 D6.7.10.11 हरींद्रं. —D3 reads from तम् in [c] up to म in 34[a] in marg.

34 D8 reads up to म in [a] in marg. (cf. v.l. 33). —[a]) B1 सुरेंद्राभ; D4 om.; M8 महाभाग (for महेन्द्राभ). —[b]) B1 राक्षसोस्मीति (for °सेन्द्रोऽस्मि). Ś D2.3.8.9.12 रावणो (D3 om. [hapl.]) राक्षसाधिपः. —[c]) Ñ1 युद्धोस्मिरिह (corrupt); D5 युद्धेच्छयामि- (for युद्धेप्सुरिह). Ñ2 B G (ed.) युद्ध(G [ed.] °द्धं)प्रेप्सुरिह प्राप्तः. —[d]) B1 M6 [अ]पि; G1 [अ]भि- (for [अ]द्य). Ś V1.3 D1–5.8.9.12 ततो हि; Ñ2 B3.4 श्रमश्च; T1 G2 M5.10 सोहम् (for स चाद्य). D6.7 [अ]सौ जितस् (for [आ]सादितस्). T4 चाहं निर्जितस्. T2 स्वयं (for त्वया). Ñ1 B2 G (ed.) ततो ह्या(B2 °दस्या; G [ed.] °चाप्या)सादितं मया; M8 संध्यामन्वासितस्त्वया.

35 [a]) Ś V1 D1–4.8.9.12 G1 M6.10 धैर्यम् (for वीर्यम्). —[b]) B4 D5 तव (for च ते). D6.7.10.11 T4 G3 अहो गांभीर्यमेव च. —V1 om. (hapl.; see Ś var.) 35[c]–36[b]. —[c]) T4 दंशवद् (for पशुवद्). Ś Ñ1 D1.3–5.8.9.12 गृहीत्वा दंश(Ñ1 पशु; D1.4 श्येन)वद्येन; D2 गृहीत्वा दंशितस्तेन. —[d]) Ñ1 भ्रामितं.

36 V1 om. 36[ab] (cf. v.l. 35). —[a]) Ñ1 B1 G1.2 M10 अश्रांतवान्(B1 G1 °मद्). Ñ2 B1.3.4 वीरम्; T2 वीरः (for वीर). D5 अहो ह्यश्रांतता वीर. —[b]) D2.8.9.12 एवं. Ñ B T4 M6(Ñ1 B2 T4 M6 with hiatus) एवं शीघ्रं; V3 illeg.; D5 (with hiatus) अहो शौर्यं (for शीघ्रमेव). D4.8 T2.4 च वानरः; M3 महार्णवान्. —V3 illeg. for [cd]. —[c]) Ñ B मामुद्वहंश्च कोध्वानम्; M6 मां चोद्वहनकोध्वानम्. —[d]) Ñ B एतं (for कोऽन्यो). Ñ1 B1–3 D10.11 T3 M2.4.9 वीर; M8 धीरः. D7.10.11 भविष्यति; G1 करिष्यति. —For 36[cd], Ś V1 D1–5.8.9.12 T4 subst.:

695* गृहीत्वा मां च कोऽध्वानमेवमन्यो गमिष्यति ।

[D5 स; D8 om. (subm.) (for च). V1 T4 बद्धा (with hiatus) (for ऽध्वानम्).]

—T4 cont.:

696* आहवे हि मया दृष्टा दैत्यदानवराक्षसाः ।
सिद्धविद्याधरा देवास्तेषामप्यधिको ह्यसि ।

—After 36, D6 T1.2 G1.3 M1 ins.:

697* ये सुरा दानवा लोके तेषामभ्यधिको ह्यसि ।;

whereas K [ed., within brackets] ins.:

698* ये सुरा दानवा लोके दैत्यराक्षसपन्नगाः ।
सर्वेषामेव तेषां त्वं बलादभ्यधिको ह्यसि ।

37 [a]) B3 T4 G1 M1–3 अपि (for एव). —[b]) T1–3 G1.3 M1–5.7–9 शक्तिर् (for गतिर्). —[c]) Ś V1.3 D1–5.8.9.12 T4 मनोगरुडवा(D3.4 °भू)तानां. —[d]) Ś1 D7.11 वात्र न (by transp.); V3 D6.8.10 चात्र न.

38 [a]) Ñ B तव (for सोऽहं). M7 -फलस् (for -बलस्). —T4 damaged from तुभ्यम् up to [b]. Ś3 V3 युद्धे; Ñ B सोहम्; M8 कर्तुम् (for तुभ्यम्). Ś1.2 V1 D1–5.8.9.12 दृढबलो युद्धे. ❀ Cg.k: तुभ्यं तवेत्यर्थः(Ck °ति यावत्) ।; so also Ct. ❀ —[b]) Ś V3 D1–5.8.9.12 बलिनां (for इच्छामि). V1 तोषितो हरिमुत्सहे. —[c]) T3 यस्त्वया सु- (for त्वया सह). Ñ2 B स्थिरं. G2 M10 कालं (for सख्यं). —[d]) D1.4.5 इच्छेयं; M6 सुस्निग्धः; M7 करिष्ये (for सुस्निग्धं). Ś1 D8 पावकग्रहं; G3 °काश्रितः; L (ed.) °नं ग्रहे (for पावकाग्रतः). G2 M10 सख्यं पावकसंनिधौ.

39 [a]) G3 पुत्रः. V1 प्रियं; B1 सुहृद्; D3.8.12 M2.3 परं (for पुरं). Ś V1 D1–5.8.9.12 भृत्याः; V3 स्त्रियं; M2.4.7 राज्यं (for राष्ट्रं). —[b]) Ś2.3 D3.12 -भोजने; D6 M9 -भाजनं; M5 -संयुतं (for -भोजनम्). B2 भोगाच्छादनमेव च. —[c]) D8 पूर्वम् (for सर्वम्). D6 सर्वदैव. D2.7 [अ]भिभक्तं (sic); M8 [अ]पि भोग्यं (for [अ]विभक्तं). Ñ1 B1.3.4 D7 G1.2

ततः प्रज्वालयित्वाग्निं तावुभौ हरिराक्षसौ ।
भ्रातृत्वमुपसम्पन्नौ परिष्वज्य परस्परम् ॥ ४०
अन्योन्यं लम्बितकरौ ततस्तौ हरिराक्षसौ ।
किष्किन्धां विशतुर्हृष्टौ सिंहौ गिरिगुहामिव ॥ ४१
स तत्र मासमुषितः सुग्रीव इव रावणः ।
अमात्यैरागतैर्नीतस्त्रैलोक्योत्सादनार्थिभिः ॥ ४२
एवमेतत्पुरावृत्तं वालिना रावणः प्रभो ।
धर्षितश्च कृतश्चापि भ्राता पावकसंनिधौ ॥ ४३
बलमप्रतिमं राम वालिनोऽभवदुत्तमम् ।
सोऽपि त्वया विनिर्दग्धः शलभो वह्निना यथा ॥ ४४ G. 7. 23. 48 B. 7. 34. 46 L. 7. 22. 43

इति श्रीरामायणे उत्तरकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

M2.4–7.9.10 नो; D6 भो. B2 [ अ ]विभक्तात्मा. —$^d$ ) B2 M3 न संशयः ( for हरीश्वर ). —After 39, Ñ V1.2 B ins. :

699* एवमुक्तस्तदा तेन रावणेन स वानरः ।
तथास्त्वित्यब्रवीद्धृष्टं तं विभीषणपूर्वजम् ।

[ (l. 2) B1–3 स ( for तं ). ]

40 $^a$ ) T3 तत्र ( for ततः ). Ś Ñ V1 B D1–5.8.9.12 T4 ततः प्रज्वाल्य दहनं ( Ñ2 B1–3 तावग्निं; B4 तौ वह्निं ); G2 M10 प्रज्वालयित्वा तत्राग्निं. —$^b$ ) Ñ2 illeg.; B1 तदा तौ; B2–4 तदो ( B4 °त्रो )भौ ( for तावुभौ ). M3 वालि- ( for हरि- ). —Ś V3 D2.3.8.9.12 om. (hapl.) 40$^c$–41$^b$. B4 repeats 40$^c$–41$^b$ after 43. T4 damaged from $^c$ up to परिष्वज्य in $^d$. —$^c$ ) V1 B ( B4 both times ) D1.4.5 उपपन्नौ तौ ( V1 तु ); T1.2 उपसंप्राप्तौ.

41 Ś V3 D2.3.8.9.12 om. 41$^{ab}$ (cf. v.l. 40). B4 repeats 40$^c$–41$^b$ after 43. —$^a$ ) B1.2.4 ( both times ) D6 T3 G2 M1.6–8.10 अन्योन्य-. B1.2.4( both times ) M7.10 -[ आ ]लंबित-; M3 लंबित- ( for लम्बित- ). D1.4 अन्योन्यालिंगितकरैः; D5 T4 अन्योन्यालिंगनप( D5 °क )रौ. —$^b$ ) V1 T4 तावुभौ; M5 तत्र तौ. Ñ B ( B4 both times ) मित्रतां गतौ ( for हरिराक्षसौ ). —$^c$ ) V1 विशतां; V3 D2.9 T4 M1.6 विविशुर्; B2 G3 विशतौ; T1–3 G1 विशतो. Ś1 D8 हृष्टां ( for हृष्टौ ). Ñ1 विविशंस्तुष्टौ; B1 M3 तौ नि( M3 वि )विशतुः ( for विशतुर्हृष्टौ ). D1.4.5 किष्किंधायां विविशतुः.

42 $^a$ ) G2 M10 मासमात्रम् ( for तत्र मासम् ). —$^b$ ) Ñ B वालिना सह; V3 M6 सुग्रीव इव. M5 राक्षसः. ( for रावणः ). D3 reads erroneously 42$^c$–44 after 8, repeating 42$^{cd}$ here. D7 reads from स्यै in $^c$ up to $^d$ in marg. —$^c$ ) B रावणो; D5 राम तैर् ( for आगतैर् ). T1 हीनस्; T2.4 G1 M2–4.7–9 निर्त्यं; M6 क्रूरैस् ( for नीतस् ). G2 रावणो नीतस्. —T4 damaged for $^d$. —$^d$ ) Ñ1 V1 -[ उ ]त्सादनादिभिः; Ñ2 B1–3 -[ उ ]च्छादनार्थि( B3 °दि )भिः.

43 For sequence in D3, cf. v.l. 42. —$^a$ ) M4 एतं; M6 एव ( for एतत् ). M6 -वृत्तो. —$^b$ ) Ś V1.3 D1–5.8.9.12 T4 वालिनो रावणस्य च ( D5 तु ). —$^c$ ) B1 सत्कृतश्; B2.3 च हृतश्; B (ed.) च वृतश्. D1.3–5 [ ए ]व; T4 [ आ ]सीत्; G3 [ अ ]त्र ( for [ अ ]पि ). —$^d$ ) B3 G3 भ्रात्रा ( sic ). —After 43, B4 repeats 40$^c$–41$^b$.

44 For sequence in D3, cf. v.l. 42. B4 om. 44$^{ab}$. —$^{ab}$ ) M6 वीर ( for राम ). Ś Ñ1 V1.3 D2.3.5.8.9.12 T4 [ ऽ ]द्भुतम् ( for ऽभवद् ). D1.4 बलवान्राक्षसां राजा राम कालानलोपमः. —$^c$ ) Ś2.3 D1–5.8.9.12 सोयं; Ñ1 V1 योसौ ( for सोऽपि ). V3 पुनर्दग्धः; G2 M10 विनिर्भिन्नः. —$^d$ ) M3 शलभा. Ś D2.5.8.9.12 M6 वै यथाग्निना ( for वह्निना यथा ). G2 M10 शैलो वज्रहतो यथा.

Colophon : D3 om. —*Kāṇḍa name* : Ś1 D2.9 M7 om. —*Sarga name* : Ś Ñ2 V3 D12 रावणसख्यं; Ñ1 B1–3 वालिसख्यं; V1 B4 D2.8.9 वालिरावणसख्यं; D1.4–6 वालिरावणयोः सख्यं. —*Sarga no.* ( figures, words or both ): Ś Ñ1 V3 B1.3.4 D2.12 om.; Ñ2 D1.4.5 M6 23; V1 19; B2 D8.9 T4 22; T3 39. —After colophon, D2 concludes with रामः; T4 with श्रीरामार्पणमस्तु; G M1.3 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः. —After Sarga 7.34, Ñ2 reads erroneously, 7.20. 1–10 ( along with l. 1–2 of 389* ) and 7.34.42–44 ( along with colophon ).

# ३५

G. 7.38.52
B. 7.35.1
L. 7.38.4

अपृच्छत ततो रामो दक्षिणाशालयं मुनिम् ।
प्राञ्जलिर्विनयोपेत इदमाह वचोऽर्थवत् ॥ १
अतुलं बलमेताभ्यां वालिनो रावणस्य च ।
न त्वेतौ हनुमद्वीर्यैः समाविति मतिर्मम ॥ २
शौर्यं दाक्ष्यं बलं धैर्यं प्राज्ञता नयसाधनम् ।
विक्रमश्च प्रभावश्च हनूमति कृतालयाः ॥ ३
दृष्ट्वोदधिं विषीदन्तीं तदैष कपिवाहिनीम् ।
समाश्वास्य कपीन्भूयो योजनानां शतं प्लुतः ॥ ४
धर्षयित्वा पुरीं लङ्कां रावणान्तःपुरं तथा ।
दृष्ट्वा संभाषिता चापि सीता विश्वासिता तथा ॥ ५
सेनाग्रगा मन्त्रिसुताः किंकरा रावणात्मजः ।
एते हनुमता तत्र एकेन विनिपातिताः ॥ ६
भूयो बन्धाद्विमुक्तेन संभाषित्वा दशाननम् ।
लङ्का भस्मीकृता तेन पावकेनेव मेदिनी ॥ ७

## 35

☞ V2 missing for Sarga 35 (cf. v.l. 7.12.2). B2 om. Sargas 35–40. M6 om. Sargas 35–36.

1 ab) Ś1.3 Ñ1 D12 M3 अ( D12 आ )पृच्छत्तं( M3 °च्छ ); D1–4.9 आपृच्छंतं( D3 °च्छय तं ); Cv.g.k.t as in text (for अपृच्छत). Ś D2.6.7.9–11 T G M3.3.8.10 सदा (for ततो). Ś2 Ñ1 D6.7.10.11 -[ आ ]श्रयं ( for -[ आ ]लयं ). Ñ2 B1.3.4 रामस्त्वा( B1 आसंग्य )पृच्छमानं तं कुंभयोनिं महामुनिं. —c) V1 D4 प्रांजलिं. Ñ1 D1.2.4.9 -[ उ ]पेतम्; M2.5.9 -[ आ ]पन्न (for -[ उ ]पेत). —d) Ñ1 वचोर्थवित्; Ñ2 [ अ ]र्थवद्वचः; B1 ब्रवीद्वचः (sic) (for वचोऽर्थवत्). T1.3 M1 इदं वचनमर्थव( M1 °ब्रवी )त्. ❀ Cv.t : अपृच्छतेत्यस्य विवरणमिदमाह वच इ( Ct °माहे )ति ।; Cg : अपृच्छतेत्यस्य विवरणमिदं वचनमिति ।; Ck : अपृच्छतेत्यादि. ❀

2 a) M9 अलं तद् (for अतुलं). D6.7.10.11 T4 M3 एतद्वै ( for एताभ्यां ). Ś Ñ V1.3 B4 D1–5.8.9 एतयोरतुलं ( V3 D3 °रंतरं ) वीर्यं( V3 ब्रूहि ); B1.3 एतयोर्बहु संकीर्णं( B3 वीर्यं * ). —b) Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 रावणे ( for वालिनो ). D2.9 हि; G2 तु ( for च ). —c) Ñ1 नैव; B1 D2 ननु; B4 न च ( for न तु ). Ś Ñ V3 B4 D1–4.8.9.12 -वीर्यैः; B1.3 D5.6 -वीर्यं- ( for -वीर्यैः ). D10.11 न त्वेताभ्यां हनुमता. —d) D10.11 समं त्विति ( for समाविति ). D3 marg.; D4 om.; D12 मतं; T1 *inf. lin. pr.m.* ( for मतिर् ). ❀ Cv.t : एताभ्यामेतयोः( Ct षष्ठ्यर्थे चतुर्थ्यार्षी । एतयोर्बलं हनूमता तद्बलेन न सममित्यर्थः ) ।; Cg : एताभ्यामिति । एतयोरित्यर्थः । "षष्ठ्यर्थे बहुलं छन्दसीति वक्तव्यम्" इति षष्ठ्यर्थे चतुर्थी ।; Ck : एताभ्यामिति । एतयोरित्यर्थः । 'चतुर्थ्यर्थे बहुलं छन्दसी'त्यत्र बहुलग्रहणात् षष्ठ्यर्थेऽपि चतुर्थीह सर्वत्र. ❀

745* ऊचुः स प्रणयं वाक्यं राघवं नृपतिं प्रति ।

—Ś $D_{8.12}$ transp. $11^{cd}$ and $12^{ab}$. —$^c$ ) Ś Ñ $V_{1.3}$ $B_{1.4}$ $D_{1-5.8.9.12}$ [ अ ]सि ( for त्वं ). $D_5$ राजन् ( for राम ). —$D_1$ om ( hapl., see var. ) $11^d$–$12^a$. —$^d$ ) $M_7$ चैव ( for चापि ). Ś Ñ $B_{1.3.4}$ $D_{8.12}$ $M_1$ राज्ये चैव( $B_3$ चासि; $M_1$ चापि ) प्रतिष्ठितः ; $V_{1.3}$ $D_{2-5.9}$ $T_4$ K ( ed. ) दिष्ट्या राज्ये( K [ ed. ] स्वराज्येपि ) प्रतिष्ठितः.

12 $D_1$ om. $12^a$ ( cf. v.l. 11 ). $M_1$ om. ( hapl. ) $12^{ab}$. Ś $D_{8.12}$ transp. $11^{cd}$ and $12^{ab}$. —$^a$ ) $D_{3.4}$ प्रीत्याहृता; $T_4$ प्रमोचिता. —$^b$ ) Ś $D_{8.12}$ दिष्ट्या प्रत्याहृतो रिपुः. —After $12^{ab}$, Ś Ñ$_1$ $V_{1.3}$ $B_4$ $D_{1-5.8.9.12}$ ins. ; $D_7$ cont. after the first occurrence of 752*; $T_4$ $M_3$ ins. after 14 ; K ( ed., within brackets ) cont. after l. 2 of 752* :

746* दिष्ट्या ते कमलदलेक्षणं सुनासं
ताम्रोष्ठं मुखमिदमद्य शुक्लदन्तम् ।
पश्यामो विजयिनं महाहवेषु नित्यं
भ्राजन्तं नवशरदीव पूर्णचन्द्रम् ।

[ ( l. 1 ) $M_3$ वै ( for ते ). $D_7$ कमलवरेक्षणं. Ś $D_{8.12}$ कमलनिभं सुचारुनासं. —( l. 2 ) $B_4$ $D_8$ ताम्रौष्ठं. $T_4$ इमम् ( for इदम् ). $V_3$ आशु; $D_1$ एव; $D_4$ om. ( for अद्य ). K ( ed. ) अतिशोभि ( for इदमद्य ). $V_3$ चारुहासं ; $B_4$ सुदंतं; $D_9$ शुक्लदंष्ट्रं. —( l. 3 ) $V_3$ $D_{1.3-5}$ विजय-. Ś $V_1$ $D_{7.8.12}$ $T_4$ $M_3$ आहवेषु; $D_{2.9}$ आहवात् ( for महाहवेषु ). $B_4$ om. ; $D_{2.9}$ प्रमुक्तं ( for नित्यं ). —( l. 4 ) Ś $D_{8.12}$ राजंतं ; $M_3$ भ्राजन्ते. Ś$_{1.2}$ $V_{1.3}$ $B_4$ $D_5$ तव; $D_7$ $T_4$ $M_3$ निशि ( for नव- ). Ś $D_8$ शरदेव; $D_2$ -शारदीय- ( for -शरदीव ). $V_1$ om. ; $T_4$ पूर्व- ( for पूर्ण- ). ]

—$D_9$ om. $12^c$–$13^b$. —$^c$ ) $D_2$ अयं नः; $D_5$ $M_8$ एष मे( $M_8$ ते ) ( for एष नः ). —$^d$ ) $M_{1.5}$ ह्येषा ( for एषा ). K ( ed. ) वः ( for नः ). Ñ$_2$ $V_3$ $B_{1.3.4}$ $D_{1.4.10.11}$ प्रीतिर् ( for कीर्तिर् ). Ś Ñ$_1$ $V_1$ $D_{2.3.5.8.12}$ एषा ( $D_2$ इयं ) प्रीतिरनुत्तमा.

13 $D_9$ om. $13^{ab}$ ( cf. v.l. 12 ). —$^a$ ) $T_{1.2}$ यं ( for यत् ). $G_2$ $M_1$ रामं ( for राम ). —$^b$ ) Ś Ñ $V_{1.3}$ $B_{1.4}$ $D_{1-5.8.12}$ -कंटकं ( for -शात्रवम् ). —$^c$ ) $T_2$ स ( for च ). Ś Ñ $V_{1.3}$ $B_{1.4}$ $D_{1-5.8-12}$ एतत्त्वयु( $V_3$ °त्प्रत्यु )पपन्नं च ( Ś $D_{8.12}$ हि ). —$^d$ ) $D_6$ यस् ( for यत् ). Ś Ñ $B_{1.4}$ $D_{1.3-5.8.10-12}$ यदस्मांस्त्वं; $V_3$ योस्मान्स्त्वं; $B_3$ योद्यास्माकं; $D_9$ यस्माज्जस्त्वं; $M_6$ योस्मानेव ( for यत्त्वमस्मान् ). $D_{6.7.10.11}$ $T_1$ प्रशंससे; $M_1$ प्रशास्यसि. $V_1$ योस्मांस्त्वं संप्रशंसिरे; $D_2$ योस्मांस्त्वं प्रशशंससि; $G_1$ यत्त्वस्मान्प्रशशंससे. —After 13, Ś Ñ$_2$ $V_{1.3}$ $D_{1-5.8.9.12}$ ins.; while Ñ$_1$ $B_{1.4}$ ins. after $14^{ab}$ :

747* हतं हि बाहुवीर्येण रक्षस्तत्र नरेश्वर ।

प्रशंसार्हा हि जानन्ति प्रशंसां वक्तुमीदृशीम् ।
आपृच्छामो गमिष्यामो हृदिस्थो नः सदा भवान् ।
भवेच्च ते महाराज प्रीतिरस्मासु नित्यदा ॥ १४

G. 7. 42. 28
B. 7. 38. 31
L. 7. 40. 50

इति श्रीरामायणे उत्तरकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

[ Ś1 Ñ D8.12 हतो हि; Ś2.3 हतोभि-; V1 हतं तु; B1.4 हता हि ( for हतं हि ). V3 D2.9 नरोत्तम; D4 नरेश्वर:. Ś D8.12 रावणो हि महाबल:; Ñ1 रक्षस्ते नृपसत्तम; Ñ2 B1.4 राक्षसा( Ñ2 °स )स्ते नृपोत्तम( Ñ2 °पात्मज ); V1 रक्षस्त्वद्बलवोत्तमां ( sic ) ( for the post. half ). ]

—Thereafter Ś D8.12 cont. :

748* रावण: सगणो युद्धे देवैरपि दुरासद: ।;

while D1.3.4 cont. l. 1 of 750*.

14 Ś Ñ2 V1.3 D2.5.8.9.12 om. $14^{ab}$. D1.3.4 transp. $14^{ab}$ and $14^{cd}$ ( followed by 749* ). —$^{ab}$ ) M1 [अ]भि- ( for हि ). D1.3.4 T1.2 कर्तुम् ( for वक्तुम् ). D7.10.11 G1.3 M5 प्रशंसार्ह( G1 °र्हं ) न जानीम: ; M3 प्रशंसां नाभिजानंति ( for $^{a}$ ). T G1.3 M1.8.9 ईदृशं. Ñ1 B1.4 प्रशंसार्होसि राजेंद्र प्रशंसामस्ततो वयं. —After $14^{ab}$, Ñ1 B1.4 ins. 747*. —$^{c}$ ) Ś D8 T1.2 G2 M3 आपृच्छाम. B3 D1.3.4 M6 च( B3 [ ऽ ]द्य; M6 [ ऽ ]थ ) गच्छामो; G2 गमिष्याम ( for गमिष्यामो ). —$^{d}$ ) D1.3.4 भव ( for भवान् ). T4 हृदि ते नित्यशो वयं. —After $14^{cd}$, D1.3.4 ins. :

749* न रामरावणं युद्धं पश्यामः पुरतः स्थितम् ।
भरतेन वयं पश्चात्समानीता निरर्थकम् ।
हता हि पार्थिवैर्नित्यं राक्षसाः स्युर्न संशयः ।
रामस्य बाहुवीर्येण रक्षितैर्लक्ष्मणस्य च ।
सुखं पारे समुद्रस्य युद्धेन विगतज्वरैः । [5]
एताश्चान्याश्च राजानो गिरस्तत्र सहस्रशः ।
कथयन्तः स्वराष्ट्राणि जग्मुर्हर्षसमन्विताः ।

[ Cf. 7.38. $3^{c}$–6. —( l. 6 ) D3 कथाश्चैवं ( for गिरस्तत्र ). — ( l. 7 ) D1 च ( for स्व- ). ]

—D5 reads $14^{ef}$ ( followed by 752* ) after colophon. —$^{ef}$ ) B3 भवेद्यात्र; M1 भूयाच्च ते ( for भवेच्च ते ). M6 रतिर् ( for प्रीतिर् ). B3 निश्चिता; G1 नित्यश: ( for नित्यदा ). Ś D8.12 अस्माकमपि या प्रीति: सा ते भूयात्तु नित्यदा. —For $14^{cdef}$, Ñ V1 B1.4 D2.9 subst. ; V3 D5 subst. l. 1 for $14^{cd}$ and then cont. l. 2 ; D1.3.4 cont. l. 1 after 747* and subst. l. 2 for $14^{ef}$ and read before $14^{cd}$; D6.7.10.11 T3.4 M1–4.7.9.10 ins. l. 2 only after $14^{cd}$; M1 ins. l. 2 only after $14^{ab}$ :

750* आमन्त्रयामहे वीर हृदि ते नित्यशो वयम् ।
वर्तामहे महाबाहो प्रीत्या च परयान्विताः ।

[ ( l. 1 ) B1 चेन् ( for ते ). D1.4 नित्यशोचितं ( sic ). —( l. 2 ) V1.3 D1–4.9 वर्तमहि. Ñ V1.3 B1.4 D1–5.9 T4 प्रीतिह्यस्मा( B1.4 D1.3.4.9 °रस्मा; D5 T4 °युष्मा )कमुत्तमा; D6.7.10.11 प्रीत्यात्र महता( D6 परया; D7 भवता )वृता: ; M3 प्रीत्या त्वयि समन्विता: ; M4.7.10 प्रीत्या परमयान्विता: ( for the post. half ). ]

—Thereafter B1.4 cont. ; V3 B3 ins. after 14 :

751* भवत्येव महाराज इक्ष्वाकुकुलनन्दन ।
एवं नृपाः समभिधाय तदा नरेन्द्रं
नानाविधानि सुबहूनि चिरं प्रियाणि ।
नानाविधाः प्रवरवाहनसंप्रयुक्ताः
प्रीताः स्वकानि नगराणि पुनः प्रयाताः । [5]

[ B1 om. l. 1. —( l. 1 ) Note hiatus between two halves. V3 B3 सुस्निग्धा ( V3 °स्थिता ) नरशार्दूला ( V3 °ल ) ( for the prior half ). —( l. 2 ) B1 एवंविधा:. —( l. 3 ) B1 चिर- ( for चिरं ). —( l. 4 ) B4 नानाविध-. ]

—After 14, D5.6.7( repeats before 7. 38. 1 ).10.11 T1–3 G M1.2.4.5.7–10 K ( ed. ) ins. ; T4 M3 ins. before 7. 38. 1 :

752* बाढमित्येव राजानो हर्षेण महतान्विताः ।
ऊचुः प्राञ्जलयः सर्वे राघवं गमनोत्सुकाः ।
पूजिताः सह रामेण जग्मुर्देशान्स्वकान्स्वकान् ।

[ M1 transp. l. 1 and l. 2. —( l. 1 ) D7( second time ) T4 M3 इत्युत्सुका हि ( for बाढमित्येव ). T3 प्रीत्या च ( for हर्षेण ). D5.6.7( both times ).10.11 T3 M2.4.5.8 परमा( T3 °या )न्विता: ; K ( ed. ) परमन्विता:. —( l. 2 ) D7( second time ) T4 M1.3 -[ उ ]द्यता: ; T3 -[ उ ]न्मुखा: ( for -[ उ ]त्सुका: ). —After l. 2, K ( ed., within brackets ) cont. 746* followed by l. 1 and 2 of 752( A )*. —( l. 3 ) D7( first time ).10.11 ते च; T1.2 ते हि; G3 * हि; M1.5 त्वथ; K ( ed. ) चैव ( for सह ). M3 पूजिताश्च महात्मानो ( for the prior half ). M3 गृहान् ( for second स्वकान् ). —For l. 3, D7 ( second time ) T4 subst. ; M3 ins. after l. 2 :

752( A )* पूजिताश्च त्वया राम मानिताश्च विशेषतः ।
गमिष्यामो महाराज स्वं स्वं देशं रघूत्तम ।
तथेत्युक्तवता तेन रघूणां प्रवरेण ते ।

[ ( l. 2 ) M3 स्वान्स्वान्देशान्. —D7 T4 om. l. 3. ]

—After the first occurrence of 752*, D7 cont. 746*. —After 14, T4 M3 ins. 746*.

# ३८

G. 7. 42. 29 B. 7. 39. 1 L. 7. 41. 1 ते प्रयाता महात्मानः पार्थिवाः सर्वतो दिशम् ।
कम्पयन्तो महीं वीराः स्वपुराणि प्रहृष्टवत् ॥ १
अक्षौहिणीसहस्रैस्ते समवेतास्त्वनेकशः ।
हृष्टाः प्रतिगताः सर्वे राघवार्थे समागताः ॥ २
ऊचुश्चैव महीपाला बलदर्पसमन्विताः ।
न नाम रावणं युद्धे पश्यामः पुरतः स्थितम् ॥ ३
भरतेन वयं पश्चात्समानीता निरर्थकम् ।
हता हि राक्षसास्तत्र पार्थिवैः स्युर्न संशयः ॥ ४

Colophon : G (ed.) om. —*Sarga name* : Ś1 D2.8.9.12 राज्ञां प्रयाणं ( D8.12 °णः ); Ś2.3 Ñ2 V1.3 D1.4 राजप्रयाणः ( Ñ2 V1.3 °णं; D1.4 °णे ); Ñ1 राजन्यकप्रयाणं; B1.3 राजसंप्रेष ( B3 °र )णं; B4 राजप्रेषणः ; D5 समागतराजविसर्जनः. —*Sarga no.* ( figures, words or both ): Ś Ñ1 V3 B1.3 D2.12 om.; Ñ2 D1.3–5 41; V1 33; B4 T3 43; D6–8.10.11 T1.2 G M1–5.7–10 38; D9 46; T4 45; M6 36; L (ed.) 40. —After colophon, D5 reads $14^{ef}$ ( followed by 752* ); while T4 concludes with श्रीरामार्पणमस्तु; G M1.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

## 38

☞ V2 missing; B2 om. Sarga 38 ( cf. v.l. 7.12.2 and 7.35 respy. ). Before 1, D7 ( repeats ) T4 M3 ins. 752*.

1 $^{b}$) D7 सर्वतो दिशः; D10.11 ते प्रहृष्टवत् ( for सर्वतो दिशम् ). ❀ Cg.k.t : प्रहृष्टवत् प्रहृष्टाः ( Cg.k add सन्तः ). ❀ —For subst. in Ś etc. cf. v.l. 2. —$^{c}$) M1.5 कृत्स्नां ( for वीराः ). —$^{d}$) M6 महाबलाः ( for प्रहृष्टवत् ). M1 पुराण्युपवनानि च; M5 पुराणेवनावृतां.

2 M6 transp. $2^{ab}$ and $2^{cd}$. —$^{a}$) B3 T2.4 तु; T1 G M1.3.10 तैः ( for ते ). —$^{b}$) B3 M9 सहस्रशः ( for त्वनेकशः ). —$^{c}$) T4 M1.5 प्रमुदिताः ( for प्रतिगताः ). M6 प्रहृष्टा मुदिताः सर्वे. —$^{d}$) M6 राघवार्थं. M1.5 समाहिताः ( for °गताः ). —For $1^{c}$–2, Ś Ñ V1.3 B1.4 D subst.; B3 subst. l. 2 and l. 4 only for $1^{cd}$ and $2^{cd}$ respy.; T4 subst. l. 2 only for $1^{cd}$ :

753* कथयन्तो महावीराः स्वपुराणि महाबलाः ।
गजवाजिसहस्रौघैः कम्पयन्ति स्म मेदिनीम् ।
अक्षौहिण्यो हि तत्रासन्राघवार्थे समुद्यताः ।
भरतस्याज्ञयानेकाः प्रहृष्टबलवाहनाः ।

[ Ñ V1.3 B1.4 D2–7.9–11 om. l. 1. —( l. 2 ) Ñ1 V1.3 B1.3.4 D1–4.9.12 T4 रथ- ( for गज- ). D4.6.8 -[ ओ ]घैः ( for -[ औ ]घैः ). D4 च ( for स्म ). Ñ1 V1 D9 T4 कंपयंतश्च; V3 कंपयश्चिव ( for कम्पयन्ति स्म ). Ñ2 B1.3.4 D6.7.10.11 कंपयंतो वसुंधरां ( for the post. half ). —After l. 2, V3 ins. :

753( A )* अथ तत्र महाशब्दो नद्यां वर्षेष्विवोत्थितः ।

—( l. 3 ) D5 [ आ ]सीत् ( sic ) ( for [ आ ]सन् ). Ñ1 अक्षौहिणीसहायास्ते ( for the prior half ). D2 रावणार्थे. —( l. 4 ) Ñ1 चैव ( for [ अ ]नेकाः ). B3 D6 प्रहृष्टा. Ś Ñ1 V1.3 B1.3.4 D1–5.8.9.12 -नर-; D6 -जन- ( for -बल- ). ]

3 $^{a}$) Ś Ñ V1.3 B1.3.4 D1–8.10–12 ते ( for च ). D9 ययुस्ते ( for ऊचुश्च ). Ñ2 B1.3 D6.7.10.11 च; B4 तु; M6 ते ( for [ ए ]व ). Ś Ñ1 V1.3 D1–5.8.9.12 पृथिवीपालाः; M3 [ ए ]व महात्मानो ( for [ ए ]व महीपालाः ). —For $3^{c}$–6 in D1.3.4 cf. 749*. B3 om. $3^{cd}$. M6 transp. $3^{cd}$ and $4^{ab}$. —$^{c}$) V3 तं ( for न ). Ś Ñ V1.3 B1 D2.5.7–11 T2.3 G3 M1 राम; B4 D6.12 T1 रामं; M3 हि स्म ( for नाम ). Ñ1 M6 रावणो. V3 D2.5 T3 G3 युद्धं; M6 [ ऽ ]स्माभिर् ( for युद्धे ). ❀ Cg : रामरावणं रामस्य रावणम् । वध्यघातुकसंबन्धः षष्ठ्यर्थः। रामं रावणमिति पाठे युद्धे रामं रावणं च युध्यमानौ रामरावणावित्यर्थः।; Ck : रामरावणमिति । रामस्य रावणो रामरावणः। वध्यघातकसंबन्धषष्ठ्याः समासः। रामस्य शत्रू रावणो रामरावणः।; Ct : रामरावणमिति । रामशत्रुं रावणमित्यर्थः। मध्यमपदलोपी समासः. ❀ —$^{d}$) T2.3 G1.3 M5.8.10 पश्याम. Ś D8.12 T3 G3 स्थिताः. D5 तदस्माभिर्निरीक्षितं; M1 अपश्यामः परस्थितं ( sic ); M6 दृष्टो युद्धे स राक्षसः. —After 3, Ś2.3 D8.12 ins. the lines ( l. 1 and 2 transp. ) of 2 and $3^{ab}$.

[ ( l. 1 ) Ś2.3 D8.12 अक्षौहिणी( Ś2 °ण्य )स्तु तास्तत्र ( for the prior half ). Ś3 त्वनीकशः ( for त्वने° ). —( l. 2 ) Ś2.3 D8 समुदिताः; D12 प्रमुदिताः ( for प्रतिगताः ). Ś2.3 D8.12 राघवार्थं. Ś2.3 D8 समुद्यताः ( for समागताः ). —( l. 3 ) Ś2.3 D8.12 ययुश्च सुमहावीर्या ( for the prior half ). ]

4 For $3^{c}$–6 in D1.3.4 cf. 749*. M6 transp. $3^{cd}$ and $4^{ab}$. —$^{a}$) B1 वश्याः ( for पश्चात् ). ❀ Cg.t : पश्चाद्रावणवधानन्तरम् ।; so also Ck. ❀ —After $4^{ab}$, Ś D8.12 ins. :

754* न चैव रावणोऽस्माभिर्दृष्टश्च युधि राक्षसः।

[ D12 स ( for च ). D8 दृष्ट युधि स ( for दृष्टश्च युधि ). ]

—$^{cd}$) Ś D8.12 तथा ( sic ); B3 मृताः; T3 हतो ( for हता ). Ñ V1.3 B1.4 D2.5.7.9–11 क्षिप्रं ( for तत्र ). Ś D8.12 M6 पार्थिवाः. V1.3 D2.5.9 transp. राक्षसास् and पार्थिवैः. T4 G2 तैर् ; M5 तु ( for स्युर् ).

रामस्य बाहुवीर्येण पालिता लक्ष्मणस्य च ।
सुखं पारे समुद्रस्य युध्येम विगतज्वराः ॥ ५
एताश्चान्याश्च राजानः कथास्तत्र सहस्रशः ।
कथयन्तः स्वराष्ट्राणि विविशुस्ते महारथाः ॥ ६
यथापुराणि ते गत्वा रत्नानि विविधानि च ।
रामाय प्रियकामार्थमुपहारान्नृपा ददुः ॥ ७

अश्वान्रत्नानि वस्त्राणि हस्तिनश्च मदोत्कटान् ।
चन्दनानि च दिव्यानि दिव्यान्याभरणानि च ॥ ८
भरतो लक्ष्मणश्चैव शत्रुघ्नश्च महारथः ।
आदाय तानि रत्नानि अयोध्यामगमन्पुनः ॥ ९
आगताश्च पुरीं रम्यामयोध्यां पुरुषर्षभाः ।
ददुः सर्वाणि रत्नानि राघवाय महात्मने ॥ १० G. 7. 42. 38 B. 7. 39. 12 L. 7. 41. 11

5 For $3^{c}$–6 in D1.3.4 cf. 749*. Ś D8.12 transp. $^{ab}$ and $^{cd}$. —$^{b}$) Ñ V1.3 B1.4 D5.7.9–11 रक्षिता; D2 लक्षिता (for पालिता). D2.9 लक्ष्मणेन. —$^{c}$) D6 T4 पारं. M6 सुपारे हि (for सुखं पारे). —$^{d}$) Ś D8.12 वत्स्यामो; B3 युद्धे हि; D2 युध्यामो; T3 युध्याम; T4 पश्येम; G2 यास्यामो (for युध्येम). B1.4 M8 हि गतज्वराः; M3 यदि विज्वराः (for विगतज्वराः). M5 युद्धे विगतविज्वराः.

6 For $3^{c}$–6 in D1.3.4 cf. 749*. —$^{a}$) T1.4 G2 एते चान्ये च (for एताश्चान्याश्च). —$^{b}$) B3 शत-; D2.9 तस्य (for तत्र). —V3 om. $6^{c}$–$7^{b}$. —$^{c}$) Ś3 D8.12 च (for स्व-). Ñ2 D7.10.11 -राज्यानि (for -राष्ट्राणि). —$^{d}$) B1 तैर्; B3 सु- (for ते). Ś D8 महाबलाः; B1.3.4 बलैर्वृताः (for महारथाः). Ñ V1 D2.5.7.9–11 T4 जग्मुर्हर्षसमन्विताः. —After 6, D6.10.11 S (except M6) ins.:

755* स्वानि राज्यानि मुख्यानि ऋद्धानि मुदितानि च।
युक्तानि धनधान्येन पूर्णानि वसुमन्ति च ।

[(l. 1) T3 M2.4.5.7.9 तानि; Cg.t as above (for स्वानि). ❀ Cg.k : मुख्यानीति । प्रसिद्धानीत्यर्थः ।; so also Ct. ❀ —(l. 2) D6 T1.2 G3 दृश्यानि; G2 M1 ऋद्धानि; M3 रम्याणि (for युक्तानि). D6 T1.2 M3.10 -धान्यैश्च; G3 -धान्यानि (for -धान्येन). D10.11 T4 समृद्धधनधान्यानि; G1 धनधान्यैश्च पूर्णानि; M5 धनधान्येन पूर्णेन (for the prior half). D11 reads the post. half in marg. G1 M5 वसुमंति महांति च (for the post. half). ❀ Cg.k.t : धनं जीवा (Cg °विका) जीवरूपम् । वसुमन्ति महानिधिमन्ति. ❀ ]

7 V3 om. $7^{ab}$ (cf. v.l. 6). —$^{a}$) Ñ V1 B1.3.4 D1–5.7.9 पुराणि स्वानि; M3 तदा पुराणि (for यथापुराणि). T3 गत्वाथ (for ते गत्वा). ❀ Cg : यथापुराणि यथाप्राप्तस्वस्वपुराणि ।; so also Ck; Ct : यथापुराणि यथापूर्वमक्षतशरीरतया पुराणि. ❀ —$^{b}$) Ś Ñ B1.4 D2.7–12 T4 G1.2 M5.8 [अ]थ (for च). —$^{c}$) Ś Ñ V1.3 D1–5.7–12 M1.3 रामस्य (for रामाय). B1.4 T3 प्रीति- (for प्रिय-). B1 -कामाय; Ck.t as in text (for -कामार्थम्). —$^{d}$) V1 D1–5.9 M2.6.9 Cv अभि-; B1 सद्भि-; Cg as in text (for उप-). Ñ2 V1.3 D1–7.9–11 T1.2.4 M3.6 -हारं; Cv.g as in text (for -हारान्). B3 अभिवादं; G3 उपाहारान् (for उपहारान्). Ñ1 नृपाहरन् (metri causa); B1.4 उपाहरन् (for नृपा ददुः). ❀ Cv.g : अभि (Cg उप) हारान् प्रत्युपहारान्. ❀

8 V3 om. $8^{ab}$. —$^{a}$) Ś1 D1–5.8.9.12 T3 अश्वान्धनानि; Ś2.3 Ñ2 V1 B1.4 D7.10.11 G2 M2.4.5.8–10 अश्वान्यानानि; Ñ1 अश्वानि यानि (sic); B3 यानान्यश्वांश्च; D6 T1.2 G3 M1.3 अश्वरत्नानि; T4 अश्वान्रथांश्च (for अश्वान्रत्नानि). Ś Ñ V1 B1.3.4 D1–3.5.7–12 रत्नानि; D4 om. (hapl.); G1 वर्णानि (for वस्त्राणि). —$^{b}$) T2 सहस्त्रिश्; T3 दंतिनश् (for हस्तिनश्). Ś D1–5.8.9.12 [ऽ]थ (for च). D2.9 मदोत्कटाः. —$^{c}$) Ñ1 B1.3.4 चंदनागुरु-; G1 चंदनान्यपि (for चन्दनानि च). Ś Ñ V1 B1.3.4 D1–5.7–12 T4 M6 मुख्यानि (for दिव्यानि). —$^{d}$) Ś D8.12 चित्राणि; V3 मुख्यानि (for दिव्यानि). —After 8, Ś Ñ2 B3 D1.4.6–8.10–12 S K (ed.) ins.:

756* मणिमुक्ताप्रवालांश्च दासी रूपसमन्विताः ।
अजाविकं च विविधं रथांश्च विविधान्बहून् ।

[(l. 1) D12 M8.9 -मुक्त-. Ś1.3 D1.4.8.12 -प्रवालं. Ś2 Ñ2 D7.10.11 तु (for च). T3 -प्रवालानि. Ñ2 B3 D7.10.11 दास्यो रूप-; D1.4 (both with hiatus) आशीर्जय- (for दासी रूप-). Ś D8.12 दासीजनसमायुतं (for the post. half). —(l. 2) Ś D1.4.8.12 M1.6.7 अजाविकांश्च विविधान् (for the prior half). ❀ Cg : अजाविकान् चर्ममयान् तल्पविशेषानित्यर्थः । अजाविकं च विविधमिति वा पाठः ।; so also Ck; Ct : अजाविकं विशिष्टचर्मवत्. ❀ D6 रत्नांश् (for रथांश्). Ś3 Ñ2 D7.10.11 तु (for च). D1.4 दिव्यांश्चैव रथान्; M10 विविधांश्च रथान (by transp.) (for रथांश्च विविधान्). K (ed.) ददुः (for बहून्).]

9 M9 om. 9–$11^{b}$. —$^{b}$) Ś Ñ V1.3 B3 D1–5.7–12 T4 M3 महाबलः; B1.4 महायशाः; T3 महाबलाः (for महारथः). —Note hiatus between $^{c}$ and $^{d}$. —$^{c}$) D2 [ए]तानि (for तानि). —$^{d}$) T3 त्वयोध्याम्; M3.5 ह्ययोध्याम् (for अयोध्याम्). D6 M2.3 अगमत्; M6 आगताः; M8 आगमन् (for अगमन्). D6 T1.2 G3 M1.3 पुरीं (for पुनः). Ś Ñ V1.3 D1–5.7–12 स्वां पुरीं (Ś1.2 D8.12 अयोध्यां; Ś3 पुर्योध्यां) पुनरागताः (D5 °मन्); B1.3.4 तेयोध्यामागताः पुनः; G2 अयोध्यानगरीं पुरीं.

10 M9 om. 10 (cf. v.l. 9). —$^{a}$) Ś Ñ V1.3 B1.3.4 D1–4.7–12 आगम्य; D5 T4 आगत्य (for आगताश्). D1.4

G. 7. 42. 39
B. 7. 39. 13
L. 7. 41. 12

प्रतिगृह्य च तत्सर्वं प्रीतियुक्तः स राघवः ।
सर्वाणि तानि प्रददौ सुग्रीवाय महात्मने ॥ ११
विभीषणाय च ददौ ये चान्ये ऋक्षवानराः ।
हनूमत्प्रमुखा वीरा राक्षसाश्च महाबलाः ॥ १२
ते सर्वे हृष्टमनसो रामदत्तानि तान्यथ ।
शिरोभिर्धारयामासुर्बाहुभिश्च महाबलाः ॥ १३
पपुश्चैव सुगन्धीनि मधूनि विविधानि च ।
मांसानि च सुमृष्टानि फलान्यास्वादयन्ति च ॥ १४
एवं तेषां निवसतां मासः साग्रो गतस्तदा ।
मुहूर्तमिव तत्सर्वं रामभक्त्या समर्थयन् ॥ १५

तां; $D_5$ तु (for च). $V_3$ पुण्याम् (for रम्याम्). —$^{b}$) Ś $D_8$ राघवर्षभाः. —After $10^{ab}$, Ś $D_{8.12}$ ins.:

757* ततः सर्वं यतो येन आनीतं सुमहद्धनम् ।

[Note hiatus between the two halves.]

—$^{c}$) $M_{10}$ वस्त्राणि (for सर्वाणि). —For $10^{cd}$, Ñ $V_{1.3}$ $B_{1.3.4}$ $D_{1-5.7.9-11}$ subst.:

758* तानि रत्नानि चित्राणि रामाय समुपानयन् ।

[$B_{1.3.4}$ रामाय (for चित्राणि). $B_{1.3.4}$ विचित्राणि न्यवेदयन् (for the post. half).]

**11** $M_9$ om. $11^{ab}$ (cf. v.l. 9). —$^{a}$) $Ñ_1$ परि- (for प्रति-). $Ñ_1$ $V_{1.3}$ $B_{1.4}$ $D_{2.9}$ $T_4$ तु (for च). —$^{b}$) $D_6$ $T_{1.2}$ $G_3$ च (for स). $M_8$ प्रीतियुक्तेन. Ñ $V_{1.3}$ $D_{1-5.7.9-11}$ रामः प्रीतिसमन्वितः. —$^{cd}$) $G_1$ प्रददुः. Ś $D_{8.12}$ प्रददौ तानि (by transp.). Ñ $V_{1.3}$ $B_{1.4}$ $D_{1-5.7.9-11}$ $T_4$ सुग्रीवाय ददौ राज्ञे महात्मा कृतकर्मणे.

**12** $^{a}$) $V_3$ $B_1$ $M_6$ प्र-; L (ed.) om. (subm.) (for च). —$^{b}$) $D_6$ वा (for च). Ñ $V_{1.3}$ $B_{1.3.4}$ $D_{1-5.7.9-11}$ $T_{3.4}$ तथान्येभ्योपि ($V_3$ °था चान्येपि च [hypm.]) राघवः. —After $12^{ab}$, $T_3$ ins. a passage relegated to App. I (No. 5). —$^{c}$) Ś $D_{8.12}$ $M_6$ सर्वे (for वीरा). —For $12^{cd}$, Ñ $V_{1.3}$ $B_{1.3.4}$ $D_{1-5.7.9-11}$ subst.:

759* राक्षसेभ्यः कपिभ्यश्च यैर्वृतो जयमाप्तवान् ।

[$B_{1.3.4}$ कपिभ्यो राक्षसेभ्यश् (by transp.). —$V_3$ lacuna for the post. half. $D_{1.4}$ कृत्वा (for वृतो). $B_{1.3.4}$ युद्धवांस्तदा ($B_4$ °था); $D_3$ जयमाप्नुयात्.]

—After 12, $G_{1.2}$ $M_{1.5}$ ins.:

760* तेषामपि ददौ रामो रत्नवस्त्राण्यनेकशः ।

**13** $^{a}$) $Ñ_2$ $V_1$ $D_{2.9}$ $T_4$ सर्वे ते (by transp.); $B_3$ ते तदा (for ते सर्वे). Ñ $V_{1.3}$ $B_{1.4}$ $D_{1-5.7.9-11}$ $T_4$ रामदत्तानि (for हृष्टमनसो). —$^{b}$) Ś $D_{8.12}$ [अ]मानुषाः (for तान्यथ). Ñ $V_{1.3}$ $B_{1.4}$ $D_{1-5.7.9-11}$ $T_4$ रत्नानि ($B_1$ गृहीत्वा) कपिराक्षसाः. —$^{c}$) $V_1$ $D_{2.5.9}$ $T_4$ शिरःसु; $D_{1.4}$ शिरसा; $D_3$ शिरसि (for शिरोभिर्). —$^{d}$) $Ś_{1.3}$ $D_{8.12}$ $M_6$ भुजैश्चापि; $Ś_2$ damaged; $Ñ_2$ $V_{1.3}$ $D_{1.3-5.7.9-11}$ $T_4$ भुजेषु च ($V_1$ om. च [subm.]); $D_2$ रत्नेषु च (for बाहुभिश्च). $G_2$ महारथाः (for °बलाः). $Ñ_1$ $B_{1.3.4}$ भुजैश्च भुजगोपमैः. ❀ Cg: शिरोभिरिति। मुकुटकुण्डलादीनीति भावः। बाहुभिरिति। अङ्गदादीनीत्यर्थः। भुजेषु चेति पाठः।; Ck: शिरोभिर्धारयामासुरिति। किरीटकुण्डलादिरूपेण शिरोलंकाराईरत्नानि शिरोभिर्धारयामासुरित्यर्थः। तथा बाह्वा(ह्वा?)द्यलंकाराहीङ्गदहारादीन् बाह्वादिभिरित्यर्थः।; Ct: शिरोभिः किरीटकुण्डलादीनां धारणम्। अङ्गदादीनां भुजेषु धारणम्. ❀ —After 13, Ś Ñ $V_{1.3}$ $B_{1.3.4}$ D ($D_6$ l. 1 only) ins. a passage relegated to App. I (No. 5).

**14** $^{a}$) Ś $D_{8.12}$ बहूनि च; Ñ $V_{1.3}$ $B_{1.3.4}$ $D_{1-5.7.9-11}$ $T_4$ ते पिबंत:($T_4$ °ति); $M_9$ पुरश्चैव (for पपुश्चैव). —$^{b}$) Ñ $V_{1.3}$ $B_{1.3.4}$ $D_{1-5.7.9-11}$ $T_4$ मधुपिंगलाः; $T_3$ च फलानि च (for विविधानि च). —$^{c}$) $M_6$ मद्यानि (for मांसानि). $D_2$ [ए]व; $D_9$ [ए]वं; $M_1$ सु- (for च). $D_5$ प्र-; $G_2$ $M_1$ स- (for सु-). —After $14^{c}$, $Ñ_1$ $V_1$ $D_{2.3.5.9}$ $T_4$ ins.:

761* दिव्यानि रुचिराणि च ।
विविधानि सुगन्धानि.

[(l. 2) $D_{2.3.5}$ $T_4$ सुगंधीनी.]

—$^{d}$) $T_3$ बहूनि (for फलानि). $T_{2.3}$ $G_{1.2}$ $M_{4.7.8.10}$ [आ]स्वादवंति. Ś $D_{8.12}$ L (ed.) भुक्त्वाति(L [ed.] भु[भो?]क्तानि)स्वादवंति च; $Ñ_1$ $V_{1.3}$ $D_{1-5.9}$ $T_4$ फलानि परमाणि च; $Ñ_2$ $B_{1.3.4}$ $D_{7.10.11}$ मूलानि च फलानि च. —After 14, $Ñ_1$ $V_1$ $D_{1-5.9}$ $T_4$ ins.:

762* पुष्पाणि च विचित्राणि सुगन्धीनि लघूनि च ।

[$D_{1.4}$ सु- (for च). $D_{1.3-5}$ या($D_5$ पा)नानि विविधानि च (for the post. half).]

—Thereafter, $V_1$ cont.; while $B_4$ ins. after 14:

763* भुञ्जाना भोगजालानि तेऽयोध्यां न्यवसन्पुरीम् ।

[$V_1$ -जातानि, च and तु ते (for -जालानि, ते and पुरीम् respy.).]

**15** $^{ab}$) Ś $D_{8.12}$ हैमो (for साग्रो). Ś $Ñ_2$ $V_3$ $B_{1.3.4}$ $D_{7.8.10-12}$ ययौ तदा; $D_6$ $T_{1.2}$ $G_3$ $M_{1.3}$ व्यतीयत; $T_3$ [ऽ]गमत्तथा; Cv as in text (for गतस्तदा). $Ñ_1$ $V_1$ $D_{1-5.9}$ $T_4$ एवं तैः समतिक्रांतं($V_1$ °ते) दीर्घकालं सुतर्पितैः. —$^{c}$) $D_7$ अपि (for इव). Ñ $V_3$ $B_{1.3.4}$ $D_{7.9-11}$ ते सर्वे; $V_1$ सर्वे ते; $D_2$ सर्वं ते; $T_4$ सेवंते (for तत्सर्वं). —$^{d}$) $D_2$ रामभक्ताः; $G_2$ वानरार्थैः; $M_9$ °शक्त्या (for रामभक्त्या). Ś $D_{8.12}$ समर्पयन्; Ñ $V_3$ $B_{1.3.4}$ $D_{7.10.11}$ च मेनिरे; $D_{1.4}$ समर्चितं; $D_{3.5}$ समन्वितं; $T_3$ समत्यजन्; $T_4$ समर्चयन् (for समर्थयन्). ❀ Cv: एवं तेषां निवसतां मासः साग्रो गतस्तदेति। वसन्ते रघु-

रेमे रामः स तैः सार्धं वानरैः कामरूपिभिः ।
राजभिश्च महावीर्यै राक्षसैश्च महाबलैः ॥ १६

एवं तेषां ययौ मासो द्वितीयः शैशिरः सुखम् ।
वानराणां प्रहृष्टानां राक्षसानां च सर्वशः ॥ १७

G. 7. 42. 55
B. 7. 39. 29
L. 7. 41. 27

इति श्रीरामायणे उत्तरकाण्डे अष्टात्रिंशः सर्गः ॥ ३८ ॥

नाथस्याभिषेकमभिसंधाय तस्य सेवया ग्रीष्मप्रावृषी नीत्वा शरदि स्वदेशान्प्रति गतेषु राजसु ।; Cg : एवं तेषां निवसतामिति । आभरणादिभिः सत्कृतानां निवसतां तेषां साग्रः पञ्चषड्दिनाधिको मासो गतः ।; Ck: एवं तेषां निवसतामिति । भरताद्यानीतरत्नाविशेषतोऽपि (°तो वि ?)शेषसत्कारप्राप्तिपर्यन्तं निवसतां तेषां साग्रः पञ्चषड्दिनाभ्यधिको मासो गत इत्यर्थः ।; Ct : एवं तेषामिति । वसन्तेऽभिषिक्तेन रामेण मासानन्तरं विशेषसत्कारप्राप्तौ शिशिरः शिशिरर्तुसंबन्धी द्वितीयो मासः सुखं गत इत्युक्त्या संवत्सरपर्यन्तं तेषां रामसमीपे वास उक्त इति तीर्थादयः । वस्तुतोऽधिकमासगणनयामान्तमानेनाश्विनकृष्णपक्षेऽयोध्याप्रवेशेन तत्रैव तदुत्तरशुक्लपक्षे वाभिषेकः । साग्रो मास इत्यनेन कार्तिकान्ता स्थितिरुक्ता । ततः शिशिरो द्वितीयो मासः फाल्गुनो गत इति हेमन्तशिशिरावधेशरच्च तत्र वास इति पञ्चमासपर्यन्तं तत्र वास इति लभ्यते इति मम भाति । पूर्वकाण्डान्तसंक्षेपेणोक्तस्यैवार्थस्यात्र काण्डे विस्तरेणोक्तिरिति बोध्यम् । एवं भरताद्यानीतरत्नविशेषैर्विशेषसत्कारप्राप्तिपर्यन्तं निवसतां तेषां साग्राः षड्षड्दिनाधिका मासा गताः. ❀

16 $^{a}$) Ś D8.12 M6 [ऽ]पि (for स). Ñ V1.3 B1.3.4 D1–5.7.9–11 T4 रामोपि रमते(Ñ2 B1.4 D1.3.7.10.11 रेमे तैः (for रेमे रामः स तैः).—G2 om. 16$^{c}$–17. Ś2 D5 read 16$^{c}$–17 twice.—$^{c}$) Ś (Ś2 both times) D8.12 भ्रातृभिश्च ; Ñ V1.3 B1.3.4 D2.7.9–11 T4 राक्षसै° ; D1.3–5 (first time) गोपुच्छै°; D5 (second time) राजर्षिभिर् (for राजभिश्च).—$^{d}$) Ñ V1.3 B1.3.4 D1–5(first time) .7.9–11 T4 ऋक्षै(V3 * * [lacuna])श्चैव(B1 °श्च सु-) (for राक्षसैश्च). Ñ1 मदोद्धतैः; V1.3 D1–5(first time).9 T4 बलो(V1.3 D2.9 T4 मदो)त्कटैः (for महाबलैः). T3 राक्षसैः कामरूपिभिः.

17 G2 om. 17 (cf. v.l. 16). Ś2 D5 read 16$^{c}$–17 twice.—$^{a}$) D8 एष (for एवं). D5 (second time) M1.5 गतो (for ययौ). Ñ1 V1.3 D2.3.5(first time).9 T4 उपययौ (for ययौ मासो).—$^{b}$) Ñ2 B1.3.4 D7.10.11 T1.3 M1.6.9.10 Ct शिशिरः; Cv.g.k as in text (for शैशिरः). Ñ2 B1 D7 तथा; B3.4 तदा; M6 सुखः; Cv.g.k.t as in text (for सुखम्). Ñ1 V1.3 D1–5(first time).9 T4 वसतां तत्र शैशिरः.—D1 om. 17$^{cd}$. T4 reads 17$^{cd}$ twice.—$^{cd}$) Ś2 (both times) D8.12 M5 च सर्वेषां; D5(second time).6 T G1.3 M1–4.6–10 च(G1 सु) हृ-(D6 पु)ष्टानां (for प्रहृष्टानां). Ñ1 V1.3 D2–4.5(first time).9 T4 (both times) कालः प्रहृष्टमनसा(T4 [second time] तथा च तेषां रमता)मृक्षवानरक्षसां. ❀ Cv : एवं तेषां वसतामुपहारप्रदानसंमानेन वसतां शिशिर्तोः प्रथमो मासो गतः । वक्ष्यति हि 'द्वितीयः शैशिरः सुखमित्यनेन तेषामयोध्यायां संवत्सरः परिपूर्ण इति सूच्यते । अभिषेकदर्शनार्थं वसन्ते संप्राप्तानां शिशिरापगमेन संवत्सरः परिपूर्ण इति ।; Cg : एवं तेषामिति । वसन्तेऽभिषिक्तेन रामेण मासानन्तरमपि अविशेषसत्कारं प्राप्तानां तेषां द्वितीयः शैशिरो मासः फाल्गुनमासः सुखं गतः । अभिषेकानन्तरं संवत्सरं सुखमुषितास्त इत्यर्थः ।; Ck : एवं तेषामिति । वसन्तेऽभिषिक्तेन रामेण मासानन्तरं विशेषसत्कारं प्राप्तानां तेषां पश्चाच्छैशिरः शिशिरसंबन्धद्वितीयो मासः सप्तमः स मासश्च सुखं गतः । एवं च संवत्सरं रामसमीपे सुखोषिता इत्युक्तं भवति ।; for Ct, see st. 15. ❀ —After 17, Ś D5(Ś2 D5 after 17 [second occurrence])–8.10–12 S (G2 after 16$^{ab}$ owing to om.) ins.; Ñ2 B3.4 ins. l. 1 only after 17:

764* इक्ष्वाकुनगरे रम्ये परां प्रीतिमुपासताम् ।
रामस्य प्रीतिकरणैः कालस्तेषां सुखं ययौ ।

[Ś2 reads l. 1 for the first time after 17 (first time) repeating it here.—(l. 1) Ñ2 B3.4 काकुत्स्थ- (for इक्ष्वाकु-). Ś2 (first time) सार्धे (for रम्ये). Ś1.2(second time).3 उपेयुषां; D8 उपेयिवान्; D12 उपागतां; G2 उपास्यतां (for उपासताम्). Ś2 (first time) वानरैः कामरूपिभिः (for the post. half).—(l. 2) Ś D8.12 ययौ तदा (D12 महान्) (for सुखं ययौ). ❀ Cg.k.t : प्रीतिकरणैः संमानैः (Ct °माननैः). ❀]

—Thereafter, Ś D8.12 cont.; Ñ1 V1 D2–5.9 T4 (D5 T4 after 17 [first occurrence]) ins. after 17:

765* न विना वानरै रामो रेमे रामं विना न ते ।

[D5 वानरान् (for वानरै). T4 च (for न).]

Colophon. V1 D1–4 om.—*Sarga name*: Ś D8.12 रत्नाभरणदानं; Ñ1 V3 रत्नोपदानं; Ñ2 B1.3.4 राजप्रे(B1.3 संप्रे)षणं(Ñ2 प्रयाणं); D5 वानरसुखनिवासः.—*Sarga no.* (figures, words or both): Ś Ñ1 V3 B3 D12 om.; Ñ2 B1 43; B4 T3 44; D5 42; D6.7.10.11 T1.2 G1 M1–5.7–10 39; D8 40; T4 46; M6 37.—After colophon, T4 concludes with श्रीरामार्पणमस्तु; G M1.2.5.8.10 श्रीरामाय नमः.

# ३९

G. 7. 43. 1
B. 7. 40. 1
L. 7. 42. 1

तथा स्म तेषां वसतामृक्षवानररक्षसाम् ।
राघवस्तु महातेजाः सुग्रीवमिदमब्रवीत् ॥ १
गम्यतां सौम्य किष्किन्धां दुराधर्षां सुरासुरैः ।
पालयस्व सहामात्यै राज्यं निहतकण्टकम् ॥ २
अङ्गदं च महाबाहो प्रीत्या परमयान्वितः ।
पश्य त्वं हनुमन्तं च नलं च सुमहाबलम् ॥ ३
सुषेणं श्वशुरं शूरं तारं च बलिनां वरम् ।
कुमुदं चैव दुर्धर्षं नीलं च सुमहाबलम् ॥ ४
वीरं शतबलिं चैव मैन्दं द्विविदमेव च ।
गजं गवाक्षं गवयं शरभं च महाबलम् ॥ ५
ऋक्षराजं च दुर्धर्षं जाम्बवन्तं महाबलम् ।
पश्य प्रीतिसमायुक्तो गन्धमादनमेव च ॥ ६

## 39

☞ V2 missing Sarga 39 (cf. v.l. 7.12.2). B2 om. Sarga 39 (cf. v.l. 7. 35). V1 D1.3.4.9 cont. the previous Sarga. No Cv on Sarga 39.

1 T4 om. $1^{ab}$.—$^{a}$) T1.3 तदा; M5 ततः; M6 एवं; Cg.k as in text (for तथा). Ś D8.12 M1.3.6 तेषां नि-; Ñ1 V1 D2.9 T1 G3 M5 स तेषां; D5 तु तेषां; Cg.k as in text (for स्म तेषां). V3 D3.4 तथा तु (V3 च) वसतां तेषाम्; D1 कालः प्रहृष्टमनसाम्. ❀ Cg : तेषामिति भावलक्षणे षष्ठी। तेषु वसत्स्विति यावत् ।; so also Ck; Ct : वसतां तेषामिति निर्धारणे षष्ठी. ❀—For $1^{ab}$, Ñ2 B1.3.4 subst.; V3 ins. after $1^{ab}$ :

766* बालोदितार्कवपुषं पीनस्कन्धं महाभुजम् ।

[B4 -सदृशं (for -वपुषं).]

—$^{c}$) Ś V3 B1.3.4 D1.3.4.8.12 M6 सु-; D5 स (for तु).—$^{d}$) D6 marg.; M1 वाक्यम् (for इदम्). Ś D8.12 इदं वचनमब्रवीत्.—For $1^{cd}$, Ñ1 V1 D2.9 T4 subst.; while Ś D8.12 ins. after 1 :

767* कालो व्यतीतः सुमहांस्ततो राजाब्रवीत्कपिम् ।

2 $^{a}$) Ś1 अद्य; Ñ2 B1.3.4 वीर; M1 वत्स (for सौम्य). T4 G2 सौम्य (T4 गच्छ) सुग्रीव किष्किंधां. ❀ Cg.t : किष्किन्धां प्रतीति शेषः।; so also Ck. ❀—$^{b}$) Ñ1 V3 D1–4.9 T4 सुदुर्धर्षां. Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 T4 सुरैरपि (for सुरासुरैः).—$^{c}$) Ñ2 B4 पालय त्वं. Ś2.3 D8 G1.2 M3.4.7 महामात्यै; Ñ1 V3 D1.3–5 T4 महाबाहो; Ñ2 V1 B1.3.4 महासत्त्व; D2.9 च तत्सर्वं; T1.2 M6.8 सहामात्यो (for सहामात्यै).

3 $^{a}$) Ś D8.12 अंगदश्च; V3 अंगदं सु-. Ś2 Ñ2 B1.4 M8 महाबाहुं (Ś2 °हुः); Ñ1 D2.5.9 T4 °वीर्यं (for महाबाहो). D1.3.4 अंगदं सुमहावीर्यं.—$^{b}$) T3 च परया (for परमया). Ś D8.12 त्वया; V3 D6.7.10.11 G2 M5.6 युतः; D2 M9 [अ]न्वितं (for [अ]न्वितः).—$^{cd}$) V3 D5 संपश्य; D1.4 संप्रेक्ष्य; D2 संपश्यन्; D3 संपश्ये; M8 पश्यतां (for पश्य त्वं). D2 om. च (subm.). V3 D5 G2 च हनूमंतं. Ñ V1 B1.4 संपश्येस्त्वं (V1 °*) हनूमंतं; B3 सख्या समं हनूमंतं; D9 संपश्यस्व हनूमतं; T4 हनूमंतं च संपश्य; G1 पश्य स त्वं हनूमंतं (for $^{c}$). D6 नीलं (for नलं). Ñ1 नीलं; V3 M5 चैव; D7 च स- (for च सु-). Ñ1 महाबलः. Ś D8.12 सखा च हनुमांश्चैव मलय (Ś1 D8 transp. हनुमां and मलय) श्च महाबलः.

4 D9 om. (hapl.) 4.—$^{a}$) V3 श्वमुखं; D12 सुशुभं; T4 गवयं (for श्वशुरं). Ñ V1.3 B1.3.4 D1–4 T4 चैव; D5–7.10.11 T1–3 G2.3 M1.3.6.8 वीरं; D12 सूतं (for शूरं).—$^{b}$) Ś D8.12 M6 सुमहाद्युतिं; Ñ V1.3 B1.3.4 [अ]तु (B1 °न)लविक्रमं (V3 °ग्रहं); D1–5 T4 [उ]त्तमविक्रमं (for बलिनां वरम्).—M4 om. $4^{cd}$.—$^{c}$) D2 सु- (for [ए]व).—$^{d}$) D6.7.10.11 T1.2 M1.3.8 नीलं चैव; G2 जांबवंतं (for नीलं च सु-). G1 -महाबलः. Ś D8.12 M6 प्लवंगं चैव (D12 च सु) पाटलिं (M6 °लं); Ñ V1 B1.4 D1–5 T4 सुबाहुं चापराजितं; G3 M3 नीलं च बलिनां वरं.

5 $^{a}$) M9 om. वीरं. Ś Ñ1 D6 शतबलं; D5 सेतुबलिं; D8 शांतबलं.—$^{b}$) D12 मैंद्रं. M6–8 विविदम् (for द्विविदम्). D2.9 transp. मैन्दं and द्विविदम्.—After $5^{ab}$, T1.3 G3 M2–10 read $6^{cd}$.—T2 G2 M1 om. $5^{c}$–$6^{b}$. Ś D8.12 transp. $5^{cd}$ and $6^{cd}$. Ñ1 V1.3 D1–5.9 T4 read $5^{cd}$ (including 768*) after 6.—$^{cd}$) Ñ2 B1.4 गवयं च गवाक्षं च (for $^{c}$). Ś Ñ1 V3 D1.3.4.8.12 शरभं गवयं (by transp.); V1 पनसं गवयं (for गवयं शरभं). Ñ2 B1.3.4 T3 M5 गंधमादनं; T4 सुंदरं हरं (for च महाबलम्).

6 T2 G2 M1 om. $6^{ab}$ (cf. v.l. 5). Ś D8.12 om. (hapl.) $6^{ab}$. K (ed.) transp. $^{ab}$ and $^{cd}$.—$^{a}$) Ñ1 V1.3 B1.3.4 D1–5.9 T4 जांबवंतं; D6.7 T1.3 G1.3 M2–4.6–8.10 ऋक्षवंतं (for ऋक्षराजं). Ñ1 V1.3 D1.3–5 तथा नीलं; D2.9 महावीरं; T4 तथा वीरं (for च दुर्धर्षं). K (ed.) ऋषभं च सुविक्रांतं.—Ñ1 V1.3 D1–5.9 T4 om. $6^{bc}$.—$^{b}$) Ñ2 B1.3.4 M6 सुबाहुं चापराजितं = $4^{d}$ (var.); M5 बलवंतं महाद्युतिं.—Ñ2 B1.3.4 G1 om. $6^{cd}$. Ś D8.12 transp. $5^{cd}$ and $6^{cd}$. T1.3 G3 M2–10 read $6^{cd}$ after $5^{ab}$.—$^{c}$) G2 पश्यन्. Ś D8.12 यशःप्रीतिसमायुक्तं.—T2 G2 M1 om. (hapl.) from $6^{d}$ up to $7^{c}$.—After 6, Ś D7.8.10–12 ins.; Ñ1 V1.3 D1–5.9 T4 ins. after $5^{cd}$ :

768* ऋषभं च सुविक्रान्तं प्लवंगं च सुपाटलम् ।

ये चान्ये सुमहात्मानो मदर्थे त्यक्तजीविताः ।
पश्य त्वं प्रीतिसंयुक्तो मा चैषां विप्रियं कृथाः ॥ ७
एवमुक्त्वा च सुग्रीवं प्रशस्य च पुनः पुनः ।
विभीषणमथोवाच रामो मधुरया गिरा ॥ ८
लङ्कां प्रशाधि धर्मेण संमतो ह्यसि पार्थिव ।
पुरस्य राक्षसानां च भ्रातुर्वैश्रवणस्य च ॥ ९
मा च बुद्धिमधर्मे त्वं कुर्या राजन्कथंचन ।
बुद्धिमन्तो हि राजानो ध्रुवमश्नन्ति मेदिनीम् ॥ १०
अहं च नित्यशो राजन्सुग्रीवसहितस्त्वया ।
स्मर्तव्यः परया प्रीत्या गच्छ त्वं विगतज्वरः ॥ ११
रामस्य भाषितं श्रुत्वा ऋक्षवानरराक्षसाः ।
साधु साध्विति काकुत्स्थं प्रशशंसुः पुनः पुनः ॥ १२
तव बुद्धिर्महाबाहो वीर्यमद्भुतमेव च ।
माधुर्यं परमं राम स्वयंभोरिव नित्यदा ॥ १३ G. 7. 43. 13 B. 7. 40. 14 L. 7. 42. 13

[ Ś2 ऋषिभं. V3 D1.3.4 चैव; D5 दैव- ( for च सु- ). D2.3 प्लवगं. Ś D8.12 चा( D8 वा )तिक्रांतं च सुगंधं ( for च सुविक्रान्तं प्लवंगं ). Ñ1 V3 D9 सु( D9 स )पाट( Ñ1 °त )लिं. Cf. $4^d$ v.l. ]

—Then D7.10.11 T4 cont. :

769* केसरिं शरभं शुम्भं शङ्खचूडं महाबलम् ।

[ T4 महाकपिं ( for °बलम् ).]

—After 6, Ñ1 V1.3 D1–5.9 T4 read $5^{cd}$ ( including 768* ).

7 T2 G2 M1 om. $7^{abc}$ ( cf. v.l. 6 ). —$^a$ ) Ñ1 D1.2.4.9 T4 ये चान्येपि; V3 एते चान्ये; D7.10.11 T1 G1.3 ये चेमे सु-; T3 M5.6.8.9 ये च( M8 ते ) मे सु-; B ( ed. ) ये ये मे सु- ( for ये चान्ये सु- ). —$^b$ ) D2.4.9 M6 मदर्थं. V3 -जीविनः ( for -जीविताः ). —$^c$ ) Ś V1 संपश्येः; Ñ B1.3.4 पश्यैतान्; V3 D9 संपश्यन् ; D1.3.4.12 तान्पश्येः; D2.8 संपश्येत् ; T4 संपश्य; G ( ed. ) पश्य तान्. B1.4 प्रीतिसंयुक्तं; B3 °संयुक्तान् ; D5 °संपन्नो ( for °संयुक्तो ). M8 पश्य प्रीतिसमायुक्तो = $6^c$. —$^d$ ) D9 om. मा ( subm. ). D2 तेषां ( for चैषां ).

8 $^a$ ) D5 एवं रामः. Ñ1 B3.4 स; Ñ2 V1.3 D1.3.4 T3.4 M4.6–8.10 तु; D5 om. ( subm. ) ( for च ). —$^b$ ) Ś D8.12 प्रसाद्य; Ñ1 B1.4 D1 M8 प्रशंस्य; Ñ2 V1 B3 प्रपश्य; D6.7.10.11 आश्लिष्य ( for प्रशस्य ). M8 तु ( for च ). V3 प्रशसंस्य ( sic ). —After $8^{ab}$, T3.4 ins. :

770* प्रत्येकं तत्समालिङ्ग्य सर्वांश्च हरिपुंगवान् ।

[ T4 प्रत्येकतः ( for प्रत्येकं तत् ). ]

—$^c$ ) D6.10.11 T4 उवाचाथ ( by transp. ); D7 उवाचेदं ( for अथोवाच ). —$^d$ ) Ś V3 D8.12 राघवो रघुनंदनः; Ñ B1.3.4 M8 राघवो मधुरां गिरं; V1 D1–5.9 M6 राघवो मधुरं वचः( M6 गिरा ). —After 8, T4 ins. :

771* धर्मात्मा सुमहात्मा च सत्यात्मा च दृढव्रतः ।

9 $^b$ ) Ś D8.12 समेत्यान्यैश्च; D2.9 संगतो ह्यसि; G2 M4.8.10 धर्मतो ह्यसि; M3 समर्थो ह्यसि. Ñ1 पार्थिवैः; V1 राघव ( sic ); D1.2.4 G2 M8.10 पार्थिवः ( for पार्थिव ). D6.7.10.11 T4 धर्मज्ञस्त्वं मतो मम. —$^c$ ) Ś Ñ V1.3 B1.3 D1.3–5.8.12 T4 सुराणां; B4 शूराणां; D2.9 देवानां ( for पुरस्य ). V3 B1 D2.9 T4 रक्षसां चैव. ❀ Cg : पुरस्य पुरवर्तिप्राणिनां राक्षसादीनां ; स्वभ्रातुर्वैश्रवणस्य च संमतो ह्यसि परमाप्तोऽसि । 'भ्रातुर्वैश्रवणस्य चेति पाठे' संमतोऽसीति शेषः ।; Ck : पुरस्य पुरवर्तिप्राणिनां ब्राह्मणादीनां राक्षसानां स्वामात्यादीनां भ्रातुर्वैश्रवणस्य च संमतो ह्यसि परमाप्तोऽसि ।; Ct : पुरस्य पुरवर्तिप्राणिनां राक्षसानाम् । वैश्रवणस्य । संमतोऽसीति शेषः. ❀

10 $^a$ ) Ś D8.12 बुद्धिं त्वम् ( for च बुद्धिम् ). —$^b$ ) D7 G2 M2 कुर्याद्. T4 राजन्कुर्याः ( by transp. ). T4 M6 कदाचन ( for कथं° ). Ś Ñ1 V1.3 D1–5.8.9.12 राजन्कार्षीः कदा( V1.3 °थं )चन; Ñ2 B3.4 कृथा राजन्कदाचन. —$^c$ ) Ś Ñ1 V1.3 D1–5.8.9.12 T4 धर्मयुक्ता; Ñ2 B3 धर्मवं( B3 °मं )तो ( for बुद्धिमन्तो ). D1 हि वै ( hypm. ). M5 धर्मज्ञाः खलु राजानो. —$^d$ ) D6.7 T4 चिरम् ( for ध्रुवम् ). G2 अश्नंत. Ś Ñ1 V1.3 D1–5.8.9.12 भुंजते मेदिनीं( V3 पृथिवीं ) चिरं. ❀ Cg.k : ध्रुवं शाश्वतम् ।; Ct : ध्रुवं चिरकालम्. ❀

11 $^a$ ) T1.2 M3 अहं तु. B3 M6 हि( B3 [ अ ]पि ) त्वया नित्यं; D8 विभीषणे राम ( sic ) ( for नित्यशो राजन् ). ❀ Ct : अहं चेति । अनेन रावणवत्क्रूरबुद्धिः कदापि न कार्या । तथा सति सुग्रीवादयो रावणमिव त्वामपि नाशयिष्यन्तीति व्यङ्ग्यम्. ❀ —$^b$ ) Ś V1 D1.3–5.8.12 -सहितेन च; Ñ1 D2.9 °तेन तु; V3 °तेन वै ( for -सहितस्त्वया ). B3 M6 सुग्रीवेण च धीमता. —$^c$ ) Ś1 D2 परमप्रीत्या; M1 स्नेहयुक्तेन ( for परया प्रीत्या ). —$^d$ ) G1 M1.5.8 गच्छस्व. Ś V3 D1.3.4.8.12 मित्रै( Ś सिद्धै )-रेतैः सहै( Ś2 D1.3.4 °दै )व तु( D1.3 हि; D4 ह ); Ñ1 V1 D2 T4 सहितोमात्य( Ñ1 °तो मंत्रि )सत्तमैः; Ñ2 B1.3.4 स्नेहस्यैषा परा गतिः; D5 सर्वैरेभिः सहैव च; D9 सहितो मर्त्यराक्षसैः; T1 G2 गच्छ( G2 व्रज )ध्वं विगतज्वराः.

12 $^a$ ) Ñ2 T1.2.4 G3 M1.3.4.7.10 वचनं ( for भाषितं ). Ś Ñ1 V1.3 D1–5.8.9.12 राघवस्य वचः श्रुत्वा. —$^b$ ) Ś V3 D8.12 वानरा ऋक्ष-; Ñ1 V1 D1–4.9 वानरक्षाः( sic )स-; D5 वानराः सह- ( for ऋक्षवानर- ). —After $12^{ab}$, B3 ins. :

772* सर्वे ते प्रीतिमनसो रामचिन्तानुवर्तिनः ।

—$^d$ ) T4 प्रशंसंते ( for प्रशशंसुः ). Ś V1.3 D1–5.8.9.12 प्रशंसंति स्म( D12 om. [ subm. ] ) नै( Ś D8 ह्यने )कधा.

13 $^a$ ) D8 तं च बुद्धिं ( sic ); M5 तव नित्यं ( for तव

G. 7. 43. 13
B. 7. 40. 15
L. 7. 42. 14

तेषामेवं ब्रुवाणानां वानराणां च रक्षसाम् ।
हनूमान्प्रणतो भूत्वा राघवं वाक्यमब्रवीत् ॥ १४
स्नेहो मे परमो राजंस्त्वयि नित्यं प्रतिष्ठितः ।
भक्तिश्च नियता वीर भावो नान्यत्र गच्छति ॥ १५
यावद्रामकथां वीर श्रोष्येऽहं पृथिवीतले ।
तावच्छरीरे वत्स्यन्तु मम प्राणा न संशयः ॥ १६
एवं ब्रुवाणं राजेन्द्रो हनूमन्तमथासनात् ।
उत्थाय च परिष्वज्य वाक्यमेतदुवाच ह ॥ १७

---

बुद्धिर्). B3 महाराज. —b) M2.4.5.7.9 वा (for च). Ñ1 वीर्यमद्भुतकर्म च; D10 सुबलं वीर्यमेव च. ❀ Cg.k: अद्भुतं वीर्यं जगदद्भुतकरं( Ck °दाश्चर्यभूतं )शौर्यम्।; so also Ct. ❀ —Ś D8.12 om. 13c–14. —c) V1 D2.9 अतुलं; D5 च परं (for परमं). Ñ1 V1.3 D1–5.9 चापि; Ñ2 चैव; B3 वाक्यं (for राम). B1 माधुर्यवचनं चैव. —d) M5 नित्यशः; Ck.t नित्यदा ( as in text ). Ñ1 V1.3 D1–5.9 शुचि चा( D5 सचिवा [ sic ] )सुत्तमं यशः; Ñ2 B1.3.4 स्वयंभुव इव ध्रुवं. ❀ Ck: स्वयंभोरिवेति । नित्यनिरुपमानन्तकल्याणगुणगणैकतानता भगवतो ब्रह्मणः सिद्धा सर्वश्रुतिस्मृत्यविवादतः, तद्वत्तवापि । नित्यदा नित्यम् ।; Ct: स्वयंभोरिवानन्तकल्याणगुणस्य भगवतो ब्रह्मण इव. ❀

14 Ś D8.12 om. 14 ( cf. v.l. 13 ). —a) V1.3 तेषामित्थं. Ñ1 V1.3 D1–5.9 कथयतां (for ब्रुवाणानां). Ñ2 B1.4 तेषां तु ब्रुवतामेवम्. —b) Ñ1 V1 D2.3.5.9 L (ed.) हर्यं ( L [ ed. ] °र्यृ )क्षाणां स-( D2.5 च ); Ñ2 V3 B1.4 ऋक्षवानर- (for वानराणां च). B3 महौजसां; D1.4 G1.2 M2.4–10 स ( M6 सु )रक्षसां. —c) M7 प्रयतो (for प्रणतो). Ñ1 V1 D2.9 प्रणम्य मूर्ध्ना( Ñ1 भूत्वा [ sic ] ) हनूमान्; V3 D1.3–5 मूर्ध्ना प्रणम्य हनुमान्; B3 उत्थाय हनूमान्रामं. —d) B3 प्रांजलिर् (for राघवं). Ñ2 B1.4 रामं वाक्यमथाब्रवीत्; V3 वाक्यं राघवमब्रवीत्.

15 a) Ñ1 V3 D1–4.9 T1.2 G3 M3 राम (for राजंस्). V1 परमोदारे. —b) V1 च सर्वदा (for प्रतिष्ठितः). Ś Ñ V3 B1.3.4 D1–5.8–12 M6 त्वयि तिष्ठति( D10.11 °तु ) नित्यशः( Ñ2 V3 D2.9 सर्वदा; D1.10.11 M6 नित्यदा ); M7 त्वयि सत्यं प्रतिष्ठितं. —V3 repeats 15cd after the first occurrence of l. 2 of 773*. —c) V3 ( first time ) भक्तश्च. V1 D2.5.9 परमा; V3 ( first time ) नियतः (for नियता). Ñ1 V1.3 ( both times ) D1–4.9 साधो; Ñ2 B1.4 नित्यं; D5 मेधा (for वीर). —d) Ñ2 V3 ( second time ) B1 भावम्. Ñ1 V1.3( second time ) D1.3–5 चान्यं न; Ñ2 B1 अन्यं न; B4 मेन्यं न; D2.9 चैव न; T4 नान्यं हि ( for नान्यत्र ). Ñ2 D6.7.10.11 गच्छतु. Ś D8.12 भवत्येषानुवर्तते; V3 ( first time ) सौभाग्यं चाधिगच्छति. ❀ Cg: स्नेहः सुहृदि प्रीतिः, भक्तिः उत्कृष्टे प्रीतिः ।; Ck: स्नेहः प्रिये प्रियाया इव सदा स्मृतिहेतुः । भक्तिः परलोकपरगतित्वेनोपास्यत्वबुद्धिः ।; Ct: नित्यदा सर्वकाले । स्नेहो नाम प्रियायां प्रियस्येव सदा स्मृतिहेतुः । भक्तिर्नाम परलोकगतित्वेनोपास्यत्वबुद्धिः । नित्यदेत्यनेन जलं विना मत्स्यस्येव क्षणमपि तं विना जीवितुमशक्यत्वं सूचितम् । अन्यत्र भावो मा गच्छतु विषयान्तरे इत्यर्थः. ❀

16 a) Ñ2 B1.3.4 D5–7.9–11 T3 रामकथा. Ś1 लोके (for वीर). —b) Ś1 शृणोसि; Ś2.3 Ñ1 V1.3 D1–5.8.9.12 M6 श्रोष्यामि; T3 श्रोष्यते ( for श्रोष्येऽहं ). Ñ2 B1.3.4 D6.7.10.11 चरिष्यति महीतले. —c) B3 तावत्स्थास्यंति. Ś D8.12 सततं; Ñ B1 D6.7 स्थास्यंति; V1 D1–5.9 T1.2 G2.3 M1–3.5.8.9 Cg.k.t वत्स्यंति; B3 मे प्राणाः; B4 तिष्ठंति ( for वत्स्यन्तु ). —d) Ñ2 V1.3 D1–7.9–11 T4 G2 transp. मम and प्राणा. B3 शरीरे नात्र संशयः. ❀ Cg: यावदिति । तावच्छरीरे वत्स्यन्ति त्वत्कथामृतरसास्वादबलादिति भावः ।; Ck: तावद्वत्स्यन्तीति । त्वत्कथाश्रवणपरमामृतास्वादबलादिति शेषः ।; Ct: तावद्वत्स्यन्ति । त्वत्कथाश्रवणपरमामृतास्वादनबलादिति भावः । न तु तदुत्तरमित्याशयः । 'वत्स्यन्तु' इति पाठे वसन्त्वित्यर्थः । आर्षः स्पः । एतेन मुक्तिमप्यनादृत्य त्वत्कथामृतपानमेवाकाङ्क्षितमिति दर्शितम्. ❀ —After 16, Ś Ñ V1.3 (repeats only l. 2 after 17) B4 D T3.4 ins.:

773* यच्चैतच्चरितं दिव्यं कथा च रघुनन्दन ।
तन्मामप्सरसो राम श्रावयेयुर्नरर्षभ ।
तच्छ्रुत्वाहं ततो वीर तव चर्यामृतं प्रभो ।
उत्कण्ठां विहरिष्यामि मेघलेखामिवानिलः ।

[ (l. 1) Ñ1 ये (for यच्). D2 [ ए ]तं (sic). V1 वीर; B4 D12 नित्यं (for दिव्यं). Ś कदा; Ñ1 V3 B4 D1–4 T3.4 कथास्; D7 कथां. V1 कथासु; D10.11 कथा ते; K ( ed. ) कथां ते (for कथा च). —(l. 2) V3 ( first time ) lacuna for the prior half. Ś D8.12 तन्नाम; Ñ2 तन्मया; V3 तथा च; D2.7.9–11 तन्मम. D9 स्मरतो (for अप्सरसो). T4 त्वन्नामस्मरणं. Ñ1 B4 नित्यं; V3 D6 नाम ( for राम ). Ś D8.12 श्रावयंति; T3 द्रावयेयुर्; T4 महनीयं (for श्रावयेयुर्). Ñ न संशयः; V3 ( first time ) नरर्षभं; V3 ( second time ) अतंद्रिताः ( for नरर्षभ ). —After the first occurrence of l. 2, V3 repeats 15cd. —(l. 3) V1 राम (for वीर). Ś D8.12 वाक्यामृतं; B4 चर्यामिमां; D2.9 वीर्यामृतं. Ś B4 D3.8.12 T3.4 विभो (for प्रभो). —(l. 4) V3 मुक्तं वो; D5 T3 उत्कंठो; Ct उत्कंठां ( as above ). Ñ1 V1 तु ह( V1 क )रिष्यामि; V3 विच°; B4 तां हनिष्यामि; D6.7.10.11 तां हरि° (for विहरिष्यामि). —After the prior half of l. 4, T4 ins.:

773 (A)* मेघाध्वाने शशी यथा ।
सर्वशत्रून्हनिष्यामि.

T3 मेघरेखाम्. D2.3.5.9 [ अ ]चलः (for [ अ ]निलः). ]

17 T1 om. (hapl.) 17–19. —a) G2 इति (for एवं). Ñ1 V1.3 D2.3.5.9 T4 ब्रुवंतं; M4 ब्रुवाणो(sic). Ñ

एवमेतत्कपिश्रेष्ठ भविता नात्र संशयः ।
लोका हि यावत्स्थास्यन्ति तावत्स्थास्यति मे कथा ॥ १८
चरिष्यति कथा यावल्लोकानेषा हि मामिका ।
तावच्छरीरे वत्स्यन्ति प्राणास्तव न संशयः ॥ १९

ततोऽस्य हारं चन्द्राभं मुच्य कण्ठात्स राघवः ।
वैदूर्यतरलं स्नेहादाबबन्धे हनूमति ॥ २०
तेनोरसि निबद्धेन हारेण स महाकपिः ।
रराज हेमशैलेन्द्रश्चन्द्रेणाक्रान्तमस्तकः ॥ २१

G. 7. 43. 22
B. 7. 40. 20
L. 7. 42 24

V1.3 B4 D2.3.5–7.9–11 M4 रामस्तु; B1 T4 रामस्तं; G1 रामश्च (for राजेन्द्रो). —*b*) Ñ V1.3 B1.4 D2.3.5–7.9–11 वर-; G2 M3 तथा (for अथ). —For 17*ab*, Ś B3 D1.4.8.12 M6 subst.:

774* हनूमति ब्रुवत्येवं राघवः परवीरहा ।

[B3 M6 परमासनात्.]

—D12 om. 17*c*–18. —*c*) B3 तं; G2 तु (for च). Ś D8 सस्वजे तं च; Ñ V1.3 B1.4 D1–7.9–11 T4 सस्वजे (V3 lacuna) स्नेहाद्; M6 [अ]भ्यस्वजत्तत्र (for च परिष्वज्य). —*d*) Ś D2.8.9 T4 M6 चेदम्; D1.4 चैतद् (for एतद्). —After 17, V3 repeats l. 2 only of 773*.

18 D12 T1 om. 18 (cf. v.l. 17). —*a*) B1 एतदेवं (by transp.); B3 M6 एवमेव (for एवमेतत्). —*b*) T3 भविष्यति न संशयः. —Ñ2 B3 (after 19) D6.7.10.11 read 18*cd* after 777*. —*c*) V3 D3 च (for हि). —*d*) Ś D8 वत्स्यति. Ñ2 V1.3 B1.3 D6.10.11 T2 M4.5.7.9.10 तावत्स्थास्यंति मे कथाः. ❀ Ck: लोके हीत्यादि। अयं वादः स्वकब्रह्मवैभवानुभवसंधानपूर्वकम्। एवं च हनूमते रामेणार्थितत्वं दत्तमिदं चातिदुष्करम्।; Ct: एवं च हनूमते भगवताकारनित्यत्वं कल्पस्थायित्वरूपं दत्तमित्याभाति. ❀ —After 18, Ñ2 D6.7.10.11 K (ed.) ins.:

775* एकैकस्योपकारस्य प्राणान्दास्यामि ते कपे ।
शेषस्येहोपकाराणां भवाम ऋणिनो वयम् ।

[(l. 1) D6 एकस्यैव. —K (ed.) reads l. 2 within brackets. —(l. 2) D6.7 [ए]व (for [इ]ह). ❀ Ct: उपकाराणां मध्ये शेषस्येत्यर्थः. ❀]

—Then all the above Mss. cont.; Ś2.3 D8.12 T4 ins. after 19; while Ñ1 V1 B4 D1–5.9 T3 cont. after 777*; B3 ins. after 18:

776* अङ्गेष्वेव जरा यातु यत्त्वयोपकृतं कपे ।
नरः प्रत्युपकाराणामापत्सु लभते फलम् ।

[K (ed.) reads l. 1 within brackets. D8.12 om. up to त्व in l. 1. —(l. 1) Ś3 D9 [ए]वं; Ñ2 ते; T4 [अ]पि (for [ए]व). B3.4 अंगेभ्यस्तु. D4 T3 जरां. Ś3 न स्यान्; Ñ1 D2 T3 यांतु; Ñ2 T4 मास्तु (for यातु). D6.7.10.11 मदंगे जीर्णतां यातु (for the prior half). Ś3 न चैव (for यत्त्वया). Ś3 [अ]पकृतं (sic); B4 [उ]पस्कृतं; D8.12 [आ]पत्कृतं; G (ed.) [उ]पहृतं (for [उ]पकृतं). D5 मम (for कपे). —(l. 2) G (ed.) तस्य (for नरः). B4 अवश्यं (for आपत्सु). Ñ2 च लभेत् (for लभते). D6(m. also as above)

.7.10.11 Ct आपत्स्वायाति पात्रतां (for the post. half). ❀ Ct: प्रत्युपकाराणां पात्रतां नर आपत्स्वायातीत्यनेन प्रत्युपकारार्थिन उपकृतावापत्प्रार्थना भवति। सा मे कदापि मा भूदिति व्यङ्ग्यम्. ❀

19 T1 om. 19 (cf. v.l. 17). B1 om. 19–21. —*a*) Ñ1 V1.3 B4 D1–5.9 T3 भविष्यति; M8 करिष्यति. G (ed.) यावदेषा (for कथा यावल्). —*b*) D1.4 T3 एषा लोके; G2 लोके चेषां; M2.4.7.10 लोकेष्वेषा; M6 लोके चैव (for लोकानेषा). M9 मामका. Ś D8.12 लोकानेतान्हि मामकी (D8 °कान्); Ñ1 V1 B4 D2.9 एषा (D2.9 °व) लोके हि मामकी (V1 शाश्वती); Ñ2 B3 D6.7.10.11 एषा लोके च मामिका; V3 एव लोकेषु मामिका; D5 एषा लोकेषु कामिका; G (ed.) लोके च मामका कथा. —*d*) T4 M8 तत्र प्राणा (by transp.). —For 19*cd*, Ñ V1.3 B4 D1–7.9–11 T3 subst.:

777* तावत्ते भविता कीर्तिः शरीरेऽप्यसवस्तथा ।

[V1 D1–5.9 T3 हि (for ऽपि). Ñ2 T3 तव; D2 तदा.]

—Then Ñ1 V1 B4 D1–5.9 T3 cont. 776*; while Ñ2 D6.7.10.11 read 18*cd*. —After 19, Ś2.3 D8.12 T4 ins. 776*; while B3 reads 18*cd*.

20 B1 om. 20 (cf. v.l. 19). M6 om. 20–21. —*a*) Ś1.2 D5 स्वहारं; Ś3 स्व हारं; D8.12 स हारं; T1.2 G3 M3 हारं च; L (ed.) हारं तु (for ऽस्य हारं). —*b*) Ś1.3 Ñ1 V1.3 B3.4 D1–9.12 T3 मुक्त्वा; Ck.t as in text (for मुच्य). ❀ Ck: मुच्य कंठादिति। स्वीयाद्विसृज्येत्यर्थः।; so also Ct. ❀ —*c*) B4 -प्रभवं; D5 -तरले; G2 -तनयं (sic) (for -तरलं). Ś Ñ V1.3 B3.4 D T4 कंठे (for स्नेहाद्). ❀ Cg.k: तरलो हारमध्यगः (Cg °गो मणिः); so also Ct. ❀ —*d*) T1–3 G1.3 M1.3.8 आबबंध. T3 G1 M2.3 हनूमतः (for °मति). Ś Ñ V1.3 B3.4 D T4 G2 M10 बबंध च (G2 M10 °धांसे) हनूमतः (Ñ1 °ते).

21 B1 D9 M6 om. 21 (for B1 M6, cf. v.l. 19 and 20 respy.). —*a*) D3 M1 ततोरसि. —*b*) Ś D8.12 रराज (for हारेण). Ñ V1.3 B3.4 D2.5–7.10.11 महता (for स महा-). —*c*) T4 G3 M1.4.9 हैम-; Cg.k.t as in text (for हेम-). T3 G2 M10 -[अ]द्रिरिव; M1.2.4.5.7–9 -शैलेव; Cg.k.t as in text (for -शैलेन्द्रश्). Ś Ñ V1.3 B3.4 D1–8.12 रराज (Ś D8.12 हारेण) कांचनः शैलश्. ❀ Cg: हेमशैलेन्द्रो मेरुः। चन्द्रेण चन्द्रकिरणैः। आक्रान्तमस्तक आक्रान्तकर्णप्रदेश इत्यर्थः।; Ck: हेमशैलेन्द्रो मेरुः। चन्द्रेण चन्द्रकिरणेन। आक्रान्तमस्तकः। व्याप्तशिखराद्यामूलप्रदेश इत्यर्थः।; Ct: हेमशलेन्द्रो मेरुश्चन्द्रेणाक्रान्तमस्तकस्तादृशः पर्वतो यथा

G. 7.43.22 B. 7.40.27 L. 7.42.25 श्रुत्वा तु राघवस्यैतदुत्थायोत्थाय वानराः ।
प्रणम्य शिरसा पादौ प्रजग्मुस्ते महाबलाः ॥ २२
सुग्रीवश्चैव रामेण परिष्वक्तो महाभुजः ।
विभीषणश्च धर्मात्मा निरन्तरमुरोगतः ॥ २३
सर्वे च ते बाष्पगलाः साश्रुनेत्रा विचेतसः ।
संमूढा इव दुःखेन त्यजन्ते राघवं तदा ॥ २४

## इति श्रीरामायणे उत्तरकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

आमूलशिखरं तत्किरणैर्व्याप्तो भवति तथा हनूमांस्त्वद्गतकिरणव्याप्तो जात इत्यर्थः. ❀

22 B3 om. 22. Ñ1 V3 D2.3.5.9 transp. 22 and 23. D1.4 (after 24) repeat 22 after 23.—a) D1 (both times) श्रुत्वा च; T3 तच्छ्रुत्वा; G3 धृत्वा तु; M1 दृष्ट्वा तु (for श्रुत्वा तु). Ñ1 रामस्य वचः; B1 राघवस्यैवम्; D1 (both times).4 (first time) °वचस् (for राघवस्यैतद्). V1 D2.3.4(second time).5.9 श्रुत्वा रामस्य वचनम्( D3–5 तु वचः); V3 (with hiatus) रामस्य च वचः श्रुत्वा. ❀ Ct: श्रुत्वेति । हनूमदुद्देश्यकमैकैकस्येत्यादि वाक्यम्. ❀ —b) D1 (both times).4 (first time) त्वरया; D7 तत (for first उत्थाय). Ñ1 साश्रुनेत्रा विचेतसः. —c) M4.7.10 भूमौ (for पादौ). —d) Ś Ñ2 B1.4 D1(both times).4(first time).6–8.10–12 M6 निर्जग्मुस्ते; V1.3 D2.3.4(second time).5.9 प्रययुस्ते; T3 जग्मुस्ते च; G1 जग्मुस्ते तु (for प्रजग्मुस्ते).

23 Ñ1 V3 D2.3.5.9 transp. 22 and 23.—a) Ñ1 V3 D1–5.9 T3 चापि; Ñ2 B1 D6.7.10.11 स च (for चैव). —b) T3 G1 M1.2.4.7.9.10 महाबलः; M5 °मतिः (for महाभुजः). D10.11 निरंतरमुरोगतः = 23d. —c) V1 तु (for च). T4 रामेण (for धर्मात्मा). —d) Ś D3.12 अनंतरं; T1 G3 M1–4.8.9 उरोगतं; Cg.k.t as in text (for उरोगतः). Ñ1 V1 D2.3.5.9 सर्वे च( V1 D5 ते ) हरियूथपाः; Ñ2 B1 D6.7.10.11 सर्वे ते( B1 ते सर्वे ) बाष्पविक्लवाः; D1.4 (with hiatus) अश्रुने( D4 om. after ने up to 24b)त्रो बभूव ह. ❀ Cg.k: निरन्तरमुरोगत इति । गाढ( Ck °ढं )परिष्वक्त इत्यर्थः ।; so also Ct. ❀ —After 23, D1 repeats 22.

24 Ñ1 D4 om. 24ab (for D4 cf. v.l. 23). V1 D1–3.5.9 om. 24.—a) D12 सर्वे एते. B3 बाष्पजलैर्; D3.7.10.11 T1.2 M1.5.6 Ct बाष्पकलाः (for °गलाः). Ñ2 कामरूपाश्च दुःखार्ताः; V3 B4 सर्वे ते बाष्पकलिलाः( B4 °ला: ); B1 परिष्वज्य च रामाय. ❀ Ct: बाष्पकलाः कण्ठस्य बाष्परुद्धत्वेनाव्यक्तभाषिणः. ❀ —b) M4.7.10 सास्रनेत्रा; Ct साश्रुनेत्रा (as in text). Ś D8.12 अश्रुनेत्रैः प्रसुस्रुवुः; B3 आवृतास्तैरचेतसः. ❀ Cg: विचेतसो वियोगखिन्नचेतसः ।; Ck: विचेतसो वियोगखिन्ना इति यावत् ।; Ct: विचेतसः शून्यमनसः, अतः संमूढा इव मूर्छिता इव बभूवुरिति शेषः. ❀ —B4 om. 24cd.—d) D6.7.10.11 T G M1.3.5.6.9.10 त्यजंतो. T1 M8 भ्रातरं (for राघवं). T3 तथा. Ś D8.12 रामं ते तत्यजुस्तदा; Ñ1 प्रययुस्ते महाबलाः; Ñ2 V3 B1.3 निर्ययुस्ते च( Ñ2 °युस्तच्च; V3 °युः स च ) राघव; D4 रामं ते सत्यतेजसः. —After 24, D4 repeats 22; while D6.7.10.11 T G M1.3–5.7.8.10 ins.:

778* कृतप्रसादास्तेनैव राघवेण महात्मना ।
जग्मुः स्वं स्वं गृहं सर्वे देही देहमिव त्यजन् ।

[ T3 damaged for l. 1.—(l. 1) D6.10.11 M4.7.8 [ए]वं (for [ए]व).—(l. 2) D6.7 T4 स्वं स्वं (for देही). M1 इह; Cg.k.t as above (for इव). D6.7 T3.4 G M5.8 [अ]त्यजन्; Cg.k.t as above (for त्यजन्). ❀ Cg: देहं त्यजन्देहीव रामवियोगखिन्ना इत्यर्थः । युद्धकाण्डान्ते वानरादीनां विसर्जनोक्तिः काण्डसमापनायत्रैव विसर्जनं तत्रोक्तमिति मन्तव्यम् ।; Ck: देहं त्यजन्देहीवेति रामपरित्यागखिन्ना इति शेषः ।; Ct: देहं त्यजन्देहीव रामवियोगखिन्नाः अभूवन्निति शेषः । शरीरात्माभिमानिनां देहत्यागेनेव तेषां रामविश्लेषणखेदोऽभूदित्यर्थः. ❀ ]

—Then D7.10.11 cont.; while Ñ V3 B1.3.4 ins. after 24:

779* ततस्तु ते राक्षसऋक्षवानराः
प्रगम्य रामं रघुवंशवर्धनम् ।
वियोगजाश्रुप्रतिपूर्णलोचनाः
प्रतिप्रयातास्तु यथा निवासिनः ।

[ (l. 3) Ñ1 V3 B3 -परि- (for -प्रति-).—(l. 4) V3 तथा (for यथा). ]

Colophon.—*Kāṇḍa name*: Ś1 D2.9 M7 om. —*Sarga name*: Ś D5.8.12 वानरप्रयाणं( D5 °णो ); Ñ1 D9 वानरराक्षसप्रयाणो( D9 °णं ); Ñ2 V3 वानरऋक्षराक्षसविसर्जनं; V1 हरिराक्षसविसर्जनं; B1 ऋक्षवानरप्रेषणं; B3 राक्षसवानरसंप्रेषणं; D1.2 वानरऋक्षराक्षसप्रयाणो( D2 °णं ); D3 वानरक्षंगोपुच्छराक्षसप्रयाणं; D4 वानरक्षाणामुत्थाय राक्षसप्रयाणो. —*Sarga no.* (figures, words or both): Ś Ñ1 V3 B3 D2.12 om.; Ñ2 B1 44; V1 34; B4 T3 45; D1.3.4 42; D5 43; D6–8.10.11 T1–3 M1–5.7–10 40; D9 48; T4 47; M6 38. —After colophon, D2 concludes with राम; T4 with श्रीरामार्पणमस्तु; G M1.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

# ४०

विसृज्य च महाबाहुर्ऋक्षवानरराक्षसान् ।
भ्रातृभिः सहितो रामः प्रमुमोद सुखी सुखम् ॥ १
अथापराह्णसमये भ्रातृभिः सह राघवः ।
शुश्राव मधुरां वाणीमन्तरिक्षात्प्रभाषिताम् ॥ २
सौम्य राम निरीक्षस्व सौम्येन वदनेन माम् ।
कैलासशिखरात्प्राप्तं विद्धि मां पुष्पकं प्रभो ॥ ३
तव शासनमाज्ञाय गतोऽस्मि धनदं प्रति ।
उपस्थातुं नरश्रेष्ठ स च मां प्रत्यभाषत ॥ ४
निर्जितस्त्वं नरेन्द्रेण राघवेण महात्मना ।
निहत्य युधि दुर्धर्षं रावणं राक्षसाधिपम् ॥ ५
ममापि परमा प्रीतिर्हते तस्मिन्दुरात्मनि ।
रावणे सगणे सौम्य सपुत्रामात्यबान्धवे ॥ ६
स त्वं रामेण लङ्कायां निर्जितः परमात्मना ।
वह सौम्य तमेव त्वमहमाज्ञापयामि ते ॥ ७
एष मे परमः कामो यत्त्वं राघवनन्दनम् ।
वहेर्लोकस्य संयानं गच्छस्व विगतज्वरः ॥ ८   G. 7. 44. 8 B. 7. 41. 8 L. 7. 43. 8

## 40

☞ $V_2$ missing for Sarga 40 ( cf. v.l. 7.12.2 ). $D_{12}$ begins with ॐ.

1 $^{a}$) $T_4$ damaged for विसृज्य. Ś $D_{8.12}$ तान्; $B_{1.2.4}$ $T_4$ $M_{2.6.9}$ तु; $M_8$ ते ( sic ) ( for च ). —$^{b}$) $B_3$ -राक्षस-वानरान् ( by transp. ). —$^{c}$) $M_6$ राजा ( for रामः ). —$^{d}$) $V_{1.3}$ $D_{1-5.9}$ विजहार ( for प्रमुमोद ). Ś $V_{1.3}$ $D_{1.3-5.7-12}$ $T_3$ $G_2$ Cg सुखं सुखी ( by transp. ); $B_2$ सुखं सुखं; $D_2$ सुखे सुखी; $M_1$ सुखी सुखी ( for सुखी सुखम् ). ❀ Cg : प्रमुमोद सुखं सुखी, स्वतः सुखी राम आश्रितदुःखनिवृत्त्या सुखं प्रमुमोद, अविच्छिन्नप्रमोदमगमदित्यर्थः. ❀

2 $^{a}$) $M_8$ तथा ( for अथ ). $M_9$ अथापराह्ण भगवान्. —$^{b}$) $\tilde{N}_1$ $V_{1.3}$ $D_{1-5.9}$ रामः सर्वैः सहानु( $V_3$ $D_5$ °र्वैर्महानु )-जैः( $V_1$ $D_{2.9}$ °गैः ). —$^{c}$) $D_{3.5}$ शुश्रुवे ( for शुश्राव ). —$^{d}$) Ñ B $D_{6.7}$ अंतरिक्ष( $\tilde{N}_1$ °क्षे )गतां( $B_1$ °चरीं ) प्रभुः; $V_{1.3}$ $D_{1-5.9}$ $T_4$ अंतरिक्षे प्र( $V_1$ $D_{2.9}$ $T_4$ वि )भु स्तदा; $D_{10.11}$ अंतरिक्षान्महाप्रभुः. ❀ Cg : अन्तरिक्षात्प्रभाषिताम् , अन्तरिक्षगतेनोक्ताम् । पुष्पकाभिमानिदेवतयोक्तामित्यर्थः । अन्तरिक्षाद्भिनिःसृतामिति च पाठः ।; Ck : अन्तरिक्षात् , अन्तरिक्षचरभूतेनेत्यर्थः ।; Ct : अन्तरिक्षात् । अन्तरिक्षचराभिःसृतामित्यर्थः. ❀

3 $^{a}$) $T_3$ सौम्यं. —$T_4$ damaged from $^{b}$ up to त्प्रा in $^{c}$. —$^{b}$) $G_1$ $M_5$ नयनेन ( for वदनेन ). —$^{c}$) $\tilde{N}_2$ B $D_{6.7.10.11}$ कुबेर-; $D_{1.3-5}$ कैलासाद् ( for कैलास- ). Ś $\tilde{N}_2$ $V_3$ B $D_{6-8.10-12}$ $M_6$ -भवनात्; $V_1$ $D_{2.9}$ -निलयात्; $D_{1.4}$ अभिसं-; $D_{3.5}$ अचलात् ( for -शिखरात् ). —$^{d}$) $\tilde{N}_1$ $V_{1.3}$ $D_{1-6.9}$ $M_8$ विमानं ( for विद्धि मां ). $G_1$ $M_1$ transp. विद्धि मां and पुष्पकं. $V_1$ $D_{3.9}$ तदा; $B_{1.2.4}$ $T_{3.4}$ $M_{5.10}$ विभो ( for प्रभो ). ❀ Ck : मां पुष्पकं विद्धीति । एवं च पुष्पकविमानाधिष्ठातृदेवताया अयं वादः । न त्विह पुष्पकविमानाकारस्य ।; so also Ct. ❀

4 $^{a}$) $B_2$ आदाय ( for आज्ञाय ). —$^{b}$) $D_3$ राज्ञो ( for गतो ). Ś $\tilde{N}_1$ $V_{1.3}$ $D_{1-5.8.9.12}$ $T_4$ $M_6$ [ ऽ ]हं ( for ऽस्मि ). Ś $D_{8.12}$ $M_6$ धनदेश्वरं; $D_{6.10.11}$ भवनं प्रति; $G_1$ धनदालयं ( for धनदं प्रति ). —$^{c}$) $\tilde{N}_2$ B उपस्थितं ; $V_1$ $D_{2.5.9}$ $M_6$ उपस्थाने( $M_6$ °द्य ); $T_4$ उपस्थास्य ( for उपस्थातुं ). Ś $D_{8.12}$ नरव्याघ्र; $D_{2.9}$ $T_4$ रघुश्रेष्ठ; $D_5$ नृप° ( for नरश्रेष्ठ ). —$^{d}$) $B_3$ स तु; $D_5$ तत्र ( for स च ). $\tilde{N}_1$ $V_{1.3}$ $D_{1-5.9}$ $T_4$ इदमब्रवीत् .

5 $^{a}$) $V_3$ रक्षितस् ( for निर्जितस् ). —$^{c}$) Ś $D_{8.12}$ च सु-; $\tilde{N}_2$ $B_3$ युद्धे ( for युधि ). $\tilde{N}_1$ $V_{1.3}$ $D_{1-5.9}$ हत्वा युधि दुराधर्षं. —$^{d}$) $T_4$ damaged after रावणं रा up to $6^{a}$. $D_{6.7.10.11}$ राक्षसेश्वरं ( for राक्षसाधिपम् ). Ś $D_{8.12}$ राक्षसं रावणं ततः ( $D_{12}$ प्रति ).

35 a) Ñ1 V1.3 D1–5.9 M6 स्नात्वा रसातले; D8.12 गत्वा रसातले. Ñ2 V2.3 B चैव; T2 G3 M8 दिव्यं (for दिव्यः). T3 रसातलादथागत्य. —b) Ñ1 D1–5 स शरो रिपुमर्दनः; V1 स शरो विविदारणः; T3 स शरोमरपूजितः. —c) D5 अनु- (for एव). V3 reads from र्ण up to d in marg. —d) Ñ1 V1 D1–5.9 इक्ष्वाकुमपराजितं; G (ed.) शत्रुघ्नस्य महाकरं.

36 T1 G2 transp. 36 and 37. M7 om. from -शर- in a up to नि in b. —b) T2 तु (for स). Ñ2 V2 B [ऽ]थ (B3 [ऽ]पि) राक्षसः (for निशाचरः). —c) Ś2.3 सुमहा-; D8.12 सुमहान् (for सहसा). Ñ1 D1–5.9 T1 G2 पपात सु(T1 G2 स)महातेजाः; T2 M1 स (M1 नि)पपात महातेजा. —d) V3 D12 M6 द्रुमः (for [अ]चलः). —After 36 (transp.), T1 G2 ins. 1052*.

37 T1 G2 transp. 36 and 37. Ñ1 damaged up to व in b. —a) D2.9 ततः (for तच्च). B2 सुमद् (sic); D2.9 महा- (for महच्). K (ed.) महत्तेन. Ś Ñ2 V B1.2.4 D T3.4 transp. दिव्यं and शूलं. B3 G1 M2.4–7.10 तच्च शूलं महावीर्यं (B3 °वेगं). —b) T4 याते (for हते). Ñ -रक्षसि (for -राक्षसे). G (ed.) लवणे निहिते युधि. —c) V2 (before corr. as in text).3 B4 D3.5–7.10.11 -देवानां (for -भूतानां). —d) D1.3–5 G3 करम् (for वशम्). T3 अभि- (for अनु-). Ś V3 D8.12 M6 करमागमत्; L (ed.) करमागतं (for वशमन्वगात्). —After 37, Ñ1 V1 D1.3–5.9 T2 M3 ins.; D2 T3 G3 M1 ins. after 38; T1 G2 ins. after 36 (transp.):

1052* ततश्च ते देवमहर्षयश्च
गन्धर्वसिद्धाः सहिताप्सरोभिः ।
अपूजयन्दाशरथिं समेता
दिष्ट्येति दिष्ट्येति मुहुर्वदन्तः ।

[(l. 1) Ñ1 V1 D1.2.4.9 T3 तु (for च). T3 om. ते. T2 ततश्च देवा ऋषयश्च सर्वे. —(l. 2) D5 -यक्षाः (for -सिद्धाः). D1.3–5 सह च (for सहिता). D9 शिरोभिः (for -[अ]प्सरोभिः). —(l. 3) D3 संपूजयन्. Ñ1 V1 D1–5.9 समेत्य (for समेता). —(l. 4) Ñ1 च दिष्टेति (for [इ]ति दिष्ट्येति). T1.2 M3 नदंतः.]

—Thereafter M1 cont.; Ñ2 B1.3.4 ins. after 37; V2 B2 (l. 4 only) D6.7.10.11 T4 G1.3 M2.4–10 ins. after 38:

1053* ततो हि देवा ऋषिपन्नगाश्च
प्रपूजिरे ह्यप्सरसश्च सर्वाः ।
दिष्ट्या जयो दाशरथेरवास-
स्त्यक्त्वा भयं सर्प इव प्रशान्तः ।

[Ñ2 illeg. for l. 1. —(l. 1) M4 om. हि. G1 M5 देवाः सह-; G3 M4 देवाः सर्षि- M6.7 देवर्षि स- (for देवा ऋषि-). M3 सहर्षयः पन्नगाश्च. V2 अथर्षयो देवगणाः ससिद्धाः; B1.3.4 ततः स देवर्षिगणाः सपन्नगाः; M1 ततो देवा ऋषयः पन्नगाश्च; M10 तथैव सिद्धर्षिमहोरगाश्च. —(l. 2) G2 प्रपूजितैर् (sic); G (ed.) अपूजयन् (for प्रपूजिरे). Ñ2 B1.3.4 M1.4 स-; T4 G1 M2.5–7.10 च (for हि). Ñ2 B1.3.4 सिद्धाः; M1 सेंद्राः (for सर्वाः). V2 प्रपूजयंत्यप्सरसश्च वीरं. —(l. 3) Ñ2 V2 B1.3.4 G2 M8.9 तवाद्य; G1 त्वयाप्तो; M1 त्वयाद्य; Ct as in text (for अवाप्तस्). —(l. 4) D6 सर्वजन-; G3 M8.9 सर्वे एव (for सर्प इव). G3 M8 प्रशांताः; M9 प्रहृष्टाः (for प्रशान्तः). Ñ2 V2 B1.3.4 दिष्ट्या च (B4 om. च) लोकाः सर्व एव (Ñ2 V2 बहुशः; B3 जगति) प्रस- (Ñ2 °प)न्नाः; G1 M2.4–7.10 लोकाश्च सर्वे प्रवदंति तु(G1 हृ)ष्टाः; M1 सर्वा दिशः सर्व एव प्रशांताः.]

38 a) M5 स तं (for भयं). D1.3.4.8 M6 विहत्य; D6.7.10.11 T4 M5 निपात्य (for निहत्य). Ñ2 V2 B एकेषुणा चैव निहत्य शत्रुं. —b) Ñ2 V2 B [अ]पि; D9 [अ]द्य (for [अ]स्य). Ñ1 damaged after घु up to [अ]थ (see var.) in c. V1 D1–5.9 T1.2 G2 M1.3 रघूत्तमः सः (D5 °मस्य; D9 °मश्च) (for रघुप्रवीरः). —Ñ2 illeg. for cd. —c) B2 विनिर्गताद् ; G1 स दीर्घबाहू (for विनिर्बभाव्). V2

# ६२

हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः ।
ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनम् ॥ १
दिष्ट्या ते विजयो वत्स दिष्ट्या लवणराक्षसः ।
हतः पुरुषशार्दूल वरं वरय राघव ॥ २
वरदाः स्म महाबाहो सर्व एव समागताः ।
विजयाकाङ्क्षिणस्तुभ्यममोघं दर्शनं हि नः ॥ ३
देवानां भाषितं श्रुत्वा शूरो मूर्ध्नि कृताञ्जलिः ।
प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान् ॥ ४
इमां मधुपुरीं रम्यां मधुरां देवनिर्मिताम् ।
निवेशं प्राप्नुयां शीघ्रमेष मेऽस्तु वरो मतः ॥ ५ G. 7.76.5 B. 7.70.5 L. 7.73.5

---

D6.7.10.11 T3 M9 उत्तम- (for उद्यत-). Ś V2.3 B D8.12 T3 M5–7.10 -पाणिस् (for -बाणस्). Ñ1 V1 D1–5.9 T1.2 G2.3 M1.3 तमो विदार्या(D9 °हत्या)थ (Ñ1 damaged up to थ) रराज वीरः.—d) Ś V2 B2 D12 प्रमृद्येव; Ñ2 विदार्येव; B4 प्रपीड्येव; D8 समृद्धेव; M8 प्रणुन्नेव; M10 निहत्येव (for प्रणुद्येव). Ñ1 V1 D1–5.9 T1.2 G2.3 M1.3 सूर्यो यथा चारु- (for तमः प्रणुद्येव).—After 38, Ś V3 D8.12 L (ed.) ins.:

1054* ततस्तु देवा ऋषयः सपन्नगाः
प्रनर्तयन्त्यप्सरसश्च सर्वाः ।
दिष्ट्या जयोऽनेन रणेऽपि प्राप्तो
दिष्ट्या लोकाः सर्व एव प्रशस्ताः ।

[(l. 2) V3 यक्षा पुनश्च; D8 प्रवर्तयंति (for प्रनर्तयन्ति). D12 (also as above) सर्वशः (for सर्वाः).—(l. 3) D12 च (for ऽपि). V3 महारथेन (for रणेऽपि प्राप्तो).—(l. 4) V3 हि लोकाः प्रसभं (for लोकाः सर्व एव). L (ed.) दिष्ट्या च लोकाः सकलाः प्रसन्नाः.]

—After 38, V2 B2 (l. 4 only) D6.7.10.11 T4 G1.2 M2.4–10 ins. 1053*; while D2 T3 G3 M1 ins. 1052*.

Colophon: —*Sarga name*: Ś Ñ V B D1–5.8.9.12 लवणवधः(Ś1 °मरणं).—*Sarga no.* (figures, words or both): Ś Ñ1 V2.3 D2.4.12 om.; Ñ2 T3 74; V1 53; B1 75; B2 59; B3 73; B4 76; D1 63; D3 M6 67; D5 64; D6.7.10.11 T1.2 G M1–5.7.9.10 69; D8 66; D9 71; T4 77; M8 68.—After colophon, T4 concludes with श्रीरामार्पणमस्तु । श्रीरामाय नमो नमः; G M1.2.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

## 62

Cv does not comment on Sarga 62.

1 a) Ñ1 om. तु (subm.). G2 तस्मिन् (for देवाः).—b) B4 सर्षि-; M7 वह्नि- (for साग्नि-). M6.7 -पुरोधसः (for -पुरोगमाः). T2 G2 M1.5.9 सहेंद्राः सा(M5 समहेंद्रा)-प्सरोगणाः; M8 सहेंद्राप्सरसो गणाः.—c) Ś V3 B2 D8.12 ते; Ñ1 D1.3.4 T3 तं; D5 तां; T1.2 G2.3 M2.3.8.10 च (for सु-). M6.7 तमूचुर् (for ऊचुः सु-). M1 समुचितां (for सुमधुरां). V1 D2.9 T3 M6.7 -मधुरं वाक्यं; D1.3.4 °रां वाचं (for -मधुरां वाणीं).—d) Ñ1 V1 D1.2.4.5.9 T3 -सूदनं; G1 M6 -घातिनं (for -तापनम्).

2 a) Ś V3 D8.12 T1.2 G2.3 M9 त्वं विजयी; Ñ1 V1 D1–4.9 त्वं जीवितो; B1 [अ]सि विजयी; D5 त्वं जीवसे (for ते विजयो). Ñ2 B1.4 वीर; V2 marg. (for वत्स).—b) V2 reads from ल up to ष in c in marg. G (ed.) दिष्ट्या ते राक्षसो हतः.—Ñ1 damaged for c.—c) D11 reads from पुरुष up to d in marg. G (ed.) प्रीताः स्मो नरशार्दूल.—d) V3 D6.7.10.11 T4 G1 M7 सुव्रत (for राघव).

3 M1 om. 3–4.—a) Ñ V1 B1.3.4 D1–5.9 स्मो; V2 D6.7.10.11 T3.4 तु; B2 सु- (for स्म). M7 परमार्थं (for वरदाः स्म).—b) M7 [आ]गताः सह (for समागताः).—c) B1–3 D1.4 विजयाकांक्षिणे; D8 वराभिकांक्षिणस्; T1.2 G3 विजयः कांक्षितस्; G2 M7 विजयं कांक्षिणस्. ❀ Ck.t: तुभ्यं तव(Ck °वेति यावत्). ❀—d) Ś Ñ V1.3 B D1–5.8.9.12 T2.4 G2.3 M3.8.9 च नः; V2 marg. (for हि नः).

4 M1 om. 4 (cf. v.l. 3).—b) Ñ2 B तदा; D1.3–5 देवान् (for शूरो). Ñ1 वरदानं तथात्मनः.—c) Ś V2.3 B D8.12 G1 M2.4–7.10 -तेजाः (for -बाहुः).—d) V2 marg.; B1.2.4 शत्रुतापनः; B3 स प्रतापवान् (for प्रयतात्मवान्).

5 a) M9 दिव्यां (for रम्यां). Ś Ñ (Ñ1 damaged except इयं) V B D1–5.7–12 M2.4.6.7 इयं मधुपुरी रम्या.—b) D6 मथुरां (for मधुरां). Ś Ñ2 V2.3 B D5.7.10–12 M2.4.6.7 मधु(D7 °थु)रा देव(V2 B2 °ना पूर्वं)निर्मिता (D5 संमता); Ñ1 V1 सर्वदैवतसंमिता; D1–4.9 सर्वतो देवसंम(D2.9 °मि)ता; D8 पूर्वं मयविनिर्मिता.—c) Ś Ñ V B2.4 D1.3.4.7–12 T4 M2.4.6–8 प्राप्नुयाच् (for प्राप्नुयां). M8 नित्यम् (for शीघ्रम्).—d) D2.9 एवम्; D11 एष वो (for एष मे). Ñ2 V2 B2 परो (for वरो). Ś Ñ1 V1.3 D1.3–8.10–12 G1 M2.4–7.10 परः; Ñ2 V2 B वरः; D2.9 शुभः (for मतः). G (ed.) एष मे कांक्षितो वरः. ❀ Cm: इयमिति । इयं मधुरा । निवेशं सपौरजानपदमहाबलसेनानिर्दे(वे?)शभूतमहाराजधानीत्वं प्राप्नुयादित्यर्थः ।; so also Cg.k.t. ❀

G. 7. 76. 6
B. 7. 70. 6
L. 7. 73. 6

तं देवाः प्रीतमनसो बाढमित्येव राघवम् ।
भविष्यति पुरी रम्या शूरसेना न संशयः ॥ ६
ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा ।
शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयत् ॥ ७
सा सेना शीघ्रमागच्छच्छ्रुत्वा शत्रुघ्नशासनम् ।
निवेशनं च शत्रुघ्नः शासनेन समारभत् ॥ ८
सा पुरी दिव्यसंकाशा वर्षे द्वादशमे शुभा ।
निविष्टा शूरसेनानां विषयश्चाकुतोभयः ॥ ९
क्षेत्राणि सस्ययुक्तानि काले वर्षति वासवः ।
अरोगा वीरपुरुषा शत्रुघ्नभुजपालिता ॥ १०

—After 5, M6 ins. :

1055* परितोषश्च मे स्फीतो गुरुनन्दनतस्तथा ।
देवानां च प्रसादेन निहतो लवणो मया ।
ज्येष्ठस्य भूमिपालस्य राज्ञो राज्यगुणैषिणः ।
महत्या प्रभया शीघ्रं हतो मधुसुतो मया ।
इत्येवमुक्तास्ते देवाः शत्रुघ्नेन महात्मना ।
शत्रुघ्नं देवशत्रुघ्नं व्याहर्तुमुपचक्रमुः ।
एवमेव महाबाहो शत्रुघ्न रघुनन्दन ।
यस्त्वं मधुवने हंसि लवणं भूमिकम्पनम् ।

6 $^{a}$) V1 ते देवाः; D2.9 देवास्ते (for तं देवाः). —V2 reads from प्रीत up to $^{b}$ in marg. B1.4 प्रीतिमनसो; G (ed.) बाढमित्येवं (for प्रीत°). —$^{b}$) Ñ1 D1.3–5 चाब्रुवन्; M4 सोदरं (for राघवम्). V1 बाढमेतमथाब्रुवन्; D2.9 T3 बाढमित्यब्रुवन्स्म तं; G (ed.) प्रीताः शत्रुघ्नमब्रुवन्. —$^{c}$) Ñ1 V1 D1.2.4.5.9 T3 [इ]यं नगरी; D3 [इ]यं नाम्ना तु (for पुरी रम्या). V2 (marg.) B आहुर्भविष्यति पुरी. —$^{d}$) Ś1.2 Ñ1 B3 D1.3.4.8 मथुरेति; Ś3 Ñ2 V1 D2.5.9.12 T3 मधुरेति; V2 (marg.) रम्या सैषा; B1.4 वीरस्यैषा; B2 शूरस्यैषा; M10 शौरसेनी; Cm.g.k.t as in text (for शूरसेना). Ś Ñ V1 D1–5.8.9.12 T3 [ए]व विश्रुता; G (ed.) [अ]भिशब्दिता (for न संशयः). —After 6, V2 G (ed.) ins. :

1056* पूजिता सर्वलोकस्य यथा देवपुरी दिवि ।

[ G (ed.) लोक- (for देव-). ]

—Then V2 cont. l. 1–2 of 1057*.

7 $^{a}$) Ś Ñ V1 D1–5.9.12 T3 एवम्; V2 B1.2 तथा च; B3 तस्य च; M1 तं तथा (for ते तथा). Ñ2 D2.9 महात्मानं (for महात्मानो). D8 दत्त्वैव वरं महात्मानो (hypm.). —Ñ2 illeg. for $^{b}$. —$^{b}$) D3 दिवि (for दिवम्). Ś Ñ V2.3 B D1.3–5.8.12 खं( Ñ1 D1.3–5 सं; V2 B ते ) विविशुस्; G1 M2.4–7.10 संप्रय( M6 °प्राप्तु )युस् (for आरुरुहुस्). Ñ1 D1.3–5 ततः (for तदा). V1 D2.9 T3 देवलोकं ययुस्ततः. —V2 om. 7$^{cd}$. —$^{c}$) B2 वै (for ऽपि). Ñ V1 D1–5.9 -बाहुस् (for -तेजास्). —$^{d}$) D1.3–5 स्वां; Cm as in text (for तां). G2 om. सेनां. Ñ1 V1 D1–5 समुदा( D1.3.4 °पा )वहत्; B1.2 °पाह्वयत्; B3 सममादयत्; B4 समुपाक्रमत्; D7 °पाविशत्; T3 °पाहरत् (for समुपानयत्). —For 7, G (ed.) subst.; while V2 cont. l. 1–2 after 1056* and ins. l. 3 after 7$^{ab}$ :

1057* इत्युक्त्वा देवताः सर्वा विमानैः शतशो नभः ।
कृत्वा वितिमिरं सर्वं प्रतियाता यथागतम् ।
गतेषु देवसंघेषु शत्रुघ्नो रघुनन्दनः ।
तां सेनामानयामास यां हित्वा पूर्वमागतः ।

[ (l. 1) V2 ता*क्त्वा (illeg.) (for इत्युक्त्वा) and गताः (for नभः). ]

8 $^{a}$) D2 या (for सा). Ñ1 T1–3 G2.3 M3.5.8.9 आगम्य; D2.9 आगत्य (for आगच्छच्). —$^{b}$) D8 कृत्वा (for श्रुत्वा). B4 शत्रुघ्नस्य च शासनं. —$^{c}$) D5 निवेशं तं (for निवेशनं). —V2 reads from शत्रुघ्नः up to $^{d}$ in marg. Ś Ñ1 D9.12 T3 G2 च चक्रे स( G2 °क्रेसौ ); V1 D5 ततश्चक्रे; V3 च प्रयतः; D1.3.4 T1.2 G3 M3 चं चक्रे सा( D3 °क्रेस्याः ); M6 च सदनं; M8.9 चान्यसनं (for च शत्रुघ्नः). —Ñ2 illeg. for $^{d}$. —$^{d}$) Ś Ñ1 V1.2 B D2.3.10–12 M1.6.8.9 Cm.g.k.t श्र( D10.11 M1 Cm.g.t श्रा )वणेन( M8 °णे सा ); V3 D1.4.9 स ( V3 D9 स्व )बलेन; D5 स बलस्थ; T1–3 G2.3 M3 मधुरायां; G1 तत्र शीघ्रं (for शासनेन). Ś Ñ1 V1 D3.5.9.12 T3 G2 महाबलः; V2 B D2 तदाकरोत्; V3 स चाभवत्; D1.4 G3 M3 महाबला; D6 समाविशत्; D7.11 T4 G1 M2.4.5.10 समाचरत्; Cm.g.k.t as in text (for समारभत्). —For 8$^{cd}$, D8 subst. :

1058* दूरीकृत्वा भयं घोरं लवणेन महाबल ।

9 $^{a}$) V2 D10.11 Ck.t स पुरा; Cg.tp as in text (for सा पुरी). D1–5.9 देव- (for दिव्य-). Ś V3 D12 -संवासा; V2 D10.11 -संकाशो; D1–5.9 -संस्थाना (for -संकाशा). V1 सा पुरस्य च संस्थाना. —V2 reads 9$^{b}$ (except वर्षे) in marg. —$^{b}$) Ñ1 V1 D1–5.9 [ऽ]भूद्द्वादशे; M6.7 G (ed.) तु( G [ed.] वै ) द्वादशे; Cg.k.t as in text (for द्वादशमे). Ś V2.3 B2.3 D2.7–12 M1.6.7 शुभे; Ñ2 V2 B1.4 [ऽ]भवत्; G (ed.) तदा (for शुभा). —$^{c}$) Ñ2 V2.3 B3.4 D10.11 Ck.t निविष्टः; B2 निवेशः; Cg.tp as in text (for निविष्टा). V2 B4 शूरसेनायां( B4 °न्यः ); T1.2 G2.3 M3.7 शूरसेना सा; G (ed.) विषयश्चास्याः (for शूरसेनानां). Ñ1 V1 D1–5.9 निविष्टो विषयश्चैव. —$^{d}$) M6.7.9 [अ]कुतोभयं. Ś V3 D8.12 T3.4 M5 विषयाश्चाकुतोभयाः; Ñ1 V1 B4 D1–5.9 शूरसेनस्ततोऽभवत्; Ñ2 विषयः स ततोऽभवत्.

10 D6 om. 10. —$^{a}$) Ñ1 V1.2 D1–4 श( D1.4 सस्य; D3 रस )वंत्यस्यां( V2 *sup. lin.* also °त्यस्मिन् ); Ñ2 B

अर्धचन्द्रप्रतीकाशा यमुनातीरशोभिता ।
शोभिता गृहमुख्यैश्च शोभिता चत्वरापणैः ॥ ११

यच्च तेन महच्छून्यं लवणेन कृतं पुरा ।
शोभयामास तद्वीरो नानापण्यसमृद्धिभिः ॥ १२

G. 7. 76. 13
B. 7. 70. 12
L. 7. 73. 12

सस्यवंत्यासन् ; D5.9 सस्यवंति स्युः ( D9 °तीति ) ( for सस्ययुक्तानि ). M7 क्षोणी च सस्यसंयुक्ता. —$^{b}$ ) D5 तोयदः ( for वासवः ). Ś V3 D12 M6 काले देवो ववर्ष च; Ñ V2 B D1–4.9 काले देवश्च ( Ñ2 V2 B °वः प्र ) वर्षति; V1 M7 देवः काले च वर्षति; D8 पर्जन्यः कालवृद्धिकृत् . —$^{c}$ ) Ñ V B1.3.4 D1.4.5.7.10.11 G2 अरोगवीर-; D2.9 अप्रमत्ताश्च; D3 आरोग्यवीर-; D5 अरोगवतं (sic) ( for अरोगा वीर- ). V2 B1 -पुरुषां; D1–3.9.12 T4 G3 M5.8 -पुरुषाः ( for -पुरुषा ). —$^{d}$ ) Ś D8.12 शत्रुघ्नपरि-; B1 शत्रुघ्नेन तु ( for शत्रुघ्नभुज- ). V2 B1 -पालितां; D1–3.9.12 T4 G2 M5.8 -पालिताः ( for -पालिता ). —After 10, Ñ2 V2 B2 ins. l. 1 of 1059*.

11 $^{a}$ ) V2 B2 -प्रतीकाशां; Cm.g.k.t cite as in text. —$^{b}$ ) Ñ2 V2 B2 T1 M3 -तीरमाश्रितां ( Ñ2 T1 M3 °ता ); D1.3–5 °संस्थिता ( for -तीरशोभिता ). —G ( ed. ) om. 11$^{cd}$. —$^{c}$ ) D5 हर्म्य- ( for गृह- ). —$^{d}$ ) M9 नदीभिश् ( for शोभिता ). V3 G1 M6.8.9 चांतरापणैः ( for चत्व° ). Ś Ñ1 V1 D1–4.8.9.12 चत्वरैरापणैस्तथा; D5–7.10.11 T3.4 M2.4.5.7.10 चत्वरापणवीथिकैः (D6.7 T3 °वीथिका; T4 °वीथिकाः; M2.4.5.7.10 °शोभिता ). ❀ Ct : वीथीकस्याश्चीत्वमार्षम् . ❀ —For 11, B1.3.4 subst.; Ñ2 V2 B2 ins. l. 1 after 10 and subst. l. 2–4 for 11$^{cd}$; Ś1 V3 D8.12 ins. l. 3–4 after 11$^{ab}$; D7.10.11 T G M1–5.8( l. 1–3 ).7–10 only l. 4 cont. after 1062* :

1059* वप्रप्राकारसम्पन्नां गोपुराट्टालसंवृताम् ।
शोभितां राजमार्गेण नानापण्यविभूषिताम् ।
उद्यानवेश्मसम्पन्नां समृद्धनरसंवृताम् ।
नानादेशागतैश्चापि वणिग्भिरुपशोभिताम् ।

[ ( l. 1 ) B3.4 -संपन्ना; M6 -विपुलां ( for -सम्पन्नां ). Ñ2 -तोरणां; B3.4 -संवृता ( for -संवृताम् ). M6 गोपुरार्गलशोभितां ( for the post. half ). —( l. 2 ) B3.4 शोभिता. M6 -पण्योप- ( for -पण्यवि- ). B3.4 -भूषिता. —After l. 2, M6 ins. :

1059(A)* वर्णशालागृहैर्मुख्यैरजितैरजितान्तराम् ।

—( l. 3 ) Ś1 V3 D8.12 M6 -वनसंपन्ना( M6 °न्नां ); B3.4 -वेश्मसंपन्ना. B3 -बल-; B4 -शर-; M6 -जन- ( for -नर- ). Ñ2 V2 B1 -सेवितां; B3.4 -संवृता ( for -संवृताम् ). Ś1 V3 D8.12 संवृद्ध ( V3 °द्धा )तरुसंवृता ( for the post. half ). —( l. 4 ) Ñ2 V2 B1.3.4 D7.8.10.11 G2.3 M1.2.4.8.10 -देशगतैश् ( for -देशा° ). G1 M2.4.5.10 पुरुषैर् ( for वणिग्भिर् ). Ś1 V3 B3.4 D8.12 -शोभिता; M1.9 -सेवितां ( for -शोभिताम् ). ]

—Thereafter, Ñ2 cont. l. 1–2 of 1062*; while B2 cont. :

1060* निवेशयामास तदा स्थानेन च विशेषतः ।

—Thereafter, B2 further cont. l. 1–2 of 1062*.

—After 11, D6.7.10.11 G1 M2.4.5.9.10 ins. :

1061* चातुर्वर्ण्यसमायुक्ता नानावणिजशोभिता ।

[ M2.4.9.10 चातुर्वर्ण्यैः. D7.11 -वाणिज-; D10 -वाणिज्य- ( for -वणिज- ). ]

12 Ñ2 B transp. 12 and 13 ( Ñ2 illeg. ). —$^{ab}$ ) Ś V3 D8.12 या च; V1 एवं; B1 पूर्वं; B4 यस्य ( for यच्च ). V3 B3 [अ]नेन ( for तेन ). Ś V3 D8.12 -शुभ्रा; Ñ1 D1.4.6.7.9–11 T4 G M2–8.10 Cg.k.t शुभ्रं; D2 गृहं; D5 T1–3 M1.9 श्वभ्रं ( for शून्यं ). V2 reads कृतं पुरा in marg. Ś V2 D8.12 कृता; M2.4 तदा; M5 गृहं; Cm as in text ( for कृतं ). Ś Ñ1 V2 D1.3–5.8.12 M1.8.9 तदा; D6.7 G1 M10 गृहं; M2.4.5 कृतं; M6 om.; Cg.k.t as in text ( for पुरा ). D10.11 transp. महच् and पुरा. —$^{c}$ ) T1.2 G2.3 M3 शत्रुघ्नो ( for तद्वीरो ). Ś V3 D8.12 व्यशोभयत शत्रुघ्नो; D6.7.10.11 T4 G1 M1.2.4–10 तच्छो( M7 स शो )भयति शत्रुघ्नो. —$^{d}$ ) V2 D2.9 -पुण्य-; B1 -पथ-; D1.4 -पुष्प- ( for -पण्य- ). Ñ V1.3 D6–8.12 T4 M5.8.9 -पण्योपशोभितं ( Ñ V1.3 D8.12 °तां ); D10.11 G1 Ct -वर्णोपशोभितं; T1.2 G2.3 M1.3 -वर्णैन तद्गृहं; M2.4.6.7.10 -पण्येन शोभितं. —After 12, Ñ1 V2 B4 ( l. 1 only ) D1–7.9–11 S ins. ( Ñ1 D1–5.9 subst. l. 3 only for 13$^{ab}$ ; while Ñ2 cont l. 1–2 after 1059*; B2 cont. l. 1–2 after 1060* :

1062* आरामैश्च विहारैश्च तटाकैश्च समन्ततः ।
शोभिता शोभनीयैश्च यैश्चान्यैर्दिव्यमानुषैः ।
तां पुरीं दिव्यसंकाशां नानापण्योपशोभिताम् ।

[ ( l. 1 ) V2 B2 आगारैश्; G1 आहारैश् ( for आरामैश् ). B2 महाहारैस्; T4 विरामैश्च ( for विहारैश्च ). B4 नानावृक्षैश्च पुष्पैश्च ( for the prior half ). Ñ2 B2.4 तडागैश्च; V2 D6.7.10.11 T4 K ( ed. ) शोभमानं( T4 °नैस्; K [ ed. ] °नां ) ( for तटाकैश्च ). B4 सपंकजैः; T4 ततस्ततः ( for समन्ततः ). Ñ1 D1–4.9 T3 उद्यानैश्च पुरैश्चैव( T3 सरोभिश्च ) तडागैश्चैव सर्वशः( Ñ1 D2.9 °तः ); D5 पुरैश्चोपवनैश्चैव सर्वशः शोभनैर्वृतां. —( l. 2 ) Ñ V2 B2 D5.10.11 G3 M6.10 शोभितां ( for शोभिता ). Ñ V2 B2 D1–5.9 T3 शोभमानैश् ( for शोभनीयैश् ). Ñ V2 B2 D1–5.9–11 T3 तथान्यैर्; D7 यत्रान्ये; M10 तैश्चान्यैर् ( for यैश्चान्यैर् ). Ñ2 V2 D7.10 दैव-; B2 ( marg. also ) D11 देव-; M7 दीप्त- ( for दिव्य- ). D7 -मानुषाः; G ( ed. ) -पूरुषैः ( for -मानुषैः ). D6 T1.2 G2.3 M1–3.8.9 ये चान्ये दिव्यमानुषाः ( for the post. half ). —( l. 3 ) Ñ1 देव- ( for दिव्य- ). G1 M2.4.5.10 सा पुरी दिव्यसंकाशा ( for the prior half ). G ( ed. ) -पुण्योप- ( for -पण्योप- ). G1 M2.4.6.7.10 यमुनातीरशोभिता( M6.7 °तां ); M5 नानावर्णोपशोभिता ( for the post. half ). ]

—Thereafter, D7.10.11 T G M1–5.8( l. 1–3 ).7–10 cont. l. 4 only of 1059*.

G. 7. 76. 15 B. 7. 70. 15 L. 7. 73. 13 तां समृद्धां समृद्धार्थः शत्रुघ्नो भरतानुजः ।
निरीक्ष्य परमप्रीतः परं हर्षमुपागमत् ॥ १३

तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीम् ।
रामपादौ निरीक्षेयं वर्षे द्वादशमे शुभे ॥ १४

इति श्रीरामायणे उत्तरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

---

**13** Ñ$_2$ B transp. 12 and 13 ( Ñ$_2$ illeg. ). $D_8$ om. 13–14$^{b}$. $V_1$ om. 13$^{ab}$. For subst. in Ñ$_1$ $D_{1-5.9}$ cf. v.l. 1062*. —$^{a}$) $V_2$ $B_3$ **समृद्धां तां** ( by transp. ); $B_1$ **समृद्धार्थः**; $B_{2.4}$ **समृद्धां तु**; $M_9$ **स समृद्धां** ( for **तां समृद्धां** ). Ś $D_{12}$ **च शत्रुघ्नो**; $V_3$ $B_1$ $D_6$ $T_2$ **समृद्धार्थां** ( for **समृद्धार्थः** ). —$^{b}$) Ś $D_{12}$ **ददृशे** ( for **शत्रुघ्नो** ). $V_2$ B **लक्ष्मणानुजः**. —$^{cd}$) $D_7$ $G_1$ **परमः**; $M_1$ **तां पुरीं** ( for **परम-** ). $V_2$ $B_{1-3}$ **-स्फीतां**; $T_{1-3}$ $G_3$ $M_3$ **-प्रीत्या** ( for **-प्रीतः** ). $B_1$ $M_1$ **उपागतः** ( for **उपागमत्** ). G ( ed. ) **हर्षं शत्रुघ्न आविशत्** ( for $^{d}$ ). Ñ$_1$ $V_1$ $D_{1-5.9}$ **निरीक्ष्य परया प्रीत्या शत्रुघ्नो हर्षमागमत्** ( $D_5$ **°गतः** ).

**14** $D_8$ om. 14$^{ab}$ ( cf. v.l. 13 ). —$^{a}$) Ñ $V_1$ $B_2$ $D_{1-5.9}$ $T_3$ **चिंता** ( for **बुद्धिः** ). —$^{b}$) Ś $M_2$ **निरीक्ष्य**; Ñ$_1$ **विवेश्य**; $M_7$ **प्रवेश्य**; G ( ed. ) **निविश्य** ( for **निवेश्य** ). Ś $D_{1.3.5.7}$ **मथुरां**; $M_{10}$ **मधुरा-**; Ck as in text ( for **मधुरां** ). —$^{c}$) Ś Ñ$_2$ V $B_2$ $D_{6-8.10-12}$ $T_{3.4}$ $G_{1.2}$ $M_{1.2.4.10}$ **निरीक्षे** ( $D_{6.7.10}$ $T_4$ $G_2$ $M_{4.10}$ **°क्ष्ये** )**हं**; Ñ$_1$ $D_{1.3-5}$ **प्रपश्येयं** ( for **निरीक्षेयं** ). —$^{d}$) Ñ $V_{1.3}$ $D_{1-5.9-11}$ $T_3$ **वर्षे द्वादश आगते**; $V_2$ $B_2$ **वर्षेस्मिन्द्वादशेचिरात्**. —For 14, $B_{1.3.4}$ subst.; while Ñ$_2$ $V_2$ $B_2$ $D_{7.10.11}$ ins. after 14 :

1063* **ततः सताममरपुरोपमां पुरीं**
**निवेश्य वै विविधजनाभिसंवृताम् ।**
**नराधिपो रघुपतिपाददर्शने**
**दधे मतिं रघुकुलवंशवर्धनः ।**

[ (l. 2) $B_3$ तां ( for वै ). —(l. 3) $B_2$ नरपति- ( for रघु° ). —(l. 4) $B_{2-4}$ दधौ; $D_7$ दध्रे ( for दधे ). $V_2$ मतिं दधौ ( for दधे मतिं ). ];

while $M_7$ ins. :

1064* **हत्वा मधोः पुत्रममन्दवीर्यः**
**स तान्सुरेशान्शिरसा प्रणम्य ।**
**कृत्वा निवासं भवने तदीये**
**द्रष्टुं स रामं प्रययौ महीशः ।**

Colophon : $V_1$ om. —*Sarga name* : Ś Ñ$_1$ $V_3$ $D_{1.3-5.8.12}$ **मथु( $D_4$ °धु )रानिवेशः**( Ś$_1$ $V_3$ **°शनं** ); Ñ$_2$ $V_2$ $B_{1.3.4}$ **मधुपुरनिवेशः**( $B_3$ **°शनं** ); $B_2$ **मधुवनप्रवेशः**; $D_{2.9}$ **मधुपुर्यां शत्रुघ्ननिवासः**; L ( ed. ) **मथुरोपनिवेशः**. —*Sarga no.* ( figures, words or both ): Ś Ñ$_1$ $V_{2.3}$ $D_{2.12}$ om.; Ñ$_2$ $T_3$ 75; $B_1$ 76; $B_2$ 60; $B_3$ 74; $B_4$ 77; $D_{1.4}$ 64; $D_3$ $T_4$ 78; $D_5$ 66; $D_{6.7.10.11}$ $T_{1.2}$ G $M_{1-5.7-10}$ 70; $D_8$ 67; $D_9$ 72; $M_6$ 68. —After colophon, $T_4$ concludes with **श्रीरामार्पणमस्तु । श्रीरामाय नमो नमः**; G $M_{1.2.5.8}$ with **श्रीरामाय नमः**; $M_{10}$ with **श्रीरामचन्द्राय नमः**.

# ६३

ततो द्वादशमे वर्षे शत्रुघ्नो रामपालिताम् ।
अयोध्यां चक्रमे गन्तुमल्पभृत्यबलानुगः ॥ १
मन्त्रिणो बलमुख्यांश्च निवर्त्य च पुरोधसम् ।
जगाम रथमुख्येन हययुक्तेन भास्वता ॥ २
स गत्वा गणितान्वासान्सप्ताष्टौ रघुनन्दनः ।
अयोध्यामगमत्तूर्णं राघवोत्सुकदर्शनः ॥ ३
स प्रविश्य पुरीं रम्यां श्रीमानिक्ष्वाकुनन्दनः ।
प्रविवेश महाबाहुर्यत्र रामो महाद्युतिः ॥ ४ G. 7. 78. 7 B. 7. 72. 7 L. 7. 75. 8

## 63

D12 begins with ॐ.

1 $^{a}$) B8 पूर्णे; M2 गते; Cm.g.k.t as in text (for ततो). Ś Ñ1 V1 B3 D1–5.8.9.12 T3 तु (B3 स) द्वादशे. —$^{b}$) Ś Ñ1 V1 B2.3 D1–4.7–9.12 T3 शत्रुताप (B3 °पात) नः; Ñ2 D5 शत्रुसूदनः; V2 (before corr. as in Ś) B1.4 शत्रुकर्षणः (for रामपालिताम्). —$^{cd}$) V2 B ईहते; V3 प्रययौ; T2 चक्रमे; M7 प्राक्रमद् (for चक्रमे). V3 पूर्णां (for गन्तुम्). G (ed.) चक्रेयोध्यां मतिं गंतुम् (for $^{c}$). T1.2 लब्धभृत्य-. G2 -पदानुगः; Ck.t as in text (for -बला°). V3 सामात्यः सपदानुगः (for $^{d}$). D7 प्रययौ सेनया सार्धं रामसंदर्शनोत्सुकः. —For 1$^{cd}$, Ś Ñ V1 D1–5.8.9.12 T3 subst.:

1065* अयोध्यागमने बुद्धिं चकाराल्पपदानुगः ।

[Ñ2 illeg. for the prior half. Ñ2 T3 -बल- (for -पद-).]

2 $^{b}$) B2–4 G1 निवृत्य; M4 निवार्य (for निवर्त्य). G1 M4.5 स (for च). V3 G1 M4.5 पुरोधसः. —For 2$^{ab}$, Ś Ñ1 V1.2 D T G2.3 M1.2.8.9 G (ed.) subst.:

1066* ततो मन्त्रिप्रधानांश्च बलमुख्यान्निवर्त्य च ।

[Ś1.2 V1 पुर-; Ś3 D8.12 सुर-; D3 मंत्र-; G (ed.) बल- (for मन्त्रि-). D6.7.10.11 T1.4 M1.3.8.9 -पुरोगांश्; T2 G2.3 -पुरोधांश् (for -प्रधानांश्). Ś V1 D8.12 स (for च). T3 निवेश्य (for निवर्त्य). D2.9 T3 सः (for च).]

—Ñ1 damaged from मुख्येन in $^{c}$ up to श (see var.) in $^{d}$. —$^{c}$) D6.7.10.11 हयमुख्येन; K (ed.) हयमुख्यैश्च; (for रथ°). T3 अनुगानां सहस्रेण. —$^{d}$) Ś D8.12 जय-; G1 वाजि- (for हय-). L (ed.) भासता (for भास्वता). Ñ V1.2 B (B3 m. also) D1–7.9–11 T G2.3 M1.3.8.9 हया (D6.7.10.11 रथा) नां च शतेन च (V2 B2.4 वै; D2 T4 हु; D3.5–7.10.11 T1.2 G3 M1.3 सः); B2 (orig.) हयानामयुतेन च.

3 $^{a}$) G1 गणिकान्; Cv.m.t as in text (for °तान्). Ś Ñ V B4 D1–5.8.9.12 T3 स गत्वा दिवसैः कैश्चित्; M7 गणितान्विविधान्मासान्. —$^{b}$) Ś Ñ V B4 D1–5.8.9.12 T3.4 सं (T3 सु) हृ (Ś3 प्र) ष्टो; B3 संप्राप्तो (for सप्ताष्टौ). B1 सौम्यो राघवनंदनः. —After 3$^{ab}$, Ś Ñ V B D S ins. a passage relegated to App. I (No. 9). ☞ Ñ1 missing from 3$^{c}$ up to 67.4 (वायुमु in l. 4 of 1127*). —$^{c}$) D1.4 शूरो; M1 तत्र (for तूर्णं). G1 शत्रुघ्नः प्रययौ शीघ्रं. —$^{d}$) Ś V1.3 D1–5.8.9.12 T3 रामसंदर्शनोत्सुकः (T3 °न्मुखः); Ñ2 V2 B राघवं द्रष्टुमुत्सुकः; Cv as in text. —For 3$^{cd}$, T1.2 G2.3 M3 subst.:

1067* वाल्मीकिं मुनिशार्दूलमयोध्यां प्रययौ तदा ।

—After 3, Ś V1 B2 D1–5.8.9.12 T3 ins.:

1068* तां गोपुरवतीं रम्यामुद्यानशतशोभिताम् ।

[B2 D3.5 -वन- (for -शत-).]

4 $^{ab}$) Ś D5.8.12 संप्रहृष्टां; V1.3 D2.3.6.7.9–11 T3.4 G1 M2.4–9 स (V1 D3.6 T4 सं) प्रविष्टः; D1.4 स (D4 सं) प्रहृष्टः (for स प्रविश्य). T3 प्रीति- (for पुरीं). B3 D3.5 श्रीमान्; L (ed.) हृद्यां (for रम्यां). Ñ2 B1.3.4 D3.5 इक्ष्वाकुकुल-. B3 -संभवः (for -नन्दनः). T1.2 G2.3 M1.3 स त्वयोध्यां समासाद्य नानापण्योपशोभितां. —After 4$^{ab}$, D1–5.9 T3 ins.; while Ś D8.12 ins. l. 2 only after 4; whereas Ñ2 B2 ins. l. 2 only after 4$^{ab}$; V1 ins. after 4:

1069* प्राविशद्वै स नृपतिर्वासवो मरुतैरिव ।
समपूज्यत पौरैश्च द्विजैर्जानपदैरपि ।

[(l. 1) V1 D3 प्रविशन् (for प्राविशद्). T3 प्रविश्य नृपवर्योयं (for the prior half). D2.9 मारुतैर्; T3 विबुधैर् (for मरुतैर्). D5 मरुद्भिरिव वासवः (for the post. half). —(l. 2) Ś1 सुसंपूज्य तु; Ś2.3 D8.12 स संपूज्यत; Ñ2 B2 पूज्यमानः स- (for समपूज्यत). Ś चारैश्; D3 वारैश् (for पौरैश्).]

—Ñ2 illeg. for $^{c}$. —$^{d}$) B2 महामतिः (for °द्युतिः). —For 4$^{cd}$, D1–5.9 T3 subst.; while Ś V1 D8.12 cont. after 1069*:

1070* रामायतनमासाद्य प्रविवेशानिवारितः ।

—Thereafter, all the above MSS. (including L [ed.]) cont.; while Ñ2 V2 B D7.10.11 ins. after 4:

1071* स रामं मन्त्रिमध्यस्थं पूर्णचन्द्रनिभाननम् ।
पश्यन्नमरमध्यस्थं सहस्रनयनं यथा ।

[(l. 1) V1 om. (hapl.) from the post. half up to the prior half of l. 2. —(l. 2) Ñ2 D9 अपश्यत्सुर-; V2 B2–4 पश्यत्यमर-; B1 अपश्यद्देव-; D1.3–5 ददर्शामर-; D2 पश्यन्स सुर-; L (ed.) पश्यन्नगर- (for पश्यन्नमर-).]

G. 7. 78. 9
B. 7. 72. 9
L. 7. 75. 11

सोऽभिवाद्य महात्मानं ज्वलन्तमिव तेजसा ।
उवाच प्राञ्जलिर्भूत्वा रामं सत्यपराक्रमम् ॥ ५
यदाज्ञप्तं महाराज सर्वं तत्कृतवानहम् ।
हतः स लवणः पापः पुरी सा च निवेशिता ॥ ६
द्वादशं च गतं वर्षं त्वां विना रघुनन्दन ।
नोत्सहेयमहं वस्तुं त्वया विरहितो नृप ॥ ७
स मे प्रसादं काकुत्स्थ कुरुष्वामितविक्रम ।
मातृहीनो यथा वत्सस्त्वां विना प्रवसाम्यहम् ॥ ८
एवं ब्रुवाणं शत्रुघ्नं परिष्वज्येदमब्रवीत् ।
मा विषादं कृथा वीर नैतत्क्षत्रियचेष्टितम् ॥ ९
नावसीदन्ति राजानो विप्रवासेषु राघव ।
प्रजाश्च परिपाल्या हि क्षत्रधर्मेण राघव ॥ १०
काले काले च मां वीर अयोध्यामवलोकितुम् ।
आगच्छ त्वं नरश्रेष्ठ गन्तासि च पुरं तव ॥ ११

5 V2 reads $5^{ab}$ in marg.—$^{ab}$) Ñ2 V2 B1–3 अभिवाद्य. G (ed.) ततोभिवाद्य राजानं शिरसा च प्रणम्य च. —$^{c}$) Ś V1 D1.4.8.12 T1.2 M5.7 वाक्यं (for भूत्वा). —$^{d}$) D3.5 राघवं सत्यविक्रमं.

6 $^{a}$) Ś2.3 V2 B1 D1–5.8.9.12 T3 G2 M9 यथाज्ञप्तं (D2.9 °प्तो). —$^{b}$) Ś V1.3 D1.3–5.8.12 M6 तत्सर्वं (by transp.); Ñ2 V2 (marg.) B सर्वं वै (for सर्वं तत्). T3 कृतवाहनं (meta.) (for °नहम्). —$^{d}$) V1 D1–7.9 T3 चापि; D10.11 M1 चास्य; D12 * च; G3 damaged (for सा च). ❀ Cm: पुरी निवेशिता बहुविधारामानेकसज्जनामिति। (°नानामति?)दिव्यगृहैश्च संपूर्णा कृतेत्यर्थः।; Ck.t cite: अस्य पुरी निवेशिता. ❀

7 $^{a}$) V1 D1.4.6.7.10.11 द्वादशैता(D1.4 °शेमा)नि वर्षाणि; T1.2 G M1.3.7–9 द्वादशैते गता वर्षास्; M2.4.10 द्वादशेहाभवन्वर्षास्; M5 द्वादशे चाभवद्वर्षास् (sic). —$^{b}$) Ñ2 V1.2 B D1–5.9 T3 वस(V2 युग)तस्त्र(T3 °स्य) मे(B2 वै) प्र(T3 वि)भो. —$^{cd}$) Ñ2 V1 D2.9 G1 [उ]त्सहेहं(G1 °हे तम्) (for [उ]त्सहेयम्). Ñ2 V1.2 B D1–5.9 T3 पुनर् (for अहं). T3 वक्तुं (for वस्तुं). M1 transp. अहं and त्वया. G1 M2.4.6.7.10 वीर विना (for विरहितो). G1 damaged for नृप. Ś V1.2 (marg.) D1–4.8.9.12 T3 विनाभूतस्त्वयानघ; D5 त्वयानघ विनाकृतः (for $^{d}$).

8 $^{a}$) Ś Ñ2 V1.3 B D1–5.8.12 T3 मम; G1 * मे; M6 तन्मे (for स मे). B4 कुरु तत् (for काकुत्स्थ). —$^{b}$) B4 काकुत्स्थ (for कुरुष्व). Ś Ñ2 V B D1–5.8.9.12 T3 M6 वदतां वर(V2 D12 °रः) (for [अ]मितविक्रम). —$^{c}$) D6 M1 मात्रा (for मातृ-). —$^{d}$) D6.7.10.11 T1.4 G2.3 M1.3.8.9 न चिरं; T2 न * रः (for त्वां विना). Ś V3 D8.12 नोत्सहाम्यहं; Ñ2 V2 B न वसाम्यहं; T3 तादृशोस्म्यहं; G1 निवसाम्यहं (for प्रवसाम्यहम्).

9 $^{a}$) D6.7.10.11 काकुत्स्थं(D10.11 °त्स्थः) (for शत्रुघ्नं). —$^{b}$) Ñ2 V1 B D1–5.9 T3 प्रो(D2.9 उ)वाच(Ñ2 B भ्रातरं) भ्रातृवत्सलः(B2 D3.9 °लं). —V2 reads $12^{cd}$ twice (second time in marg.). —$^{cd}$) V1 D1–5.9 T3 गमः; M9 कथं (for कृथा). V1.3 D1–7.9–12 T G2.3 M1.3.8.9 शूर; M3 देवी (sic) (for वीर). M7 (with hiatus) एतत् (for नैतत्). Ñ2 V2 (second time) B प्राह गाढं(Ñ2 **) परिष्वज्य मा विषादं कृथा इति.

10 $^{a}$) Ś Ñ2 V1.2 B D1–5.8.9.12 T3 न विषीदंति. —$^{b}$) Ñ2 V2 B1.2.4 विप्रवासेन; B3 विप्रवत्सल; D9 विप्रावासेषु. Ś D8 मानद (for राघव). —D7 om. (hapl.) $10^{cd}$. —$^{c}$) V3 D10.11 G1 M1.2.4–10 Ck.t प्रजा हि; K (ed.) प्रजा नः. G1.3 M2.4.5.7.8.10 -पाल्यास्ते; Ct as in text (for -पाल्या हि). D6 T4 प्रजाभिः परिपाल्याभिः. —For $10^{cd}$, Ś Ñ2 V1.2 B D1–5.8.9.12 T3 G (ed.) subst.:

1072* राज्यं हि परिरक्षन्तो राज्यवृत्तानुवर्तिनः ।

[D2.9 राज्ञा (for राज्यं). Ñ2 B2–4 सं-; B1 तु; G (ed.) स्वं (for हि). V3 राजार्यं (sic) (for राज्यं हि). Ñ2 V3 B2 -रक्ष त्वं; B3 -रक्षस्व; D2.9 -रक्ष्यंते (for -रक्षन्तो). V1 D1–4.9 राज- (for राज्य-). D2.9 -वर्तिना (for -वर्तिनः). Ñ2 V2 B राजवृत्त(B2.3 °त्ति)मनुस्मरन् (for the post. half).]

11 Note hiatus between $^{a}$ and $^{b}$. —$^{a}$) V1 D5 हि; V2 om. (subm.); D1.3.4.6.7.10.11 तु (for च). Ñ2 धर्मज्ञ; V1 D1–5.9 T3 मां(D1.3.4 [इ]मां) शूर; V2 शूर त्वम्; B शूरस्त्वम् (for मां वीर). —$^{b}$) Ñ2 illeg.; M5.7.8 ह्य(M8 त्व)योध्याम्; Cm.k.t अयोध्याम् (as in text). Ñ2 B2.3 D6.7 अवलोकय(Ñ2 °यन्; D6 °येः); V2 B1.4 °लोककः (for °लोकितुम्). Ś V3 D8.12 ह्य(V3 अ)योध्यां चावलोकय; V1 D1–5.9 T3 त्वमयोध्यां विलोकय. —$^{c}$) Ś V1 D1–5.9.12 T3 आगम्य तु (D1.2.4.9 च); Ñ2 V2 M6 आगच्छेस्त्वं; B1.4 समागच्छेर्; B2.3 आगच्छेथा (for आगच्छ त्वं). Ś V1 B1.4 D1–5.8.9.12 T3 -व्याघ्र (for -श्रेष्ठ). —$^{d}$) Ś V1.3 D3.5.8.12 T3 G1 M2.4.6 गंता चासि(V1 °हं); D1.4 गत्वा चाहं; G2 गंतासि स्व-; M8 गतोसि च. Ś V1.3 D1–5.8.9.12 T3 पुरीं (for पुरं). Ś V3 D8.12 सथा; D2.3.5.9 T4 ततः (for तव). G1 M8.9 परंतप; Ct as in text (for पुरं तव). Ñ2 V2 B1.2.4 गंताह(B4 °तव्य)मपि च (Ñ2 वा) स्वयं; B3 (with hiatus) गंतासि अपि च स्वयं; M7 गंतासि रघुनंदन.

ममापि त्वं सुदयितः प्राणैरपि न संशयः ।
अवश्यं करणीयं च राज्यस्य परिपालनम् ॥ १२
तस्मात्त्वं वस काकुत्स्थ पञ्चरात्रं मया सह ।
ऊर्ध्वं गन्तासि मधुरां सभृत्यबलवाहनः ॥ १३
रामस्यैतद्वचः श्रुत्वा धर्मयुक्तं मनोनुगम् ।
शत्रुघ्नो दीनया वाचा बाढमित्येव चाब्रवीत् ॥ १४
स पञ्चरात्रं काकुत्स्थो राघवस्य यथाज्ञया ।
उष्य तत्र महेष्वासो गमनायोपचक्रमे ॥ १५
आमन्त्र्य तु महात्मानं रामं सत्यपराक्रमम् ।
भरतं लक्ष्मणं चैव महारथमुपारुहत् ॥ १६
दूरं ताभ्यामनुगतो लक्ष्मणेन महात्मना ।
भरतेन च शत्रुघ्नो जगामाशु पुरीं तदा ॥ १७        G. 7. 78. 22 B. 7. 72. 21 L. 7. 75. 23

इति श्रीरामायणे उत्तरकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

---

**12** $^a$) $D_{5.6}$ [अ]थि (for [अ]पि). —$^b$) $M_1$ परंतप (for न संशयः). $\tilde{N}_2$ $V_{1.2}$ B $D_{1-5.9}$ $T_3$ प्राणेभ्यो($B_2$ °णैश्चा)पि विशेषतः. —$^c$) $D_{1.4}$ $G_2$ $M_{2.6.7}$ अवश्य- (for अवश्यं). Ś $D_{5.8}$ ते; $V_1$ $B_2$ $D_{1-4.9.12}$ $T_3$ तु; $B_{1.3.4}$ हि (for च). —$^d$) Ś $D_{8.12}$ -रक्षणं (for -पालनम्).

**13** $^a$) $\tilde{N}_2$ B वसेह; $T_{1.2}$ $G_3$ $M_1$ त्वं वत्स (for त्वं वस). $D_{2.9}$ शत्रुघ्न; $D_{11}$ om. (for काकुत्स्थ). —$^b$) $D_{6.7.10.11}$ $T_{1.2.4}$ G $M_{1-5.7-10}$ सप्तरात्रं. $M_6$ महाबल; K (ed.) इहावस (for मया सह). —$^c$) $\tilde{N}_2$ B ततो; $V_3$ क्षिप्रं (for ऊर्ध्वं). Ś $B_{2-4}$ $D_{1.3-5.8.12}$ मथुरां; $\tilde{N}_2$ $B_1$ स्वपुरीं (for मधुरां). —$^d$) $D_3$ ससूत- (for सभृत्य-). —After 13, $B_2$ ins.:

1073* अवश्यमेव कर्तव्यं मद्वाक्यमवधारय ।

**14** $V_2$ reads 14$^{ab}$ twice (second time in marg.). —$^a$) $\tilde{N}_2$ वचनं (for [ए]तद्वचः). $V_{1.2}$ (first time) रामस्यैवंविधैर्वाक्यैर्; $D_{1.2.4.9}$ $T_3$ रामस्यैवं बहुविधैर्. —$\tilde{N}_2$ illeg. for $^b$. —$^b$) Ś $D_{8.12}$ $T_{1.2}$ मनोगतं; $B_{1.3}$ सुभाषितं; $B_2$ सुशोभनं (for मनोनुगम्). $V_1$ $D_{1.2.4.9}$ ध($D_9$ क)र्मयुक्तैर्महापदैः; $V_2$ (second time as in $B_4$) धर्मयुक्तैः सुभाषितैः; $B_4$ धर्मयुक्तस्य भाषितं; $T_3$ शिक्षितो वचनैः शुभैः. —$^d$) Ś $\tilde{N}_2$ V $B_{2-4}$ $D_{1-4.8.12}$ $T_3$ [आ]ह($V_2$ $D_2$ [ए]व) राघवं($\tilde{N}_2$ illeg.; $B_{3.4}$ पार्थिवं); $B_1$ [ए]व पार्थिवं; $T_{1.2}$ $G_{2.3}$ $M_{1.9}$ [ए]वम($G_2$ $M_1$ °व सो)ब्रवीत् (for [ए]व चाब्रवीत्).

**15** $^a$) $\tilde{N}_2$ $V_2$ $B_{1.3.4}$ $T_3$ पंचरात्रं तु($V_2$ $B_3$ च); $B_2$ $D_{6.7.10.11}$ $T_{1.2}$ $G_{2.3}$ $M_{1-5.7-10}$ सप्तरात्रं च($M_{2.4.5.7.10}$ तु); $G_1$ स सप्तरात्रं (for स पञ्चरात्रं). $\tilde{N}_2$ $V_2$ $B_{1.3.4}$ शत्रुघ्नो (for काकुत्स्थो). —$^b$) $M_1$ तदाज्ञया; Ck.t as in text (for यथा°). $V_1$ $D_{1-5.9}$ $T_3$ रामस्याज्ञाचिकीर्षया. —$^c$) $\tilde{N}_2$ $V_2$ B तत्रोषित्वा; $V_1$ $D_{1-5.9}$ प्रोष्य तत्र; $D_8$ त * तत्र (for उष्य तत्र). $\tilde{N}_2$ $V_2$ $B_{1.4}$ महाबाहुर्($B_{1.4}$ °भागो) (for महेष्वासो). G (ed.) उषित्वा परमेष्वासो.

**16** $^a$) $\tilde{N}_2$ $V_2$ $B_{1.3.4}$ $G_2$ $M_1$ तं; $B_2$ स; $D_{1-5.9}$ $T_3$ $G_1$ $M_{2.4-7.10}$ च (for तु). $B_{1-3}$ $D_{1.4}$ $T_3$ महाराजं; $B_4$ $D_{2.9}$ °भागं (for महात्मानं). —$^c$) Ś $\tilde{N}_2$ $V_3$ $D_{8.12}$ transp. भरतं and लक्ष्मणं. $\tilde{N}_2$ $V_2$ (marg.) B [उ]भौ (for [ए]व). —$V_2$ reads $^d$ in marg. —$^d$) Ś $V_3$ $D_{11.12}$ उपाहरत्; $G_1$ $M_{4.5.9.10}$ अथारुहत् (for उपारुहत्). $\tilde{N}_2$ $V_2$ B मातरश्चैव($V_2$ °तृश्चैव तु) सर्वशः; $V_1$ $D_{1-5.9}$ $T_3$ संप्रतस्थे महाबलः($V_1$ °रथः); $M_7$ (with hiatus)आरुरोह महारथं. —After 16, $\tilde{N}_2$ $V_2$ B ins.:

1074* प्रणम्य विधिवद्वीरस्ताभिश्चैवाभिनन्दितः ।
आरुरोह रथं श्रीमान्नानारत्नविभूषितम् ।

[ (l. 1) $B_2$ स्त्रीभिश् (for ताभिश्). $B_3$ -मंत्रितः (for -नन्दितः). —(l. 2) $B_3$ ततः (for रथं). $B_2$ शीघ्रं (for श्रीमान्). $B_3$ रथं (for नाना-). $\tilde{N}_2$ -[उ]पशोभितं (for -विभूषितम्). ]

—Thereafter, $V_2$ cont.:

1075* स चैवं निर्गते धीमान्संप्रतस्थे नराधिपः ।

**17** $^{ab}$) Ś $V_3$ $D_{6-8.10-12}$ $T_4$ $G_{1.3}$ $M_{2.4.6.7.9.10}$ पद्भ्याम्; K (ed.) आभ्याम् (for ताभ्याम्). Ś $V_3$ $D_{8.12}$ $M_{1.9}$ उप- (for अनु-). G (ed.) स दूरानुगतो वीरो (for $^a$). $V_1$ $D_{1-5.9}$ $T_3$ दूरं चानु($V_1$ °भ्या)गतो वीरो भरतेन महात्मना. —$^c$) $D_{1-5.9}$ $T_3$ लक्ष्मणेन (for भरतेन). —$^d$) $V_1$ $D_{3.5}$ स्व- (for [आ]शु). Ś $V_3$ $D_{8.12}$ $M_6$ ययौ मधु- (for जगामाशु). $G_2$ $M_{3.6}$ पुरं (for पुरीं). $M_{6.7}$ तथा; K (ed.) ततः (for तदा). $V_2$ जगाम मधुरां पुरीं; $T_3$ जगाम नगरं तथा. —For 17, $\tilde{N}_2$ B subst.; while $V_2$ subst. l. 1–2 for 17$^{ab}$:

1076* स लक्ष्मणेनानुगतो महाबलो
ह्यभिप्रतस्थे भरतेन चैव हि ।
स दूरमध्वानमितो निवर्त्य तौ
पुरं स्वमेवाभिययौ महात्मा ।

## ६४

G. 7. 79. 1
B. 7. 73. 1
L. 7. 76. 1

प्रस्थाप्य तु स शत्रुघ्नं भ्रातृभ्यां सह राघवः ।
प्रमुमोद सुखी राज्यं धर्मेण परिपालयन् ॥ १
ततः कतिपयाहःसु वृद्धो जानपदो द्विजः ।
शवं बालमुपादाय राजद्वारमुपागमत् ॥ २
रुदन्बहुविधा वाचः स्नेहाक्षरसमन्विताः ।
असकृत्पुत्र पुत्रेति वाक्यमेतदुवाच ह ॥ ३
किं नु मे दुष्कृतं कर्म पूर्वं देहान्तरे कृतम् ।
यदहं पुत्रमेकं त्वां पश्यामि निधनं गतम् ॥ ४
अप्राप्तयौवनं बालं पञ्चवर्षसमन्वितम् ।
अकाले कालमापन्नं दुःखाय मम पुत्रक ॥ ५

[ Ñ2 illeg. for l. 1–2. —(l. 2) B3 [अ]ति- ( for [अ]भि- ). —(l. 3) Ñ2 V2 अदूरम् ( for स दूरम् ). B2.4 निवर्त्य ( for निवर्त्य तौ ). —(l. 4) Ñ2 मधोः पुरं तत्प्रययौ महाबलः. ]

—Thereafter, B2.4 cont.; while V2 ins. after 17 :

1077* दिवसगणनया क्रमेण गत्वा
स तु मधुरां नगरीं रघुप्रवीरः ।
सततमनुशशास राजसूनुः
शिरसि च रामवचो निशम्य भक्त्या ।

[ (l. 2) V2 om. स तु. V2 मथुरा-; B4 माथुरीं ( for मधुरां ). V2 B4 नर- ( for रघु- ). —(l. 3) V2 अन्वशासत ( for अनुशशास ). V2 B2 धर्मभीरुः ( V2 °तीव्रः ) ( for राजसूनुः ). —(l. 4) B4 om. च. V2 निधाय ( for निशम्य ). ]

—After 17, M7 ins. :

1078* इत्थं शत्रुघ्नः सत्कृतो भ्रातृवर्यै-
र्नत्वा तान्सर्वांस्तेजसादित्यकान्तान् ।
भूयस्तं नत्वा राघवं रामभद्रं
तेनानुज्ञातो निर्जगामोग्रधन्वा ।

Colophon. Ñ1 missing ( cf. v.l. 3 ). —*Sarga name* : Ś V3 D6.7.12 शत्रुघ्नप्रस्थानं; Ñ2 B1.2.4 D8 शत्रुघ्नप्रस्थापनं( B1 °नः ); V1 शत्रुघ्नप्रतिवर्तनं; V2 शत्रुघ्नगमनं; B3 शत्रुघ्नप्रत्यागमनं; D1.4 शत्रुघ्नप्रतिगमनः; D2.9 शत्रुघ्नपरिवेदनः( D9 °गमनः ); D3 शत्रुघ्नप्रत्यागमं; D5 शत्रुघ्नप्रयाणं. —*Sarga no.* ( figures, words or both ) : Ś V2.3 D2.12 om.; Ñ2 illeg.; V1 56; B1 78; B2 62; B3 76; B4 79; D1.4 65; D3 M8 70; D5 66; D6.7.10.11 T1.2 G M1–5.7.9.10 72; D8 69; D9 74; T3 77; T4 80; M6 71. —After colophon, T3 G M1.2.5.8 conclude with श्रीरामाय नमः; T4 with श्रीरामार्पणमस्तु । श्रीरामाय नमो नमः; M10 with श्रीरामचन्द्राय नमः.

## 64

☞ Ñ1 missing for Sarga 64 ( cf. v.l. 7.63.3 ). D12 begins with ॐ.

1 *a* ) G3 सु-; M7 om. ( subm. ) ( for स ). Ś V1.3 B1.2.4 D1.4.8.12 स तु ( by transp. ); B2 तत्र; D2.9 T3 च स; M1 [अ]थ स ( for तु स ). V2 marg.; G1 M2.4–6.10 तं प्रस्थाप्य च( M4.5 स; M6 तु ) शत्रुघ्नं. —*b* ) Ś V1 B D1.2.4.8.9.12 T1–3 G2 M1 भ्रातृभिः; Ct as in text ( for भ्रातृभ्यां ). —*c* ) V1.3 D2.3.9 T4 सुखं ( for सुखी ). V1 तत्र; B4 राजा ( for राज्यं ). —*d* ) Ś Ñ2 B3 D8.12 प्रति- ( for परि- ). V1 राज्यं धर्मेण पालयन्.

2 *a* ) Ś Ñ2 V B D1.3–5.8.9.12 M6 कतिपयाहस्य; D2 °पर्यातस्य; Cm.k.t as in text ( for °पयाहःसु ). —*b* ) B1 जानपद- ( for °पदो ). —*c* ) Ś D8.12 पुत्रं शवम्; Ñ2 V1.2 B D1.2.4.5.9 T3 बालं शवम् ( by transp. ); V3 शवं सुतम्; D3 बालं मृतम्; D6.7.10.11 M2.3.8–10 मृतं बालम्; G2 शर्मं बालम्; M6 शावं बालम् ( for शवं बालम् ). —*d* ) B2 उपाद्रवत्; B4 D2.9 °विशत् ( for °गमत् ). —After 2, D10.11 read 4*ab* for the first time, repeating it in its proper place.

3 *a* ) V3 नदन् ( for रुदन् ). D5 विलपन्बहुधा वाचः; Cgp रुदन्बहुविधं विप्रः. —*b* ) D10.11 T1.2 G2.3 M1.3.8 Ck.t स्नेहदुःखसमन्वितः; T3 स्नेहरूक्षसमन्विताः; M9 स्नेहाद्दुःख°; Cv as in text. —Ñ2 B1 om. 3*cd*. —*c* ) D3 [इ]ति शोकार्तः ( hypm. ) ( for पुत्रेति ). —*d* ) Ś V1.2 B2–4 D1.2.4.5.8.9.12 T3 शोकार्तः स जगाद( V1 B2–4 D1.4.5 [m. also] T3 °म ) ह; D3 स जगाद मुहुर्मुहुः.

4 V2 reads in marg. 4*ab*. D10.11 read 4*ab* for the first time after 2, repeating it here. —*a* ) B2 तु; B3 वा ( for नु ). V3 D12 दुःकृतं ( for दुष्कृतं ). V1 D1–4.9 T3 दुष्कृ( D2.3.9 दुःकृ )तं किं नु( D1.4.9 तु ) मे पुत्र( V1 भद्र; D1.4 तत्र ); V2 किं नु मे दुष्कृतेन त्वं. —*b* ) Ś V1.3 D1.3.4.8.12 T1.2 G2.3 M3.5.8 पूर्व-; Ñ2 B D5–7.10.11 ( D10.11 both times ) M1.2.4.7 पुरा; G1 M10 पुत्र; M6 पर- ( for पूर्वं ). G3 गतं ( for कृतं ). V2 मृतः पुत्राद्य बालकः; D2.9 देहांतरकृते कृतं. —*c* ) B2 यदर्थं; D6.7 तदहं; D12 यद्यं ( for यदहं ). Ñ2 B2.3 पुत्र बालं; V2 ( marg. ) B1 बालपुत्रं ( for पुत्रमेकं ). D6.7.10.11 तु; M6 च ( for त्वां ). V1 बालकं यदहं पुत्रं; D1–5.9 T3 त्वामेक( D1 T3 °कं )पुत्रं( D1 T3 °त्र ) यदहं.

5 *b* ) Ś1.2 पंचवर्षं. Ś V3 D8.12 -दशाधिकं; D1.4 -शतान्वितं; D10 Ct -सहस्रकं ( for -समन्वितम् ). Ñ2 V2 ( partly marg. from क ) B पंचवर्षकमेव च( Ñ2 हि; V2 ह ). —*c* ) D4 अंतकाले ( hypm. ) ( for अकाले ). B2 दुःखमापन्नं; D6.7.12 T3.4 G1 M1.3.8 कालमापन्नो; M6 °संपन्नं;

अल्पैरहोभिर्निधनं गमिष्यामि न संशयः ।
अहं च जननी चैव तव शोकेन पुत्रक ॥ ६
न स्मराम्यनृतं ह्युक्तं न च हिंसां स्मराम्यहम् ।
केन मे दुष्कृतेनाद्य बाल एव ममात्मजः ।
अकृत्वा पितृकार्याणि नीतो वैवस्वतक्षयम् ॥ ७

नेदृशं दृष्टपूर्वं मे श्रुतं वा घोरदर्शनम् ।
मृत्युरप्राप्तकालानां रामस्य विषये यथा ॥ ८
रामस्य दुष्कृतं किंचिन्महदस्ति न संशयः ।
त्वं राजञ्जीवयस्वैनं बालं मृत्युवशं गतम् ॥ ९

G. 7. 79. 12
B. 7. 73. 11
L. 7. 76. 10

Cm.g.k.t as in text (for °मापन्नं). —V2 reads in marg. $5^{d}$. —d) V2 तं मे पुत्राय (sic); B2 D6.7.10.11 Cm.t मम दुःखाय (by transp.). V1 पुत्रकं; V2 D1 T4 पुत्रकः; M5 नंदन; Cm.t as in text (for पुत्रक). ❀ Ct: पञ्चवर्षसहस्रकं वर्षशब्दोऽत्र दिनपरः सहस्रवत्सरं सत्रमुपासीतेतिवत्। तेन षोडशवर्षमित्येके। तेन किंचिदूनं चतुर्दशवर्षमित्यर्थं इत्यन्ये. ❀ —After 5, T1.2 G2.3 M1 ins. 1080*; while G1 repeats it after $7^{ab}$.

6 Ś D8 om. (hapl.) 6. —a) G1 M2.5–7 स्वल्पैर् (for अल्पैर्). —b) B2.3 गमिष्यावो (for गमिष्यामि). —V2 reads in marg. $6^{c}$. —c) M10 इयं; Cm.t as in text (for अहं) V1.2 D1–5.9 T3 जननी ते तथै(T3 °वै)वे(D9 °था चे)यं. —d) B2 M1 शोकेन तव (by transp.); D2.9 T3 शोकेन मम; Ct as in text (for तव शोकेन).

7 a) D2 [अ]कृतं; D9 [अ]द्य तं (for [अ]नृतं). V1 B2 D1–5.9 T3 किंचित्; V2 marg.; B1 चोक्तं; D6 T1.2 G3 M3 तूक्तं; G2 दुःखं (for ह्युक्तं). —b) V1 D1–4 कृतं; D5.9 T3 कृतां (for न च). G2 M1 पापं (for हिंसां). V1 D1–5.9 T3 न च(D9 मे) स्मरे; B1.3 करोम्यहं; G (ed.) कथंचन (for स्मराम्यहम्). Ś3 D8.12 न चाहं संस्मराम्यृतं (sic). —After $7^{ab}$, Ñ2 B ins.; while V2 cont. after 1080*:

1079* जन्मप्रभृति वै तात न च पापं स्मराम्यहम् ।

[V2 [ए]व; B4 वै (for च). B2 पीडां नैव (for न च पापं). B3 न पापं स्मरयाम्यहं (sic) (for the post. half).]

—After $7^{ab}$, V2.3 D1–7.9–11 T3.4 G1 (repeats) M2–5.7.9.10 ins.; T1.2 G2.3 M1 ins. after 5:

1080* सर्वेषां प्राणिनां पापं कृतं नैव स्मराम्यहम् ।

[V2 चापि; D1–5.9 T3.4 पीडां(T4 °डा); D6.7 प्राणो; T1.2 G1(first time).2.3 M3 दुःखं; Ck.t as above (for पापं). G1 (first time) कृतं तत्र; G2.3 कृतांतं तं(G3 °सं-) (for कृतं नैव). V2 पीडां नैव करोम्यहं; D1–5.9 T3 कृतां(D4 * *; T3 कर्तुं) नाहमनुस्मरे; D6 T4 M5.7 Ctp न कदाचन विद्य(D6 °ध्य)ते; D7 M1.4.9.10 न कदाचिन्न(M10 °तु) विद्यते; D10.11 न स्मरामि कदाचन; G1 (second time) M2 कदाचिन्न हि(M2 *) विद्यते (for the post. half).]

—B2 om. $7^{cd}$. —c) V1 B3 D1–4.9 T3 केनार्थं; V2 D6.7.10.11 T1.2 G3 M1.3.8 केनाद्य; D5 केनाहं; T4 M9 तेनाद्य; G2 केनान्य- (for केन मे). Ñ2 B1.3.4 त्वं; V2.3 D6.7.10.11 T1.2.4 G2.3 M1.3.8.9 [अ]यं (for [अ]द्य). —d) T2 एवं (for एव). Ś2.3 G2 महात्मजः(Ś2 °नः); M10 दुरात्मनः (for ममात्मजः). Ñ2 B1.4 मृतः पुत्राद्य बालकः. —e) G1 अदत्वा (for अकृत्वा). V2 -शुश्रूषां (for -कार्याणि). —f) Ś D8.12 यातो; Ñ2 V D1–7.9–11 T3.4 गतो (for नीतो). Ś1 Ñ2 D12 M8 वैवस्वतं क्षयं; V2 वैवस्वतं पुरं. B2 वैवस्वतक्षयं गतः.

8 a) B4 वा; D1.4.5 हि (for मे). —b) M10 न श्रुतं (for श्रुतं वा). Ñ2 B2.3 घोरसंहितं. —D5 repeats $8^{cd}$ (followed by 1082* and 1084*) after $9^{ab}$. —c) Ś1 D8 -वेलायां; Ś2.3 D12 -वेलानां; Ñ2 B -वयसां; T2 -कालं तु; G1 -काले तु (for -कालानां). M1 मृत्युप्राप्तमकालानां. —d) T1.2 G3 M1.3 न राम-; Ct as in text (for रामस्य). M6 विजये; Cg.k.t as in text (for विषये). Ś D8 M1.4 तथा; D10.11 ह्ययं (for यथा). —After 8, Ś V3 D8.12 ins.:

1081* पुनर्जगाद वाक्यं स पुत्रशोकेन पीडितः ।

9 V3 repeats $9^{ab}$ after l. 2 of 1084*. —a) Ñ2 B3 कर्म; V1 D1–5.9 T3 व्यक्तम्; V2 B1.2.4 मन्ये; V3 (second time) घोरात् (sic) (for किंचिन्). —b) D6 अन्यन् (for अस्ति). Ś V1 D1–5.8.9.12 T3 इदं(D1 °द) घोराग्नि(V1 D1.4 °रनि; D4 °राति; T3 °रार्थं)दर्श(Ś D8.12 वर्त)नं; V3 (second time) तद्व्यक्ताव्यवस्थितं. —After $9^{ab}$, D5 repeats $8^{cd}$. —c) D7.10.11 T4 M2.4–10 Ct स; Cg.k as in text (for त्वं). Ñ2 V2 B D6 न राजा जीवयेदे(B2 °यत्ये; D6 °यत्वे)नं. —d) V2 reads बालं in marg. B2 मे निधनं (for मृत्युवशं). —For $9^{cd}$, Ś V1.2 D1–4.5(reads after $8^{cd}$ [r.]).8.9.12 T3 subst.; Ñ2 V3 B D6.7.10.11 T1.2.4 G M (D10.11 T4 M3 read twice) ins. after $9^{ab}$:

1082* न ह्यन्यविषयस्थानां बालानां मृत्युतो भयम् ।

[Ñ2 V2 B1.4 तथा हि; V1 यतस्तद्-; V3 D6.7.10.11 T4 (D10.11 T4 first time) M2.4.6–8 यथा हि; B3 D2 न ह्यत्र; T3 न चास्य; M3 (first time) यथास्य; M5 यथाद्य (for न ह्यन्य-). Ś V1 D1–5.8.12 -विषयस्थान्वै(D2 °स्थो वै) (for °स्थानां). D6 क्षयं (for भयम्). Ñ2 V2.3 B2–4 D6.7.10.11 T1.2.4 G M (D10.11 T4 M3 first time) मृत्युरागतः; B1 मृत्युरापतेः (sic). Ś D1–5.8.9.12 T3 बालकान्मृत्युरा(D2 °को मृत्युमा)विशत् (D1.2.4.9 °शेत्); V1 बालान्मृत्युरिहाविशत् (for the post. half).]

—Then Ñ2 V2 B2–4 cont.:

1083* राज्ञो हि दुष्कृतेनैव ह्यकाले म्रियते जनः ।
दुर्भिक्षं वा सुभिक्षं वा राज्ञः कर्मविपाकजम् ।

G. 7. 79. 13 B. 7. 73. 13 L. 7. 76. 12 भ्रातृभिः सहितो राजन्दीर्घमायुरवाप्नुहि ।
उषिताः स्म सुखं राज्ये तवास्मिन्सुमहाबल ॥ १०

संप्रत्यनाथो विषय इक्ष्वाकूणां महात्मनाम् ।
रामं नाथमिहासाद्य बालान्तकरणं नृपम् ॥ ११

[ (l. 1) G (ed.) वै (for हि). V2 [ए]वम् (for [ए]व). V2 B2.4 (B2.4 with hiatus) अकाले; B3 चाकाले (for ह्यकाले). B4 प्रजा (for जनः). —(l. 2) B3 राज- (for राज्ञः).];

while, V1 D1–5.9 T3 cont. after 1082*; Ś V3 D8.12 (after l. 1) cont. after 1087*; M3 ins. after 10$^{ab}$; L (ed.) ins. after 10$^{cd}$ (first occurrence):

1084* इत्येवं विलपन्विप्रः पत्न्या सार्धमनाथवत् ।
द्वारि तिष्ठति रामस्य भृशं शोकाभिपीडितः ।
रामं गर्हयमाणस्तु भ्रातॄंश्चास्याति दुःखितः ।
वसिष्ठवामदेवादीनृत्विजश्चास्य संमतान् ।

[ (l. 1) Ś D8.12 एवं स; V3 एवं वै (for इत्येवं). —(l. 2) V1 [अ]तिष्ठत; T3 [अ]तिष्ठस्त; M3 तिष्ठंश्च (for तिष्ठति). D9 रामाय (for रामस्य). Ś2.3 लोकाभि-; D2.9 शोकेन; D5 शोकाति- (for शोकाभि-). —(l. 3) V1 च (for तु). D3.5.9 स रामं (D3 रामं च) गर्हमाणस्तु (for the prior half). D5 [ए]वाति-; D9 [अ]धिक- (for [अ]स्याति-). —(l. 4) D9 T3 [अ]पि; M3 [अ]भि- (for [अ]स्य). Ś V1 D8.12 ऋत्विजानति- (for ऋत्विजश्चास्य).]

—Thereafter, Ś D8.12 repeat 10$^{cd}$.

—After 9, Ñ2 V2 B D6.7.10.11 T1.2.4 G M L (ed.) ins.:

1085* राजद्वारि मरिष्येऽहं पत्न्या सार्धमनाथवत् ।
ब्रह्महत्यां ततो राम समुपेत्य सुखी भव ।

[ (l. 1) B1 D6 M8.9 राजद्वारे. D6.7.10.11 T4 M1 मरिष्यामि; T1.2 G3 M3.8.9 °ष्ये वा (for °ष्येऽहं). V2 असंशयं (for अनाथवत्). —T4 om. l. 2. —(l. 2) Ñ2 B4 समुत्पाद्य; V2 B1–3 ततो रामः (for ततो राम). M6 ब्रह्महत्यागतो राम (for the prior half). Ñ2 B4 ततो रामः; M1.6 त्वमुपेत्य (for समुपेत्य). Ñ2 V2 B1.2.4 भवेत् (for भव). B3 भ्रातृभिः सह भोक्ष्यते; L (ed.) संप्रेक्ष्य सुखी भवेत् (subm.) (for the post. half). ❀ Cg: सुखी भवेत्यादि व्यङ्ग्योक्तिः ।; so also Ck.t. ❀]

**10** B3 om. 10–11$^{b}$; D2 T4 om. 10; V1 D1.3–5.9 T3 om. 10$^{ab}$. —$^{a}$) Ñ2 V2 B1.2.4 राजा; M1 राम; M4 om. (for राजन्). —$^{b}$) Ś2.3 B1 आयुम् (sic); V2 B2 G1 M2.4.10 चायुर् (for आयुर्). Ñ2 V2 B1.2 अवाप्नुयात्; B4 D6.7.10.11 T1.2 G2.3 M1.3.8.9 °प्स्यसि (for अवाप्नुहि). —After 10$^{ab}$, V3 B2.4 ins.; while B3 cont. after 1085 (owing to om.):

1086* पुरोहितस्तथा चायं मित्रावरुणसंभवः ।

[B2.4 [ए]व (for च). V2 B2 मैत्रावरुण-).]

—After 10$^{ab}$, M3 ins. 1084*.

—Ś D8.12 repeat 10$^{cd}$ after 1084*. —$^{c}$) Ś V3 D7.8.12 (Ś D8.12 both times) उषितोऽस्मि (Ś3 D8.12 °स्मिन् [second time]); D1.4 उषितान्सु- (for उषिताः स्म). Ś V3 D8.12 (except V3 all second time) पुरे; D5 वयं (for सुखं). V1 राज्यं; D1.3–5.9 T3 राज्ञां; D8 राजा (sic) (for राज्ये). —$^{d}$) Ś V1 D1.3–5.8.9.12 T3 (Ś D8.12 second time) विषयेषु महात्मनां; Ñ2 V2 B1.2.4 राज्ञो दशरथस्य ह (B2 वै). —After 10, Ś V D3.5–8 (Ś D8 after 10$^{cd}$ [first occurrence]).10.11 S G (ed.) ins.; D12 ins. l. 1 and l. 2 after 10$^{cd}$ (first and second occurrence respy.):

1087* इदं तु पतितं यस्मात्तव राम वशे स्थितान् ।
कालस्य वशमापन्नाः स्वल्पं हि न हि नः सुखम् ।

[V1.2 D3.5 T3.4 M8–10 om. l. 1. T1.2 G M1 transp. l. 1 and l. 2. —(l. 1) Ś1 lacuna for the prior half. D6 न (for तु). T1.2 M1.2.4.6.7 Cm तपति नो (for तु पतितं). Ś1 D6.7 Ck.t तस्मात्; Ś2.3 ह्यस्मिन्; D10.11 ह्यस्मात्; M3 कस्मात् (for यस्मात्). V3 D8.12 इदं ते (V3 तं) प्रत्ययेनास्मि (for the prior half). M5 राजन् (for राम). Ś1.2 V3 D8.12 स्थितः; K (ed.) स्थिताः. —Ś V3 D8 M2.4–7 om. l. 2. —(l. 2) T2 M3 वा; G1 च (for first हि). D8 नास्ति स्वल्पं हि; M1 * *स्वल्पं न; M10 वयं स्वल्पं हि (for स्वल्पं हि न हि). V1.2 D3.5.12 T3 G (ed.) रामस्य विषयस्थानां न ह्य (G [ed.] नास्त्य)ल्पमपि नः (V2 * * * नास्ति मे) सुखं.]

—Thereafter, Ś V3 D8.12 cont. 1084*.

—After 10, Ñ2 B1.4 ins.:

1088* रामं नृपतिमासाद्य जाता सम्प्रति दुःखिताः ।

—After 10$^{cd}$ (first occurrence), L (ed.) ins. 1084*.

**11** Ś B3 D1.4.8.9 om. 11$^{ab}$ (for B3, cf. v.l. 10). V2 reads in marg. 11$^{a}$. —$^{a}$) V3 अयं बालोऽपि विषय. —$^{c}$) Ś2 नाथं रामम् (by transp.); V2 D4 M5 रामनाथम्; M1 बालं नाथम्; Cm.k.t as in text (for रामं नाथम्). Ś V1.2 D1–5.8.9.12 T3 अनुप्राप्य; G1 M2.4.7 इवासाद्य (for इहासाद्य). —$^{d}$) D10.11 ध्रुवं; T3 भृशं; M6 दृढं (for नृपम्). D6.7 T4 बालानां निधनं ध्रुवं; T2 जामांतशरणं नृपं (sic). —After 11, D1.4 ins.:

1089* वसुधे किं न दीर्णासि राज्ञो दशरथाच्च्युता ।
रामहस्तमनुप्राप्ता कष्टात्कष्टतरं गता ।

[ (l. 1) D1 राजा [sic] (for राज्ञो).]

राजदोषैर्विपद्यन्ते प्रजा ह्यविधिपालिताः ।
असद्वृत्ते तु नृपतावकाले म्रियते जनः ॥ १२
यदा पुरेष्वयुक्तानि जना जनपदेषु च ।
कुर्वते न च रक्षास्ति तदाकालकृतं भयम् ॥ १३
सुव्यक्तं राजदोषोऽयं भविष्यति न संशयः ।
पुरे जनपदे वापि तदा बालवधो ह्ययम् ॥ १४
एवं बहुविधैर्वाक्यैर्निन्दयानो मुहुर्मुहुः । G. 7. 79. 19 B. 7. 73. 19 L. 7. 76. 20
राजानं दुःखसंतप्तः सुतं तमुपगूहति ॥ १५

इति श्रीरामायणे उत्तरकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

---

**12** V3 reads in marg. 12[ab] (except राजदो). —[ab]) D3 राज्ञां (for राज-). V3 सप्रति-; D3 च परि-; D6 ह्यधर्म-; G1 M3.4.6.7.10 स्वपरि- (for ह्यविधि-). Ñ2 V2 B प्रजाः सम्यगपालिताः (for [b]). Ś V1 D1.2.4.5.8.9.12 T3 राजदोषा हि वर्धं(D1.4.5 °तं)ते नृणामपरि(Ś D8 °प्रति) पा (V1 ला)लनात् (D2 °लतां). —[c]) Ś V1 D1–5.8.9.12 T3 वृत्तहीने; B1 असद्वृत्ताद् ; T1 असद्वृत्तौ; M6 असंमते; Ct as in text (for असद्वृत्ते). Ś Ñ V B3.4 D1–8.10–12 G1 M3.4.5.7.10 हि; D9 M6 [ऽ]पि (for तु). B1 हि नृपतेर्; B2 नरपताव् (for तु नृपताव). —V2 reads in marg. 12[d]. —[d]) G1 ह्यकाले (for अकाले).

**13** [a]) Ś V2 D6.7.10.11 T1 यद्वा; V3 यतः; D5 T2.4 यथा (for यदा). Ś D8.12 नृपेषु; B1.4 पुरे हि; B3 पुरे च (for पुरेषु). Ñ2 [अ]युक्ता हि; B2 युक्ता हि; B3 D6 M6 युक्तानि; T4 [अ]वृत्तानि; Cm.g.k.t as in text (for [अ]युक्तानि). —[b]) V1 T3 राजा; B1.3 तथा; B4 राज्ये; D1.9 जने; D2.3 जनो; D4 om. (hapl.) (for जना). D3 T3 वा (for च). V1 D1.2.4.9 -पदे तथा(V1 °दा) (for -पदेषु च). —[c]) Ś V3 D8.12 कुर्वंति; D1.2.4.9 कुरुते; T3 कुर्वंते (for कुर्वते). Ś B4 D8.12 रक्षंति; V1 वै रक्षां; V3 शार्दूल; B2 D9 रक्षां तु; D1 रक्षां हि; D3 T4 रक्षां स (for रक्षास्ति). —[d]) Ś2 damaged for तदा. B4 काले; G (ed.) मृत्यु- (for काल-). B1 भवेत् (for भयम्). V3 तेषु गृहेत वै नृपः (sic).

**14** [a]) V2 B1–3 तद्व्यक्तं; B4 M6 सुव्यक्तो; Cm.g.k.t as in text (for सुव्यक्तं). Ś Ñ2 V B4 D1.3–5.8.10–12 हि; T3 तु (for ऽयं). B1.3 -दोषेण; D2.9 -दोषं हि; Cm.t as in text (for -दोषोऽयं). —[b]) B जातो मे(B2 जायते; B3 मृतोयं)नात्र संशयः. —[c]) Ś Ñ2 V1.3 D1–5.8.9.12 T3 चैव; V2 B3.4 D7.10.11 T4 G1 M3.4–7.10 चापि (for वापि). —[d]) Ś Ñ2 V1.3 D1–5.8.9.12 T3 यथा; V2 B D6.7.10.11 T1.2.4 G1 M4–9 तथा; K (ed.) ततो (for तदा). D12 G2 M4 ह्यहं (sic); M8 [ऽ]प्ययं (for ह्ययम्). ❀ Ctp तथाकालवधो ह्ययं. ❀ —After 14, Ñ2 ins. 1092*; while G2 ins. after 14; whereas M10 ins. after 15 :

1090* कालो वा कारणं राज्ञो राजा वा कालकारणम् ।
इति ते संशयो माभूद्राजा कालस्य कारणम् ।

Cf. Mbh. (crit. ed.) XII. 70.6.

—Thereafter, M10 cont. :

1091* नृपवरमिति निन्दयन्द्विजन्मा
स्वजनसमूहसमावृतोऽप्यशान्तः ।
मृतशिशुमुपगूहयन्स्वमूर्त्या
व्यलपदहो सुतशोकमत्यरूदम् ।

**15** [b]) Ś V1 D1–5.8.9.12 T3 निंद्य(Ś1.2 V1 T3 °द्र)-मानो; Ñ2 V3 D6.7.10.11 T1.2.4 G2.3 M1.3.8 Cg.k.t उपरुध्य (V3 °तप्य; T1 M1 °रुह्य); V2 B2–4 निंदन्नथ; M6 अपलप्य (for निन्दयानो). —Ñ2 om. 15[cd]. —[c]) V2 B2–4 स द्विजो (for राजानं). D3.5 भृश- (for दुःख-). —[d]) T1.2 -गृह्य तु; G2 -गूह्य तु; G3 -गुह्यति; M3.6.7 -गूहते (for -गूहति). Ś V3 D8.12 सुतं समवगूहत; V1 D1–4.9 T3 जगर्हे (D1–4 °र्हं) गृह्य तं सुतं; V2 B2.4 उपगू(V2 °गृ)ह्य सुतं तदा; B3 ततोतुष्टः सुतं शवं; D5 जगृहे तं मृतं सुतं. ❀ Cg.k.t : राजानमुपरुध्य (Ct °ध्येत्यन्वयः). ❀ —For 15, B1 subst.; while Ñ2 ins. after 14 ; whereas V2 B2–4 cont. after 1093* :

1092* एवं द्विजो बहुविधैः करुणस्तदानीं
वाक्यैः सुदुःखपरितप्तमना नरेन्द्रम् ।
संत्यज्य बालमुपगृह्य रुरोद दुःखा-
च्चुश्राव चैव नृपतिः परिदेवितं तत् ।

[(l. 2) B4 वाक्यैः सुतप्तमनसं विदधे नरेंद्रं. —Ñ2 illeg. for l. 3. —(l. 3) B2.4 संतुष्य (sic); B2 संतप्त- (for संत्यज्य). B3 दुःखी (for दुःखाच्च्). —(l. 4) V2 परिवेदितं (meta.) तत्; B2 °देवितस्ततः. ]

—After 15, V2 B2–4 ins. :

1093* ब्राह्मण्या ब्राह्मणः सार्धं पुत्रं क्रोधेन धारयन् ।
स तत्रोपाविशद्भूमौ राजद्वारि सुदुःखितः ।

[(l. 1) B3 om. from the post. half of l. 1 up to the prior half of l. 2. V2 सुतमंगेन; B2 पुत्रं क्रोडे नि- (for पुत्रं क्रोधेन). —(l. 2) B2.4 तत्रैव (for स तत्र). B2 G (ed.) [उ]पविश(B2 °वसे)द् (for [उ]पाविशद्). B2 च (for सु-).]

—After 15, M7 ins. :

# ६५

G. 7. 80. 1
B. 7. 74. 1
L. 7. 77. 1

तथा तु करुणं तस्य द्विजस्य परिदेवितम् ।
शुश्राव राघवः सर्वं दुःखशोकसमन्वितम् ॥ १
स दुःखेन सुसंतप्तो मन्त्रिणः समुपाह्वयत् ।
वसिष्ठं वामदेवं च भ्रातॄंश्च सहनैगमान् ॥ २
ततो द्विजा वसिष्ठेन सार्धमष्टौ प्रवेशिताः ।
राजानं देवसंकाशं वर्धस्वेति ततोऽब्रुवन् ॥ ३
मार्कण्डेयोऽथ मौद्गल्यो वामदेवश्च काश्यपः ।
कात्यायनोऽथ जाबालिर्गौतमो नारदस्तथा ॥ ४
एते द्विजर्षभाः सर्वे आसनेषूपवेशिताः ।
मन्त्रिणो नैगमाश्चैव यथार्हमनुकूलतः ॥ ५

---

1094* अथ द्विजः शोकभयातुरस्तदा
प्रभत्स्य रामं जगतां पतिं प्रभुम् ।
विलोक्य भूयः शवभूतमात्मजं
स संतताश्रुर्निपपात भूतले ।

—After 15, M8 ins. :

1095* विप्रः प्रियं पुत्रमकालमृत्युं
प्रगृह्य दुःखात्स तु पर्यदेवयत् ।
उवाच रामं च मनोभिरामं
संजीवय स्वात्मजमेनमद्य ।

—After 15, M10 ins. 1090* and 1091*.

Colophon : D1.3–5 om. —*Sarga name* : Ś Ñ2 V1 D2.6.8.9.12 ब्राह्मणपरिदेवनं (D2.9.12 °नो); V2 ब्राह्मणपुत्रमरणे ब्राह्मणपरिवेदनं; V3 ब्राह्मणबा ** (illeg.); B1.4 ब्राह्मणप्ररोदनं; B2 ब्राह्मणप्रबोधः; B3 ब्राह्मणपुत्रमरणं. —*Sarga no.* (figures, words or both) : Ś V2.3 D2.12 om.; Ñ2 B3 77; V1 57; B1 79; B2 63; B4 T4 81; D6.7.10.11 T1.2 G M1–5.7.9.10 73; D8 70; D9 75; T3 78; M6 71; M8 72. —After colophon, D8 concludes with रामः; T3 G M1.2.5.8 with श्रीरामाय नमः; T4 with श्रीरामार्पणमस्तु । श्रीरामाय नमो नमः; M10 with श्रीरामचन्द्राय नमः.

## 65

☞ Ñ1 missing for Sarga 65 (cf. v.l. 63.3). D1.3–5 cont. the previous sarga. D12 begins with ॐ. —Before 1, Ś D1.3–5.8.12 ins. :

1096* आर्तो रोरूयमाणस्तु सबन्धुरतिदुःखितः ।

[D1.3.4 च (for तु). D5 विवंधुर्. D12 इति (for अति-).]

